CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द. नं. १६८६५

पृ. ४५।-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द० नं० १८८६५

मल्लादर्श

मूल्य रु ५।-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जनकराज १९६२।

शिवताम १

श्रीगणाधिपतये नमः श्रीदक्षिणामूर्त्तये नमः स्वभक्तत्वाभावेऽपि परस्पुरस्कृत्य विरहात्स्वपाल्यत्वं मत्वा रुचिरतमकामानवजनम
प्रयच्छतं त्वय्यपकृतवसनीकृतवरनरं प्रकृष्टमाहिष्मत्याः कमपि भजे यं जनः प्रतिदिनं १ कौबेर्यां दिशि ताकमेत्यापि वयाख्यातो हि कश्चि
ज्झिरिर्गण्यक्यामविशेषितनवन्नपतिः श्रीसाहमल्लोऽभवत् यं प्राप्यत्रिदिवाधिनाथतनुजाचंडत्व निर्म्मोघतासंदेहं वर्द्धवेदिनोऽपि म
नुजा आकल्पमापेदिरे २ तस्माच्चंडइवाम्बुताब्धिजठराद्भीमघनश्यामसन्नक्षत्रानन्मयतां गतो लयभिवयापिश्री घनश्यामतां या
तो निष्फलतां प्रहीकृतविनप्रार्थ्यं यशो यस्य तं संसेव्यार्थिजनोऽखिलोऽपि भवति स्माभीष्टसंपत्तिभाक् ३ तदीयः सुतः श्रीमल्लैव
म्मनान्तपालः स्ववंशावतंसोऽभवत् यः वरेण्यं यमिच्छंति संतो यमीशोऽजयत्यर्थिसार्थार्थितायुष्पदाद्भिः ४ सत्यास्तत्र गिरो भवंति
त एतदुध्याने न तस्या गुणाध्यानतयैव मनसोऽन्तःपो भगवतः श्रीरामचंद्रस्य पदं ध्यानादेककलत्रतासुरवरस्यानो न्वसद्धंधताशंभु
स्यापकृतादिकानि हृदुगणानाशादयत्युत्तमान् ५ अनुध्यानम्यस्याभवति करुणालोकनिवहः सतां दत्वाऽज्यप्रमितिसक
लार्तिं हरति य सकृज्ञाविभातोऽङ्घ्र वदमिनडः स्तव्ययकृते रुहं यंत्रौघं प्रकटयितुमाज्ञापयति च ॥ ६ ॥ यंत्रावलीरचयतः शि
वतोऽपि लोकानुग्राहको यमधिकः प्रकटीकरिष्यन् उर्वीधसारकलितानहि सेष्टसिद्ध्यै नो चित्रमत्र हरिरेषनृपालवेषः ७
श्रीमन्मल्लेवंम्मधराहृरेजातयाद्विजः प्रेमनिधिस्तु कश्चित् ॥ यंत्रावली श्रीशिवताण्डवीयां करोतिवालेरपि लभ्यसाराम् प्रतिबिं

शृ: १

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विनमखिलमपि यंत्रावल्या महासारम् यस्मिन्महादर्शः सोरंजयतु सद्गीरात् ९ अथ जगद्देवदुःखपंकनिमग्नमुद्दिधीर्षुः परम
कारुणिको भगवान्सदाशिवस्तत्कामनासिद्धिकामनया शिवतांडवाख्ये तंत्रविशेषे कमप्ययंत्रगणमुपदिष्टवान् तत्र
उरूहनमपदानि कतिचन यद्यपि चोधरिनीलकंठप्रभृतिसूरिभिर्व्याख्यातान्येव तथापि तावता उवबोधनरयंत्रावलीसारं
नाल्पज्ञानां हृदयसरणिमारोढुमर्हतीति श्रीमहाराजाधिराजश्रीमल्लेवम्मदेवैराज्ञप्तः श्रीकाशीपुरनिवासी कूर्माचलाधिष्ठित
कुलपरंपरागतः पंथोपनामकः प्रेमनिधिनामा कश्चिद्द्विजः पुनरंकावलीं विशदीकरोति   ननु नंतं चे शास्त्रस्य सर्वस्यैव त
प्रामाण्यमुररीकुर्मः केयं कथा शिवतांडवस्य अन्यथा तंत्रोक्तानां मदिरां पिबेत् पशुपंक्तमदनावासं परस्त्रीणां विशेषत इत्यादिव
चनानामपि शिष्टसंग्राह्यत्वापत्तिः। अत एव वस्तुतः संहितायां। श्रुतिरपि मनुजानां वर्णधर्मं बभाषे परगुरुरखिलेशः प्राह तं
त्रेषु तद्वत् श्रुतिपथगलितानां वर्णधर्मप्रणाशैः श्रुतिपथनिरतानां नैव तत्सेवनीयमितीति चेन्न सर्वसिद्धिसर्वतत्ताकश्री
भगवदुच्चरितत्वाद्वेदवद्देवतंत्राणामपि स्वतएव प्रामाण्यं न तु स्मृतीनामिव श्रुतिमूलकतया वाममार्गप्रतिपादकं तु तंत्रं शेष
नेनाभिचरन् यजेतेत्यादिवेदवद्देवतत्कामनाराग्रोत्कर्षेण न हिंस्यात्सर्वाणिभूतानीति वेदांतर प्रतिषिद्धहिंसादिप्रभवतनतरक
दुःखावधपुरुषपरतया नेयम् यत्तु स्वतः प्रमाणाम्भूतेन वेदेन वेदेन तु निसन्नम अन्यानि यानि शास्त्राणि विरुद्धानि महामुने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

नास्त्येवभ्रष्टयाजकाः परिभ्रष्टाद्विजातयः आचरंतिमहापापान्दृष्टगांनेसत्युपस्थिते इतिलिंगपुराणवचनात्तंत्रशास्त्रमखिलमेवाप्र
माणमितिभट्टोजिदीक्षितैरुक्तंतन्नयुक्तं॥एवंतर्हिअथर्ववेदसिद्धानीतिस्मृतेरप्रमाणत्वापत्तेरप्यप्रामाण्यंकिमिति
नरोचयेः। अतोवासकलमीमांसकसिद्धप्रमाणानांकल्पितपरभागकस्यापिव्याकरणशास्त्रस्यप्रामाण्यमंगीकुर्वंतिसन्तः तस्मा
द्वेदविरुद्धस्यैवभागस्याप्रामाण्यंशिष्टानुष्ठेयत्वलक्षणंवा ३ प्रामाण्यं इतरत्सकलोपिभागः प्रमाणंशिष्टानुष्ठेयार्थकथ
अतएव अन्यानीतिसामान्यपदमपहायस्वतःप्रमाणभूतेनेत्यादिविशेषणोपात्तंसर्वस्यैवतंत्रशास्त्रस्याप्रामाण्यमुप
गच्छतत्कृतवमतेनविशेषणमव्यावर्तकमेवमन्यतेतुनादिनरभागस्यप्रमाणतयातस्माफलमव्याहतमेव अधिकंत्व
स्मत्कृतभक्तितरंगिण्यामनुसंधेयं ननुपुराणन्यायमीमांसाधर्मशास्त्रांगमिश्रिताः वेदाःस्थानानिविद्यानांधर्मस्यचचतु
र्दशेतिसंगृहीतपुराणादिष्वनंतर्भावतःकथमस्यतंत्रशास्त्रस्यधर्मप्रतिपादकत्वं नचेदंपरिगणनमुपलक्षणं [illegible]
परिगणनस्तत्त्वविरोधापत्तेरितिचेन्न पुराणेष्वंतर्भावस्यप्रामाणिकैःकृतत्वात् नचैतावतापिपरतंत्रप्रतीक्षयाप्रामा
ण्यम् ईश्वरोक्तत्वस्यतथाप्यनपायादितिसंक्षेपः॥ ॥वक्ष्यमाणयंत्राणिचसाधितान्येवसाधकाभीष्टानिजाउभावयंति
नासाधितान्यपि तत्साधनंचतत्तद्यंत्रदेवतायामंत्रंदशसहस्रवारंजप्त्वासहस्रवारंहोमंपायसादिभिःकृत्वातत्तदशांशेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तर्पणमार्जनब्राह्मणभोजनानां तत्कर्मनिर्वर्त्य वक्ष्यमाणसंख्यया तत्तत्साधनीययंत्राणि पुनः पुनर्लिखित्वा लेख-क्रमेणैव संमार्ज्य संपद्यते
यदुक्तं मूलस्य चतुर्दशपटले आदौ संस्थाप्य देवं जपनं हवनं बलिं संस्मरन्देवतां मंत्रं यंत्राणां लेखनं चरेत् यावती कोष्ठके संख्या त
त्र तु गुणनं चरेत् कोष्ठे कोष्ठे द्विगुणितानां संख्यां कृत्वा तु साधकः तावत्संख्यं लिखेद्यंत्रं पुरश्चरणं निगद्यते स्वकामपुष्पैः संपूज्य साधको
जपतत्परः एकैकवारमावर्त्य मंत्रं यंत्रं स्मरेद्बुधः इत्थं जपादिभिः सिद्धे नासाध्यं विद्यते भुवि इति तदेवं साधनीयतत्तद्यंत्रदेवतां
वक्ष्यमाणा बलिमित्युत्तरं कृत्वेति शेषः इति नीलकंठः चरेदित्यनुषंगः कृप्यते अक्षतस्यानुसंधानरूपाध्याहारापरपर्यायशे
षमपेक्ष्य कृतस्य स्थानांतरेऽनुसंधानरूपस्यानुषंगस्यैव लघीयस्त्वात् पुरश्चरणसंख्या तु नवकोष्ठकेषु यंत्रेषु दशाधिका द्विशती
षोडशकोष्ठकेषु द्विपंचाशदधिकत्रिशतोत्तरचतुःसहस्ररूपा एकत्र्यादिकोष्ठेषु स्थितानामेकत्र्यादिसंख्यानां द्विचतुरादिरूपवैगु
णपवर्तीं कृत्वा नवकोष्ठगतानां सर्वामपि संख्यां मेलयित्वा संहत्त्यां नवतिसंख्यां नवकोष्ठकयंत्रीयकोष्ठगतनवसंख्यया गुणयेत्
ततः पूर्वोक्तसंख्यालाभः षोडशकोष्ठकेषु तथाविधाने संहत्त्यां द्विसप्तत्युत्तरद्विशतसंख्यां कोष्ठगतषोडशसंख्यया गुणयित्वा क
थितसंख्यालाभः स्वकामपुष्पैः स्वीयकामनाविषयशांत्यादिरूपकर्मसमानाकारैर्नवर्णादिपुष्पैः एकैकस्मिन्यंत्रे चिकीर्षितस्य
एकैकवारं मंत्रं समुच्चार्य यंत्रं लिखेत् जपादिभिरित्यादिना पूर्वोक्तहोमप्रभृतियंत्रलेखनतत्पूजांतपदार्थसार्थपरिग्रहः॥ जपसं

मन्त्रादर्श
२

ख्यायांतु यंत्राणां लेखने देवि दिक्क हस्तं मनुं जपेदिति पंचमपटलीयैतन्मूलवचनमेव प्रमाणम् मंत्राश्चामी श्रीगुरुप्रसादप्राप्ताए
वोपयुज्यंते नेतरेपि यथोक्तगुरोरलाभे तु श्रीदक्षिणामूर्त्तिमेव गुरुं कृत्वा वक्ष्यमाणा यंत्रमंत्रा स्वीकरणीयाः तत्प्रकारस्तु श्री
दक्षिणामूर्त्तिं पंचोपचारादिभिः संपूज्य पायसं च नैवेद्यं कृत्वाद्याद्य मंत्रं ताडपत्रे लिखित्वा श्रीदक्षिणामूर्त्तिमेव गुरुं तया संचिं
त्य स्वदक्षिणाकर्णे समुपदिशतीति स्मृत्वा शतवारं मंत्रमावर्त्तयेत् ततो यथाशक्ति दक्षिणां श्रीशिवरूपिणे गुरवे दद्यादिति
तत्प्रमाणं तु प्रदर्शितमेव भक्तितरंगिण्यां मंत्राश्च तांत्रिका एव तदलाभे ॐ त्रिं त्रिपुरायै नमः ॐ शिं शिखिपिच्छायै नमः इ
त्यादिरीत्या प्रणवसबिंदुकस्वनामाद्यक्षरस्वनामधेयचतुर्थी नमः पदांतास्तेतु संधेयाः केचित्तु ॐ तं त्रिपुरायै नमः ॐ शं शि
पिच्छायै नमः ॐ तं त्वरितायै नमः इत्यादिरीत्यैव नाममंत्रोद्धारमिच्छंति तथा च श्रीगुरुचरणकरुणाधिगतमंत्रकः साधक
: पुरश्चरणोक्तदिशा विधिपूर्वकं दशसहस्रसंख्यया तत्तद्वक्ष्यमाणयंत्रदेवतामंत्रं जप्त्वा होमतर्पणमार्जनब्राह्मणभोज
नांतं कर्म निर्वर्त्य बलिं च पायसादिभिर्दत्वा यंत्रस्य देवतां मंत्रं च स्मरन् एव यथोक्तसंख्यया यंत्राणि विलिख्य स्वकाम्यकर्म
समानाकारपुष्पैस्तु यंत्रमभ्यर्चयेत् तदुत्तरं यंत्रमपि संसिद्धभावमासादयद्धारणादियोग्यं भवतीति निर्गलितार्थः वक्ष्य
माणयंत्राणां तत्तद्धारणाधारपात्रद्रव्यलेखनीरंगप्रयुज्यमानानि स्वविधिबलादेव यत्किंचिदाधारादिकमाक्षिपंति यत्तेन

गुरुः
२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नियागविधिरिव यत्किंचिदुक्तं तत्र च कामनाभेदेन नियमं व्रीहिभिर्यजेतेति तद्वन्नियमविधिरिव दर्शयति ॥ अथ वक्ष्यामि देवेशी
त्यादिना वक्ष्यामीति प्रतिज्ञया सावधानचित्तता विषयान्तरसंचाराभावः चेतसः तात्स्वरूपाकार्ये उक्तं संबोधनेन च परेषां श्रोतॄणाम
सावधानत्वेपि वक्ष्यमाणवाक्यजन्यबोधाश्रयतयोद्देश्यत्वरूपसंबोधनत्वस्य त्वय्येव सत्त्वान्न कापि क्षतिरिति सूचितम् एताव
ता च समाहितचित्ताये वेदस्य उपदेश्यं न सर्वस्मै इति ध्वनितम् यन्नेत्यनेन गोप्यतमत्वं कस्यचिदित्यनेन तु सर्वापेक्षयात्वमेव

श्रीगणाधिपतये नमः दक्षिणामूर्तिरुवाच अथ वक्ष्यामि देवेशि परमानन्दकारणं यन्न कस्यचिदाख्यातं तत्ते वक्ष्या
मि सांप्रतम् १ एकाग्रचैकमना कान्ते मन्त्रमार्गगामिनि नववर्णपरिज्ञानं एकचक्रं यथा तथा २

विश्वासपात्रमसीत्युक्तम् तेन चात्यंतविश्वासपात्राये वेदमुपदेश्यं नाखिलायापीति ध्वनितम् तेऽत्यंतं रहस्यभाजनीभूतां प्र
ति सांप्रतं न तु एवं त्वं प्रागित्युक्तम् एतेन पूर्वार्थतापनकरणे न वक्ष्यमाणार्थग्रहणे उत्कण्ठातिशयकारिणः वक्ष्यामि वक्ष्यामी
ति द्विरुक्त्या कथमप्यप्रकटनीयस्याप्यर्थस्य त्वदनुरोधमात्रेणाविष्कं प्रकाशनतया संपन्नविहरतासूचिता अतिशयेन लोकोप
कारकमिदमुच्यत इत्यौत्सुक्यं च त्वयि नुं वा द्विरुक्तिः परमानन्दकारणं वक्ष्यामीति भिन्ना प्रतिज्ञा यन्न कस्यचिदाख्यातं तत्ते वक्ष्या
मीति तु प्रतिज्ञान्तरमिति तु कश्चित् एकमनाश्रवणाधारणमात्रतत्परा कान्ते इति संबोधनं अथवा कान्ते रमणीये अतएव तनुपेक्ष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णीये वक्ष्यमाणार्थे एकमना इत्यन्वयः यद्वा कांते स्वप्रिये एकमना इत्यर्थः एतेन स्वधर्मनिरतत्वेन तत्त्वोपदेशपत्वं ध्वनिता सत्युक्तिन स्वधर्मैका
यतेयमुपदेशपात्रमिति ध्वनितं मत्तमातंगेत्यादिना स्त्रीयगतिविशेषेणोवस्वाधीनीकृतोस्मि तत्रापि इतरांगेष्वपि रमणीयतया कांतत्वम्
तत्रापि च देवेशीत्वं ममापि देवत्वाविशेषात् अतः सर्वथैवावक्तव्यमपि वस्तुमेवापतितमिति सूचितम् तथानि अपूर्वाणि वक्ष्यमाणायंग्रा
न्मकवत्त्वमिति पांडव पृथक् पार्थकेन परिज्ञानं येन एवं भूतं परमात्मतस्य वक्ताप्यर्थमस्तु अजन्मनोपि कुवेरसंपन्नापार्थ
यणारूपस्य कारणांसाधकमेवंभूतं च यद्वक्ष्यमाणवाक्यार्थरूपं कर्म तद्दूरस्थमिति निर्गलितार्थयंत्राणामेव जिज्ञास्यमनया किमर्थम
र्थमप्रकृतं तत्स्वात्रादिनिरूपणमिति शंकानिरासार्थं तत्त्ववक्तृत्वादि पार्थकेन तत्त्वज्ञानमात्रप्रयोजनकं वइपार्थे भूर्जपत्रे तु मोह
नेरूप्यपत्रके इत्यादिकं प्रत्यर्थम् आधारपात्राकांक्षायाः सामान्यतः पात्रमात्रत्वाभावे वोपन्नामंसंभवादिति शंकापरिहार
यपरमेत्यादि तथा च पार्थकेन तत्स्नानादेवस्वसमोहितपुरुषार्थसिद्धिर्नान्यथेति भावः वक्तृत्वं तत्त्ववक्तृपरिज्ञानमि
सत्त्रनवऊर्ध्वीहि: किंतु पश्वी तत्तु रूपस्य वत थाच यथा तादृशपरिज्ञानं तथा वक्ष्यामीत्यन्वयः नत्वन त्वानित्यानि अपूर्वा
णि वा यानि यंत्ररूपवक्तृ[illegible]परिज्ञानं येन तत्कृणविन्यन्वय इति नीलकंठग्रंथविरोध इति वाच्यं तावतापि क्षतिविरहात् य
था तथा पदयोस्तत्त्वमनेस्वारस्यात्सभवात् यदि च यथा तथेत्यं तस्यैव विवरणं मया कृतं ननु वऊर्ध्वीहाव पितान्पर्यमिति ब्रूषे तदा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्माकमपि नन्विदं घटनीतिदिक् २ वक्ष्यमाणयन्त्रेषु यानि यन्त्राणि राजादिवश्यताप्रसाधकानि तानि भूर्जपत्रे लेख्यानि यानि च चतुःकोष्ठाभिधप्र
भृतीनि यन्त्राणि सर्वकार्यकराणि तान्यपि वश्यकामनायां भूर्जपत्रे मोहने रौप्यपत्रे मारणे लोहपत्रे लेख्यानि एवमन्यकामनास्वन्यपत्राणि व
क्ष्यमाणरीत्या स्वयमूह्यानि एवमग्रेऽपि योजनीयम् यद्यपि मोहनमपि वश्यकमेव अन्यथा शान्त्यादितोऽस्य बहिर्भूततापत्तिः नचेष्टापत्ति

शिंशपापत्रे १ जम्बुकापत्रे १ कंकपत्रे १ रुकपित्तपत्रे १

वश्यार्थे भूर्जपत्रे तु मोहने रौप्यपत्रके मारणे लोहपत्रं तु स्तम्भने पैत्तलं मतं ३ विद्वेषे तु श्मशानस्य चीवरं समुदाहृतम् आक
र्षणे सामजं प्रोक्तं रक्षार्थे ब्रह्मवृक्षजं ४ पुत्रार्थे पैत्तले पत्रे भार्यार्थे तु तमालजे देशार्थे भूर्जपत्रे भोगार्थे वटवृक्षजे ५ मो
क्षार्थे ताडपत्रे तु शान्त्यर्थे तु मधूकजे कामार्थे कांस्यपात्रे तु भक्ष्यार्थे कदलीदले ६ ताम्रे जगत्सदा वश्यं पात्रे पर्वतचालनं ताड
ने शिंशिकापत्रे सर्वाभावे तु विल्वजे ७

षट्कर्मणीति वक्ष्यमाणस्थलोपदर्शितविभागव्याघातापत्तेः तथापि मोहनरूपवश्यक
र्मणि तु भूर्जपत्रं नादेयं किन्तु रौप्यमयं तदुपादेयं एवं राज्यप्रद्वादिप्राप्तिरूपवश्यकर्मणि विशेषवचनात्तत्त्वादेयमिति तात्पर्यम्
न च ताम्रे जगत्सदा वश्यमित्यस्य कागतिरिति वाच्यं सदायावज्जीवं वश्यतायास्ताम्रपात्रफलत्वात् यद्वा वश्यकामनायां भूर्जपत्रता
म्रपत्रयोर्विकल्पः पर्वतचालनं पर्वतवत्स्थिराणां प्रतिमानां चालनं तु ताम्रपत्रस्यासाधारणं फलं मारणं हि मारणोद्देश्यत्वे सति प्राणा
पहारानुकूलव्यापारः ताडनं तु शरीरदुःखानुकूलो व्यापारः दण्डाद्यभिघातः इत्यनयोर्भेदात्तयोर्न पौनरुक्त्यम् सर्वाभावे उक्ततत्तत्कामनाकरतत्तत्पात्राणा

मन्त्रार्ण
५

अत्रलेखनद्रव्यं यैश्चालिखनसाधनीभूतं द्रव्यं तच्च त्रिविधं तत्र पात्ररूपं तद्द्रव्यं उक्त्वा अन्यविधं तद्द्रव्यमुपदिशति अथचेत्यादि करेउन्मा
रणोच्चाटनद्वेषणस्तंभनकर्मसु: अष्टविषाणि चेति चकाराद् उक्ताष्टगंधस्यापि संग्रहः तेनस्तंभकर्मस्वष्टगंधैरेव विशेषोक्तोऽन्यस
हितैस्तैरेवलिखनम् करेभ्युनकेवलं विषमात्रमादेयम् किंत्वष्टगंधयुक्तं तदिति फलितार्थः स्पष्टीभविष्यति चेदं मूलविद्रावणायं
त्रेमूलस्थ सर्वत्र न विशेषणाद्रव्यमष्टगंधसंयुक्तमेव ग्राह्यमिति नीलकंठोपि तत्रस्यच्चमुक्तवान् अष्टविषाण्युपदर्शयति लवणेत्या

अथचान्यप्रकारेणलेखनद्रव्यमुच्यते चन्दनागरुकर्पूरकस्तूरीरोचनान्विता ८ मदः करिभवोलाक्षारस्कुंकुमसंभवः य
त्रलेखनद्रव्याणि करेष्वष्टविषाणि च ९ लवणोषणामेहांगुग्गुल्वमाक्षिसंयुतः श्मशानांगारनिंबोत्थनिर्यासो विषमीरितम् ०

दिना लवणं सैंधवं निरुपपदस्य लवणपदस्य वैद्यके प्रयोगादिति नीलकंठः अक्षारलवणाः सर्वे इति धर्मशास्त्रादावक्षारपदंमर्थं
स्यात् तवमतेक्षारपदस्याव्यावर्त्तकत्वादतो लवणपदं लवणसामान्यपरमेवेति तु मम प्रतिभाति उषणं च उषणं चेत्येकशेषः अ
तः पिप्पलीमरिचयोर्ग्रहणम् नातो विषेष्वष्टसंख्याव्याघातः। उषणापिप्पली शौंडीत्यमरः मरीचं कोलकं कृष्णमूषणं धर्म
पत्तनमिति च मूषणपदे तु तिस्तृणामूषणानांसमाहार इति न तु व्युत्पत्तिः येनत्र्युंषा अपि ग्रहणप्रशक्त्या त्वष्टसंख्याव्याघातः
प्रसज्येतः शुंठ्याः कच्चिदपि तत्पदेनानभिधानात् किंतु रूपैवच शुंठीपिप्पलीमरीचानां ग्राहकमेतदिति तत्व मेहांगुभिरित्यादिक्षारेण

गुरुः
५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथोक्तद्रव्यैरुक्तपत्रेषु लिखितं यन्त्रं कुत्राधिकरणेऽस्थापयित्वा साधकेन स्वीयकण्ठदोर्धारणीयमित्याकांक्षायामाह त्रिलोहमित्यादि स्वर्णरूप्यताम्ररूपं त्रिलोहमत्रैकैकशः समुद्रितं वोपादेयम् क्षौमं तु मा अतसीतन्तुजं वस्त्रं तथा च पूर्वोक्तपत्रेषु पूर्वोक्तद्रव्येणालिखितं यन्त्रं त्रिलोहे प्रक्षिप्य भूर्जपत्रेण वस्त्रक्षौमादिना वा बध्वा करणदोषार्थमिति भावः एतेन तत्तत्कामनाभेदाद्यन्त्राधिकरणानां धरणार्थे भूर्जपत्रेत्यादिना पूर्वमेवोक्ततया तेषां पुनरभिधानाकांक्षिताभिधानं स्यात् भूर्जपत्रेति पुनरुक्तं च स्यादिति परास्तं तत्तत्कल्पोदिताभावे त्रिलोहादिकं यन्त्राधिकरणत्वेनादेयम् यत्र तु तत्तत्कल्पे विशेषतः किंचिदुक्तं स्याद्यथा वक्ष्यमाणासिद्धयन्त्रे सुडि

त्रिलोहं भूर्जपत्राणि क्षौमं तालदलानि च तत्तत्कल्पोदितानि स्युर्यन्त्राधिकरणानि च ११ भूमिस्पृष्टं शवस्पृष्टं दग्धं नि
र्माल्यसंगतं विशीर्णं लंघितं यन्त्रं यत्नवान्नैव धारयेत् १२

(कान तत्र तु तदेवाधिकरणं तया स्वीकार्यं न तु त्रिलोहान्तरादिकमित्यभिप्रेत्याह तत्तत्कल्पेत्यादि चरमपठितस्य चकारस्य तत्तत्कल्पोदितानीत्यनन्तरमन्वयः ११ किमिदं यन्त्रं यावज्जीवं धार्यमित्याह भूमीत्यादिना तथा चैतद्दोषानाकलन एव यावज्जीवधार्यं दोषपरिस्फुरणे तु त्याज्यमेवेदं यन्त्रमिति भावः भूमिस्पृष्टत्वं च यन्त्रस्य भूर्जपत्रादौ लिखितस्य तस्याधिष्ठानं तु यन्त्राधारभूतत्रिलोहादेः दग्धं यन्त्रस्वरूपस्याक्षरावर्णरेखात्मकस्थानपायेऽपि तदाधारभूतभूर्जपत्रादेरेकदेशे दग्धे यथाक्तते यन्त्रस्य दग्धत्वेन यन्त्रस्वरूपस्यैवाभावात् धारणस्याप्रशक्तेर्निषेधो वैयर्थ्यप्रसंगात् निर्माल्यं स्वेष्टदेव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मन्त्राद
९

नाशेऽअर्पितंस्तवकच्चंदनाक्षतपुष्पादिनेनसंगतंमिलितंयद्यंत्रंतदपिनादेयंविशीर्णजीर्णतरं यंत्रवान्यंत्रधारणातःफलंस्व
मीहमानःस्वकारेणोदृशनिषेधातिक्रमोनानुष्ठेयःइतिसूचितं अत्रनिषेधातिक्रमेप्रत्यवायोत्पत्तौमानाभावात्समीहितका
र्यस्यालाभएवनिषेधातिक्रमस्यफलंकल्पनीयं अतएवयंत्रवानितिपूर्वोक्तार्थकत्तुपात्तम् प्रत्यवायस्यविवक्षितत्वेनधारये
दित्येवोक्तंस्यात् कर्तृपदंचसाधकस्यादिरूपंधारयेदित्यादिपदेनैवाक्षिप्यते नवापिमतेविशेष्यपदमाक्षेप्यमेवेतिसं

लेखन्यानुलिखेद्यंत्रंवश्येदूर्वांकुरोत्थया आकृष्टेनुकरंजोत्थामारणेपिनरास्थिजा १३ स्तंभकर्मणिविज्ञेयाराजहं पृ
क्षोद्भवातथा शांतिकेपौष्टिकेचैवआयुःकामान्वितेतथा १४ सर्वोपशमनेचैवकर्त्तव्याजातिसंभवा हेमजारौ तु
प्यजावापिताम्रजात्रपुलोहजा १५ अपामार्गोद्भवावापिशुभकर्मणिसिद्धिदा अशुभेषुचकार्येषुशस्यतेतीक्ष्णा तु

क्षेपः १२ अथतृतीयंयंत्रलेखनसाधनद्रव्यमुपदिशति लेखन्येत्यादिना सर्वोपशमनेसर्वेषामुपद्रवाणांउच्छेदे चिकी
र्षितेसतीतिशेषः शांतिपदंचोपद्रवस्यानुत्पादपरमत्रविवक्षितमित्यतोनपौनरुक्त्यम् अनुकथनप्राप्त्यादिरूपशुभकर्मसु
लेखनीहेमजेत्यादिनोक्तावश्येदूर्वांकुरोत्थयेत्यादिनाशुभकर्मसुनिर्दिष्टलेखन्यभिप्रायोग्रंथइतितुन्यायः। चतुरंगरंगवंगमि
तुपक्रम्यशातंत्रपुकमालिनमित्यभिधानात्शुभकर्मणिशांतिवश्याद्यातरकर्मणिअशुभेषुस्तंभनविद्वेषणोच्चाटनमारणो

गुरुः
९

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुत्तीक्ष्णलोहं गजवेतोनिभा यथा प्रसिद्धं विध्वंगारदिने भद्रारूपकरणविशेषकरणान्वितभौमवासरे अत्रायंभावः तीक्ष्णलोहे न यदा
कदाचिन्निर्मितापि लेखनी क्रूरकर्माणि साधयितुं प्रभवति यदि तु भद्रादिषु सा तु स्त्रीयेत तदा शत्रुनाशकर्मणि असाधारणी स्यादिति
केचित्तु यदि भद्रा भौमयोः मा तु स्त्रीयेत तदैव क्रूरकर्मसु सा नियोज्या नान्यथेत्याशयमाहुः सौम्यकर्मणि त्वत्र विशेषणोनुक्तऽवऽवके
इति शेषः किं न्योवा १२ शत्रुनाशेऽधिकरणान्तरं लेखन्यंतरं चाह श्ववस्त्रेत्यादिना पूर्वोक्ततीक्ष्णलोहजातु लेखनी मारणे लोहपत्रेति

विध्वंगारदिने घोरे यदि सौन्यादिता भवेत् कालदण्डसमा शेषा सर्वशत्रुनिकृन्तनी १७ सौम्यकर्मणि सर्वत्र लिखेत् स्वर्णादिना हित
न् श्ववस्त्रचितांगारे शत्रुनाशार्थमालिखेत् १८ नागेंद्रमदयुक्तेन तथा वश्ये तु रेचना विपचित्रकयुक्तेन चितांगारसमन्वि
ता १९ मारणोच्चाटनादीनि क्षुद्रकर्माणि साधयेत् अथवान्यप्रकारेण लेखनं द्रव्यमुच्यते २०

(मनेनोक्तपत्रेयदा मारणाद्यु
द्दिश्य यंत्रलेखनं विवक्षितं तदा तु संधेया श्ववस्त्रेचितांगारैर्यंत्रलेखनं पक्षे स्फुलोहपत्रे तीक्ष्णलोहलेखन्या अष्टविधद्रव्येण लेखनं प
क्षेण सह विकल्पेनैव व्यवस्थित इति तत्त्वम् यथा चौरादिनाशेन मारणरूपे लोहपत्रादिकं मादेयं शत्रुमारणे तु श्ववस्त्रादिकमेवेति
व्यवस्थेति ध्येयं यत्तु अरिनाशार्थं तीक्ष्णलोहजेति संबंध इति नीलकंठेनोक्तम् तत्तु तदसमंजसं द्रागव्यापत्तेः अंगारैरेव लेखनी कार्यस्य ह
ननया तेरा कांक्षाच तस्मादुपदर्शितदिशैव व्याख्यानमनुसरणीयं पूर्वं मष्टगंधगणानमात्रं कृतं सांप्रतं कामनाभेदेन तत्परदिशति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नागेंद्रेत्यादिना विषं वत्सनाभः चित्रक अनेनैव नाम्ना प्रसिद्धः आभ्यां युक्तेन चिंतांगारेण मषीकृतेन समन्विता पूर्वोपस्थिता रोचनेति संबं
धः वत्सनत्क विष चित्रक युगिति पदच्छेदः नेनेति प्रकरणोपस्थित यंत्रपरं तथा च विष पत्राभ्यां चिंतागारेण युक्ताया रोचनाया साकर्त्रीस्व
निष्पाद्य यंत्रेण करणेन मारणादीनि कर्माणि साधयेदित्येवान्वयः॥ नातः समासमध्यस्य चिंतांगारपदार्थेन सहन्तनीयां तार्थान्वयेन प्रस
विशेषणानां वृत्तिर्न वृत्तस्य विशेषणायोगो नेति नियमभंगस्यापत्तिः। न वा सार्द्धश्लोकेन व्यवहितोपस्थितिकायाले खन्याः पुनरनुसंधाना
पत्त्यायं थसौरस्य भंगापत्तिः न चैवं विषं वत्सनाभः चित्रक इति प्रसिद्धस्तद्युक्तेन चिंतांगारेण समन्वितामस्त्वीम्द तेन युक्ता पूर्वोक्ता लेखनी
मारणादीनि साधयेदिति नीलकंठग्रंथविरोधः स्पष्ट एवा पद्येतेति वाच्यम् तावतापि विकल्पाभिप्रायकत्वात् वत्सनत्क विष पद मत्राष्ट
विषपरमेवा चित्रक चितांगारयोरन्याष्टविषांतर्भूतयोरपि पुनरुपादानं सकलापरविषालाभेप्येतयोरावश्यकत्वसूचनाय तथा च
सकलाभीष्टविषयुक्तारोचना तदलाभे यत्किंचिदपरविषचित्रक चित्रक चितांगारैश्च गृहीत्वा संयुक्तारोचना क्रूरकर्मसु प्रशस्तेव तन्मयोपादे
येत्युक्तं भवति न चैवमष्टविषानुकल्पत्वेन चित्रकादिकं तन्त्रे वक्तोनोक्तमिति वाच्यं तावतापि गोरोचनाया अलाभप्रसंगात् अस्याश्च
पादाने तु गौरवम् इह तु वश्यार्थमवश्योपादेयतया सकृदुपादानेनैव कार्यद्वयसिद्धिरिति महालाघवमिति परमरहस्यम् सौम्यकर्म ‍ गुरुः ८
णि रोचनादेः क्रूरकर्मणि विषादैर्लेखनं ज्ञप्तानुपदिश्य पदे वैकल्पिकव्यवस्थापकं पक्षांतरमुपदर्शयति अथ वेत्यादिना शांत्यादिकर्मत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

येराकमतःश्वेनरक्तपीतवर्णेनसमानाकारमेवषडिकागैरिकहरिद्रात्मकलखनद्रव्यमुपदिष्टम् निशायाहरिद्रया वश्यविशेषेतुरा
ज्यप्राप्तिपुत्रप्राप्तिमोहनात्मककर्माणिक्रमेणश्रीखण्डेन गोरोचनकुंकुमाभ्यां गंधकेनचयंत्रं लिखनीयम् शांतिविशेषेनियममा
दर्शयति इंगालेनेति शापेपरोत्सृष्टानिष्टनिष्पादकवचनेव्यर्थतामासादनीयेसतीतिशेषः॥किंवास्वमुखान्निर्गलितपरानिष्टसं
पादकवचनस्यशापस्ययाथार्थ्यनिर्मितावनुष्ठीयमानायांसत्यांइतिशापेइत्यस्यतात्पर्यार्थः यद्वा सततंयआगतःशापःआसमंतात्प्रत्यु प

शांतिकेखडिकाप्रोक्तावश्येचैवतुगैरिका स्तंभनेनिशयालेख्यंविद्वेषेविषवारिणा २१ उच्चाटेपारदेनैवमारणेरुधिरेणच
राज्यप्राप्तौचंदनेनपुत्रप्राप्तौसदालिखेत् २२ रोचनाकुंकुमेनैवमोहनेगंधकेनतु इंगालेनसदालेख्यंबालग्रहविना
शने २३ हिंगुलेनसदाशापेलेखनीयंसुरेश्वरि इदानींभूवलंयंत्रंप्रवक्ष्यामिभयापहम् चतुरस्रंसमालेख्यंभूमौ

स्थितःशापइत्यर्थः सततामित्यनेनदुर्निवार्यत्वंशापस्यध्वनितं आइत्यनेनतत्कालांतरेभयमस्यशापस्यकिंतुतत्कालस्थैवोपस्थि
तंभयंइतिसर्वथायंत्रमेतदुपास्यमितिकथितम् अथवा अशापइतिनञःप्रश्लेषः तथाचशापस्यपरोत्सृष्टस्याभावेतुत्पात
रूपेचिकीर्षितेसतीत्यर्थः यद्यपिशापयंत्रंनात्राद्येप्रतिपादितंस्यात्तत्रेणतथापिसर्वकामप्रदयंत्रेषुतदभावमितितत्रासामंज
स्यं सुरेश्वरीतिपुनःसंबोधनंतुकालभैरवादिनाप्यद्यतामाभूदित्येतदर्थम् भूचक्रेणापिनेत्ययेतनवचनेनान्वयव्यतिरेकाभ्यां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ग्राकुं चिताभ्यां शूलाभ्यां मुमध्ये त्रिशूलवान् सारुर्मध्ये गतो वज्रः सोयं वज्रधरोयुवेति रुद्रयामले वज्रलक्षणं २

वक्ष्यमाणयंत्रप्रयोगस्मिद्धिं प्रतिव्यवस्थापितकारणानां कं भूवलयचक्रमुद्धरति इदानीमित्यादिना प्रतिज्ञाया फलमुपदर्शितमेवं
वंवंग्रं च परस्परमिलितत्रिवघ्यकसमानाकाररेखाद्वंद्वं देशिक इत्यनेन चतुरस्त्रीयरेखासंपन्नं बहिर्दिक्षु च तल्लखनादभि
नत्वमुपदर्शितं मध्ये चतुरस्त्रस्य मध्ये सांतं हकारं षांतयुतं सकाररेखासंयुक्तं भुवनस्वरेणाच तुर्दशस्वरेणासंयुक्तं चक्रं त्वालिखे

वज्राष्टकं चतुर्दिक्षु देशिको विलिखेत्प्रिये मध्ये सांतं षांतयुतं भुवनस्वरसंयुतं २५ नादविंदुकलाक्रांतं सविस
र्गं समालिखेत् पृथ्वीवीजं चाष्टदिक्षु मध्यवीजस्य पार्श्वतः २६ सांतं षांतं स्वरं चोत्केशांतं स्याच्च विसर्गयुक्
षांतं त्रयोदशोपेतं सांतं सानुस्वरं वदेत् २७ लिखित्वा मातृकावर्णैः परिवेष्ट्य समंततः ओमिदं शक्तिसहितं ५
भुवनस्वरसंयुतं २८ वीजैः संवेष्ट्य सन्मंत्री भौमाकारं तथोपरि भूचक्रं तु विनिर्माय प्राणान्संस्थापयेत्ततः

दित्यन्वयः पृथ्वीवीजं लं वीजं अष्टदिक्षित्यत्र पार्श्वत इत्यत्र चावधित्वं मध्यवीजस्यैव विवक्षितं संवंधत्वेनावधित्वस्यावि
वक्षणात्तु नपंचमी प्रशक्तिः यत्तु नीलकंठेन केचिदित्यादिना अनुलोमविलोमाज्ञपायाः सांतं षांतं इत्यादिना वक्ष्यमा
णायाश्चतुर्दिक्षु लखनमत्रमुपदर्शितं तन्नु प्रकृतेन पद्धक्तनयानोपन्यस्तमुचितं सांतं हकारं स्वरं प्रथमोपस्थितत

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

याकारंउन्काइशांनं अनुस्वारंतंचवदेदित्यन्वयः षांनंसकारंस्वरंहर्ववदकारंचोन्काविसर्गयुक्तविसर्गांतंवदेदित्यन्वयः तेनहंसइतिद्य
क्षरोजपामंत्रउद्धृतोभवति अत्रस्वरमित्युपादानादेवंज्ञायतेयदन्यत्रस्वरानुस्वारस्थलेकेवलंमुखकरणोच्चारणार्थस्वरमंतर्भावनंतदु

गंधाद्यैः कुसुमनोमिश्चसिंदूररजसापिच अर्चयित्वाप्रयत्नेनमूलंमन्त्रशतंजपेत् ३० तदग्रेसर्वयंत्राणां
लिखनंसमुदाहृतं भूचक्रेणाविनादेवियंत्रसिद्धिर्नजायते ३१ भूचक्रेतुपरिज्ञातेज्ञातंसर्वंभवेत्प्रिये भू
चक्रंतुसमाख्यातंनदेयंपरशिष्यके ३२ दत्तेचसर्वहानिःस्यादित्याहतापरमेश्वरी भूचक्रंतुमयाप्रो
क्तंलिपिचक्रेभराफप्रिये ३३ गाधाग्निभूजलाकाशवर्णान्सम्यग्विभावयेत् अकारश्चथाकारएकारोथ
ककारकः ३४ चकारश्चटकारश्चतवर्गःस्यात्पवर्गकः यकारस्तपकारस्तवायुवर्णाउदाहृताः ३५
इकारैकारवर्णौतुरेकारश्चखवर्णकः छकारस्तठकारोथथकारःफार्णकःस्मृतः ३६ रकारश्चक्ष



र्णोच्चारणोपिस्वरस्यांकादिगणानानकर्तव्येति अन्यथाचापिस्वरमंतर्भाव्यैवपाठप्रसक्तौस्वरमितिव्यर्थंस्यात्
ओमहकारःशक्तिःसकारः भुवनस्वरऔकारःइदंचसर्वंपूर्वोक्तमेवानदितम् ओमाकारंवलयात्मकंइत्येतावत्तवशोविधेयः तदग्रेभूवलया
ग्रेस्नावतानकेवलंपूजामात्रंयंत्रपूर्वांगतयोक्तं किंतुयावयंत्रलेखंतत्समाप्यावश्यकीतिध्वनितंसर्वयंत्रलिखनविधानंसमाहारमितितो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

म०त्रा०९ पसंहारः अथैतनेन पौनरुक्त्यप्रसंगात् किंतु मया पूर्वं समाख्यातं यत्सूक्ष्मं तन्त्रदेयमित्येव विवासितम् वक्ष्यमाणलक्षणोपशांत्यादिकर्म

९ सु दिग्गस्थकेन सर्वे वर्णा लेख्याः नापि स्वेच्छया येकेचन किंतु भूवर्णादयो नियमिता उपदेश्या इति वक्तुं प्रथमं तत्तद्वर्णानुपदिशति भू

कारश्च वह्निवर्णा उदाहृताः उकारोकारवर्णौ च ओकारोथ गकारकः ३७ जकारश्च डकारश्च दकारोथ
बकारकः लकारश्च रकारश्च भूस्पर्णाः समुदाहृताः ३८ ऋकारोथ ॠकारश्च औकारश्च घवर्णकः॥
झकारकः ढकारकः धकारश्च ततः परं ३९ भकारोथ वकारश्च सकारश्च जलार्णकाः ऌकारश्च ॡका
रश्च अंकारस्तदनंतरं ४० ङकारोथ ञकारश्च णकारः परतः स्मृतः नकारोथ मकारश्च शकारश्च
हकारकः ४१ एते वर्णा वियत्संख्याः क्रमेण परिकीर्त्तिताः पृथ्वीवर्णाः शांतिके तु जलवर्णास्तु मोहने॥
४२ विद्वेषे च तथोच्चाटे वह्निवर्णाः प्रकीर्तिताः वश्ये तु वर्णा वायोः स्युर्नाभसाः सर्वकर्मसु ४३ मा
रणे तु स्तंभे शत्रुनाशनके परे डाकिनीशाकिनीभूतप्रेतवेतालभीषु च ४४ महामारीप्रशमन

वा	अ	भू	ज	आ
अ	इ	उ	ऋ	ऌ
आ	ई	ऊ	ॠ	ॡ
ए	ऐ	ओ	औ	अं
क	ख	ग	घ	ङ
च	छ	ज	झ	ञ
ट	ठ	ड	ढ	ण
त	थ	द	ध	न
प	फ	ब	भ	म
य	र	ल	व	श
ष	क्ष	ळ	स	ह

नि अकारश्चेत्यादिना सम्यक्विभावनस्थापितत्त्वकामना मुत्त्वतद्वर्णग्रहणमेव फलं सर्वकर्मसु वक्ष्यमाणाष्टवैकर्मसु तथा च ता गुरुः

श वर्णानां पार्थिवादिवर्णैः सह विकल्पेनोपादानं पर्यावस्यति ४३ शांतौ भूमिवर्णा इत्यादिकं तावत्सम्यगधिगंतुं शक्यते यावद्धांता ९

त्यादिस्वरूपं नावगम्यते ऽस्यतः सलक्षणानद्विभागमाह शांतीत्यादिना रसकर्माणि षट्कर्माणि अनेन घन प्राप्नादेर्वश्यकर्मणि परत्र कवार
णादेः स्तंभनकर्मणं तर्भावात्त्वषट्कर्मतोधिकं कर्मस्येयमित्युक्तं यत्तु रसकर्माणि पारदगुटिकाधातुवेधादीनीति नीलकंठेन व्याख्यानं तत्
दति प्रमादतः एवं तर्हि कर्मणां शांत्यादि षट्कामत्र मन्त्रमुपदिशद्भिस्तंत्रांतरैः सह विरोधापत्तेः नचेदं नपौरुषवचनं येन तत्रांतरस
वचनं प्रतीक्षेत किंतु भागवतं तथाचात्र तंत्रे कर्माधिक्येपि काक्षतिरिति वाच्यम् तस्य लक्षणानुक्त्या ग्रंथासौरस्यापत्तेः तानि वक्ष्याम्य

नेमहोत्पातप्रशांतये वह्निवर्णान्समाहृत्यालिखेद्यंत्रपरायणः ४५ लिपिवर्णाः समाख्याता यथावत्प्राणवल्लभे इदा
नीं शृणु देवेशि प्रयोगांस्त्वं क्रमेण तु ४६ शांतिवश्यस्तंभनानि विद्वेषोच्चाटने तथा मारणं रसकर्माणि तानि वक्ष्याम्यशे
षतः ४७ रोगकृत्याग्रहादीनां निरासः शांतिरुच्यते वश्यं जनानां सर्वेषां विधेयत्वमुदाहृतं ४८ प्रवृत्तरोधः सर्वेषां
स्तंभनं समुदाहृतं स्निग्धानां द्वेषजननं मिथो विद्वेषणं मतं ४९

(शेषतइत्युत्तरवचनेन सर्वेषामपि शांत्यादिकर्मणामशेषत
ः स्वरूपतः कथनं प्रतिज्ञातं अशेषतः अशेषाणि सर्वाणि तानि पूर्वोक्तानि शांत्यादीनि वक्ष्यामि लक्षणप्रतिपादनेन बोधयामीति वात
दर्थः उभयथापि तद्विरोधस्त्वस्मनेऽनिवार एव किंच अन्यथानुपपद्यमानमेकैकं तांत्रिकवचनमपरतांत्रिकवचनेन सह विरोधं
सहते नत्वनुपपद्यमानमपीति न किंचिदेतत् किंच शांत्यादिषु मतषट्कस्यापेक्षत्वकथनयात्वडक्त रसकर्मणि तदनुक्त्या ग्रंथासौर

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्यं इत्यपरिहरमेवेतिसंक्षेपः निरासः विध्वंसनं विधेयत्वं स्वाधीनत्वं जनानामिति वक्ष्यवचनादेवसकलजनप्रतीतिसिद्धेः सर्वेषामित्युपाद
नं ननु द्विजोपणान्विनः किंतु धनप्राप्तिकृत्प्राप्त्यादेरपिसंग्रहार्थं एवं तर्हि जनानामितिव्यर्थमितिचेन्न तथायइ देशान्तं तथाभुं भ
निभंभयोरित्याहाविव प्राधान्यसूचनस्य तत्फलत्वात् अप्यतंसावधानधियां जनानामपि वस्यतासिद्धो काकथा धनादिरूपजडाना
मितिभावः एवंतान्यर्थावर्णनेतु कतेषामंतर्भावः स्यादितिस्वयमेवविभावय मोहनाकर्षणाभ्यामपिस्वायत्ततासंभवेनतयोरपि
वश्यकर्मण्येवांतर्भावः प्रत्यक्षरोधः सर्वेषामिति सर्वेषामपिप्रत्यर्थिप्रभृतीनां यः प्रत्यक्षस्य चाक्षुषादेः सत्यामपिसामग्र्यामनुत्पाद

उच्चाटनं स्वदेशादेर्भ्रंशनं परिकीर्त्तितं सर्वेषां प्राणहरणं मारणं परिकीर्त्तितं ५० श्रीरामकृष्णाय

प्रयोजनको व्यापारः सस्तंभनं प्रत्यक्षपदं च क्रोधगमनादेरुपलक्षणं यद्वा प्रत्यक्षपदमक्षपदवाच्यैकादशेंद्रियजन्यज्ञानपरम् ते
न न क्रोधगमनादेरसंग्रहापत्तिः तस्यापि मनश्चरणादिजन्यत्वात् यद्वा सर्वेषां क्रोधी योगगतिप्रभृतीनां यः प्रत्यक्षस्य चाक्षुषादेर्निरोध
इत्यर्थः क्रोधाद्युत्पादे हि तस्यापि तत्प्रत्यक्षं भवेदेव कस्यापि प्रत्यक्षाविषयस्य तु पदार्थस्य सत्वे एव प्रमाणाभाव इति भावः मिथः स्त्रिया
नां परस्परं प्रीतिनुत्यां स्वदेशादेः स्वस्य प्रत्यर्थिनो देशग्रामगृहादिभ्यः सकाशात् साधकाभिप्रेतदेशादिसकाशादितिवार्थः प्राणह
रणं च यथाश्रुतं अकस्मान्मारणं कस्यापि कृपाणमादिकर्तुमारब्धापत्तेः नचेष्टापत्तिः तथा सति विधवत्त्वमत्राप्सरामारणादिशंकायाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कूपादिनः सत्वेन नदत्वरराांशिष्टानां निःकंपप्रवृत्त्यनापत्तेः तादृशकूपकर्तुर्मलरणोत्तरं शिष्टासंथाहत्वापत्तेश्च किंतु मरणोद्देश्यकमरणानु
कूलव्यापारः यत्र कृतेपि मरणोद्देशेन नाराचादिप्रक्षेपेन तस्य मरणं जातं तत्र तादृशनाराचप्रक्षेपत्वरिहिंसकत्ववारणाविशेष्यम् य
दितु तस्य मारकत्वेपि इष्टापत्तिः सदा मरणोद्देश्यकव्यापारमात्रं तत् इदंतु कर्मनानुष्ठानुमुचितं नहिंस्यादितिनिषेधात् नचैतदभि
धानमनर्थं इतिवाच्यम् मदिरापानपरस्त्रीभोगादिविधिवत्ततत्कामरागोत्कंठ्येनोक्तनिषेधांधपरतयासार्थक्यात् नच पशुनायजेते
त्यत्रेव नात्रापिनिषेधः प्रवर्तते अतएवसर्वथाचोरजानीनां मारणे नास्ति पापकमित्युक्तामरे इतिवाच्यम् तत्र स्वर्गाहि महासुखानुभो
गार्थं क्रियमाणे यागे पशुवधातविधिः नचतेन पापमुत्पद्यते स्वर्गोत्यर्थं अवश्योत्पादकमर्मकल्पनयैव चारितार्थ्यात् अत्रतु मरणा
प्रभवमैहिकमेवसुखमुद्देश्यं किंच मारणनिषेधवचनान्यपि मदिरादिनिषेधकानीववक्तानिदृश्यंते अतएव यदिचेत्प्राणिहननाना
पशंकीभवेन्नरः इत्याद्युक्तामरं एवोक्तेः मरानंतरमुपलभ्यते इममंच विधिवचनानां तदर्थवादसहितानां रागांधप्रवृत्तिकारितयो
गोभवतुनाम निषेधवचनानांतु का गतिः नचमारणमदिरादिभ्यो निवर्त्तनमेव तत्फलमितिवाच्यम् एवंतर्हि तादृशकर्मनानिव
र्त्तनस्यैव साधनीयतया समीहितसिद्धेः अधिकंतस्मत्कृतभक्ततरंगिण्यादीपतरंगेबोध्यम् पूर्वोक्तषट्कर्मोच्चरणादिनेमुसर्वैष्व
पिपूर्वंपूजनीयषट्कर्मदेवताः क्रमेणाह रतिरित्यादिना एतासां मंत्राश्चतांत्रिकाः स्वस्वनामाद्यक्षरोत्तरं चतुर्थीनमोंतनामरूपाः प्रणा
दिकाः ॐ रंरत्यैनमः ॐ वांवाण्यैनमः इत्यादयो ज्ञातव्याः शांतिईशानदिगाभिमुखेनवश्यमुत्तरदिगाभिमुखेन इंद्रदिक्पूर्वा एकस्मि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कालेशांत्यादिकमनुष्ठेयमित्यपेक्षायामाह सूर्योदयेत्यादिना सूर्योदयमारभ्य अहोरात्रमभिव्याप्य षष्ठिघटिकात्मके काले दिने दिने
प्रत्यहं नतु कदाचित्क्रमेण घटिकादशकं वसंत ग्रीष्म ऋतवो यांते याः यत्तु दिनानां सावन चांद्र सौर नाक्षत्रभेदेन चातुर्विध्येपि प्रकृते चांद्र
वस्य स्वीकार्यः स च तत्तत्तिथ्युदयमारभ्य तत्तत्तिथ्यंतम् इति नीलकंठेनोक्तं तत्तु सूर्योदयमित्यनेनाहोरात्रमित्यनेन च प्रकृतेनैव व्याख्ये
यमूलग्रंथेन विरुद्धम् नहि सूर्योदयस्याहोरात्रस्य चातुर्विध्यम् न सत्रदिनविभागेन वसंतादिकमुक्तम् अहोरात्रमित्यत्राभिव्याप्त

रतिर्वाणी रमाज्येष्ठा दुर्गा काली यथाक्रमात् षट्कर्मदेवताः प्रोक्ताः कर्मादौ ताः प्रपूजयेत् ५१ ईशचंद्रेंद्रनिर्ऋतिवायुवह्नी
नां दिशोमुखाः सूर्योदयं समारभ्य घटिकादशकं क्रमात् ५२ ऋतवः स्युर्वसंताद्या अहोरात्रं दिने दिने वसंतग्रीष्मवर्षा
ख्य शरद्धेमंतशैशिराः ५३ हेमंते शांतिकं कर्म कर्तव्यं समुदाहृतं वश्ये वसंतनामा तु सर्वकार्याणि साधयेत् ५४

र्थक द्वितीयया षष्ठिघटिकानामेव सूर्योदयावधिकानां वसंतादिविभागस्य स्पष्टतरमवगमादिति किंच घटिकादशकमित्यस्यासो
रस्य स्वच्छेन षष्ठिघटिकातिथिपक्षेऽवेदद्विज्ञासमयोस्त्वन्यथा तत्परिमाणस्य वक्तव्यत्वादिति न किंचिदेतत् वसंताद्यास्त्वत्राद्य
पदं व्याख्यातुं सत्रार्धस्यैवार्थमाह वसंतेत्यादिना ५३ यद्यपि वसंतस्य पूर्वमितानीमभिधानं तथापि षट्कर्मणां सर्वगामित्वात् शांते
तेरनुरोधेन क्रमव्यागमात् सौकर्यमनुष्ठ कर्मणामनुष्ठानाय तत्प्रादर्शयति हेमंतेत्यादिना वश्ये सर्वकार्याणि वश्यकर्मघटकानि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वकर्माणि यथा वसंतो वड्येभवति विशेषनक्षत्रमन्त्रोक्तलाभेनत्र सर्वकार्याणि शांत्यादीन्यपि साधयेदित्यर्थः सर्वेषामित्यनेना
न्नःप्रकारांतरेण सह विकल्पो नास्तीति सूचितम् ॥ ननु वक्ष्यमाणयंत्राणां कियतः कालेन फलाधायकत्वमेवेत्याकांक्षायामु
त्तमम् नं कार्यं वर्षत्रयादर्वाक् अत्यंतलघीयस्तु कार्यमेकदिनस्य परिछन्नेर्वाक् मध्यमं तु कार्यं गुरुलघुभावेन वर्षादितो

शिशिरे स्तंभनं प्रोक्तं पूर्वाचार्यैर्विचक्षणैः ग्रीष्मे विद्वेषणं प्रोक्तं कर्तव्यं देशिकोत्तमैः ५५ वर्षान्तूच्चाटने प्रोक्तानि
श्रेयेन मनीषिभिः मारणे तु सरत्तोयासर्वेषां हिमं तन्विदं ५६ त्रिवर्षाद्वत्सराद्वापि षण्मासात्सार्धायनादपि म
ण्डलान्मासमात्राद्वा पक्षाद्वा त्रिदिनादपि दिवसांते तु देवेशि ज्ञात्वा कार्यस्य गौरवात् षट्कर्माणि प्रयुंजीत यथो
क्तफलसिद्धये यद्दैवज्ञाय तेकार्यं न दाकालेन तथैव हि गुरूणां वचनाद्देवि क्रियतां कर्मसंचयः ५९ गुरुवाक्यं
यदा प्राप्तं सिद्धिस्तत्र न संशयः तस्मात्सर्वप्रयत्नेन गुरुरेव परात्परं धुवि मन्त्री लिखित्वैवं वेष्टितं पट्टसूत्रकैः स्वर्गा

र्वाक् सिध्यती सुत्ररेण परिनिर्हीर्षणाहा त्रिवर्षादिति अर्धायनं मासत्रयं मण्डलात् एकोनपंचाशद्दिनपरिछन्नक्षणाद्दर्वा
क् कार्यं शांत्यादिकं कर्मेशाय ने अवश्यकर्तव्यतयानिश्चीयते नद्देवताद्दासमनयस्वतथैव पूर्वोक्तप्रकारेणैव ननु कालत्यागव
उक्तप्रकारस्यापित्यागन्समुचितइत्येककारणार्थः ॥ परात्परं उत्कृष्टात्तत्रशास्त्रादितो प्युत्कृष्टम् कालाभावेपि तद्वचनस्यैव वि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मन्त्राद
१२

हितहस्तकारित्वादिति भावः साध्यं देवता तस्याः प्राणप्रतिष्ठा यंत्रोपरि भूतशुद्ध्यनंतरं नित्यकर्मावसरे कृतापि साधकः प्राणप्र
तिष्ठाप्रसंगादुक्तेनोक्तामनुसांप्रतं सा कार्या सम्यक् प्राणप्रतिष्ठामंत्रीयर्ष्यादिषडंगादिन्यासध्यानपूर्वकं देवहस्तगतं देवत्वेना

दिपुटकोक्षिप्रा ततः पूजां समाचरेत् ६१ साध्यसाधकयोः प्राणप्रतिष्ठां सम्यगाचरेत् देवहस्तगतं लक्ष्याशास्येत्सा
धकोत्तमः ६२ करे कृत्वा शिखा यावा यथासंलिखितं भवेत् अज्ञावतो गुरोर्भक्त्या सर्वत्र फलभाग्भवेत् ६३ पाशबी
जं समुच्चार्य मायाबीजं ततो वदेत् अंकुशांते तु यं रं लं वं शं षं सं समीरितं ६४ नदंते हंसमंत्रः स्यात्ततोऽमुष्य पदं वदे
त् प्राणा इति वदेत्पश्चादिह प्राणास्ततः परम् ६५ अमुष्य जीवः स्थितो मुष्य पदं वन तो वदेत् सर्वेन्द्रियाणि
सर्वांते वाग्मनश्चक्षुरीरितम् ६६ श्रोत्रघ्राणपदे पश्चादिहागत्य सुखं चिरं तिष्ठंत्विति वह्निप्राणप्रतिष्ठामनु
रीरितः ६७ प्रत्यमुष्यपदं सर्वपाशादीनि प्रयोजयेत् प्रयोगेषु समाख्यातः प्राणमंत्रो मनीषिभिः ६८

अवसितश्रीगुरुहस्तगतं साधकोत्तमः इत्यनेन साधकस्यात्राधिकार इति सूचितं पाशः सविंदुद्वितीयस्वरः मायाहकाररका
रैचतुर्थस्वरविंदुयुक्तो अंकुशांते त्रयोदशस्वरविंदुयुक्ककाररकारांते ६४ सर्वांते याशादिदशाक्षरामुष्यपदांते घ्राणपदे

गुरुः
१२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्यनेन प्राणाशब्दस्य पदत्वं ब्रुवतः सुवंतत्वलक्षणपदत्वं विवक्षितं तेन श्रोत्र प्राणा इति लाभः वागादीनां बहूनां संघात्वेकवचनं प्रत्यगुष्ठ
पदं पूर्वं अत्र मंत्रे उपात्ताखिलांगुष्ठपदेभ्यः पूर्वम् पाशादीनीत्यनेन पाशप्रभृतिदशाक्षरपरिग्रहः अंगुष्ठपदं च यस्य देवयंत्रादेः प्रा
णप्रतिष्ठा चिकीर्षिता षष्ठ्यंत तन्नाम परम् वह्न्याक्षं यथास्यात तथा नत्राभासनिरोधं कृत्वा मंत्रयेत् मंत्राणां संख्या तु त्रिंशतं षट्शतं वा
पिमंत्राणां मनूनां मुनेनिहत्य मत्कल्पीय सुदर्शनसंहितावचनात् संख्यायाः स्वेच्छयोपादानमपेक्ष्यकल्पान्तराहरणास्यापौनिर्त्यात् शे

स्थापयेन्मननानेन प्राणान्सर्वत्र देशिकः वह्न्याक्षं करे स्त्वष्ठायंत्रं संमंत्रयेत्ततः २९ एवं तव मया प्रोक्तं प्राणानांस्थाप
नंपरं एवं क्रमेणानेतेयंस्सर्वकार्येषु सर्वदा ३० यंत्राणि कति चित्रानियानि तानि वदाम्यहम् यंत्रे हि यंत्रता प्रोक्ताय मनेश
मनेपरं ३१ यंत्रनेसकलं विश्वं यंत्रमित्यभिधीयते यंत्रसंत्रायनेत्राणंयंत्रार्थस्तदुदीरितः ३२

(यमित्यत्र प्राणानांस्थापन
मेवकर्मप्रधानम्-परंतु कर्मशोत्तेयमित्यनेनोपात्ततयाप्रथमांतनैवेतिश्रेयम् ३० नखलु एतावंत्येव यंत्राणि किंतु निरवधिकानि त
तः कतिचिदेववदामिकानि तर्हि नून् घेइत्यपेक्षायामाह तानि यानीति परमाद्भुतकारणांनयवस्तुपरिज्ञानं वक्ष्यामीति पूर्वोक्तविधि
नप्रतिज्ञायां विशेषणतया प्रविष्टानीत्यर्थः प्रथमंतानीत्यस्यतथा च पूर्वप्रतिज्ञाविषयीभूतानियानि तानि वक्ष्यामीत्यर्थः एतेनप
रमाद्भुतयंकराणि अपूर्वाणि यंत्राणि वक्ष्यामीत्युक्तं यस्य कस्यापि यंत्रस्य सकलाभीष्टार्थार्पकत्वं किं पुनर्मयाविभाव्यमपकथितानां

Nepal Sanskrit University, Balmeekri Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मित्येवंस्तुवयितुंयंत्रशब्दार्थमाह यंत्रेहीत्यादिना ह्रियतः यमनेइत्यस्य विवरणंशमनेइतितथाच यमः शमनेपरंतत्परंततोयंत्रेयंत्रेणेत्यन्वयः अत
एवयमयतीतिनिरुक्तात्प्रसाधूमितियंत्रमितिनीलकंठः अर्थान्तरमाह यंत्र्यतेइतिनियम्यतेइत्यर्थः तृतीयमर्थमाह यंत्रमिति अत्रानंकेनाप्य
रक्षितंयंत्रार्थः यंत्रशब्दरूपोर्थः ततस्तस्मात् उदीरित उक्तइरितः उक्तयथार्थार्थकत्वादितिभावः यंत्रंहित्रिविधंकेवलांकयंत्रं तदुभयपं
त्रंच तेषुतृतीयस्यवक्ष्यमाणोभेदःश्रेष्ठतमइत्याह अंकानामित्यादिनाअंजसासाक्षात् परयोक्तयंत्रयोःकालविलंबादिवारेतिभावः

यंत्रंगोप्यंकृतंयत्नैः फलदंभवतिप्रिये अंकानांचापरेभेदायंत्राणांचापरेमता ७३ यंत्रांकमंजसादेविसर्वसिद्धिंप्रसाधयेत्
इदानींवर्गसंख्यांतुकथयामिसमासतः ७४ अचवर्गाक्रमशुद्धिश्चनामतस्ताब्रवीम्यहं अआइईउऊचैवऋॠऌॡतथैवच
७५ एऐओऔचअंअश्चअवर्गःषोडशार्णकः कवर्गःपंचवर्णःस्यात्कखगघङास्तथा ७६ चवर्गःपंचवर्णःस्याच्चछजझञास्त
था टवर्गःपंचवर्णःस्याट्टठडढणसंयुताः ७७ तवर्गःपंचवर्णोत्रतथदधनसंयुताः पंचवर्णःपवर्गोपिपफबभमसंयुताः ७८

सर्वेषुंकयंत्रीयकोष्ठेषुमातृकावर्णलेखनयानासांउपन्यासेवक्ष्यकर्त्तव्येङञणानामलेख्यानामपिवर्गांतःपातितयोपन्यास एवंकंव
र्गसंख्यामाह इदानीमित्यादिना वर्गसंख्याज्ञानंतुकेवलवक्ष्यमाणसिद्धिव्यतिरेकपरिहारार्थं यद्वाचतुर्दिक्षुलेख्यानांक्रमेणाद्धिद्धि
वर्गाणामतः पतितङञादिकानांज्ञानार्थमिदमुक्तमितिसर्वंसुस्थम् समासतः संक्षेपतः वर्गानुद्दिश्यास्तत्त्वसंख्याविशेषकवाक्येस्याउक्तत्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न इत्येकां प्रतिज्ञां कृत्वा प्रतिज्ञांतरमाह अष्टेति अष्टवर्गान्समुद्दिश्य अष्टत्वसंख्यावैशिष्ट्येन वर्गविशेष्यकज्ञानमुद्दिश्य नामतः अवर्गकवर्गे त्यादिनामभिस्तान् वर्गान् ब्रवीमीत्यर्थः नामतस्तत्तद्वर्गकथनादपि अर्थादष्टौ वर्गा इति ज्ञानं भविष्यत्येवेति भावः यद्वानंतवर्गघटक वर्णानां नाममात्रेण संकीर्त्तनरूपोद्देशपूर्वकमिति समुद्दिश्येत्यंतस्यार्थः अंकसंख्यानां गणनासाधनीयं यंत्रकोष्ठगतांकसार्थगण ना युग्मककारादिव्यंजनद्वयं स्वरेणाकारादिना सह गणयेत् ककारादिषोडशव्यंजनान्यनुलोमतः क्षकारादय प्रतिलोमतः तत्र गणास्त

यवर्गस्तूर्यवर्णाः स्याद्यरलावार्णसंयुताः शवर्गगास्त्ववर्णाक्षशषासहलान्विताः ७९ केषांचित्पंचवर्गोत्र शवर्गः परिकी
र्त्तितः वर्णाः संज्ञाय सम्यग्वै यंत्रधारणकर्मणि कर्त्तव्याचांकसंख्यानां गणना वर्णके युग्मं स्वरेण संयुक्तं गणयेद्देशिको
त्तमः ८१ गणनाविधिमुल्लंघ्य तद्गसंख्यामजानता यंत्रं नैव च कर्त्तव्यं यदीच्छेत्सिद्धिमात्मनः ८२

नैव गणपाजयेतष्यैव वक्तमन्वाम् तथा च अं कं क्षं आं खं लं इं गं हं इत्यादिरीत्या षोडशकोष्ठेषु स्वयं स्वेष्टयंत्रलेखात्पूर्वं सम्यग्ग णनीया इति कलितार्थः एवमकरणे फलसिद्धिव्यतिरेकमाह संख्यामित्यादिना ८२ विंशत्यंकमयं यंत्रं वशयेदखिलं जगदित्या दिना फलप्रदर्शनपूर्वकं विंशत्यासाधकमयं यंत्रगणितं त्रांतरे च दृष्टं तेन न चतानि नवकोष्ठके चतुरस्रे कार्ये यस्मिन् विनासंपद्यंते इत्यतो वै

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लक्षणेन तत्र नवकोष्ठरचनामादर्शयति भूभूपुरमिति अत्र भूपदद्वयस्य पुरेण सहान्वयविवक्षया भूपुरद्वयं लभ्यम् अत्र बाह्यान्यस्त्रोअ
 स्त्राणि मध्ये तत्कर्णिकया सह नवकोष्ठानि त्रिकोष्ठं वाग्रमध्यपृष्ठभागेषु क्रमेणैकत्रिपंचस्त्राणि कृत्वा नवकोष्ठात्मकता मानेयं व
 र्तुलं दक्षिणोत्तरायतरेखाद्वयेन पूर्वपश्चिमायतरेखाद्वयेन च नवकोष्ठकतानेयम् नवकोणकम् प्राक् तत् नवकोष्ठके दक्षिणोत्तरकोणे सं
मार्ज्य पुरस्तात् त्रिकोणरूपेण तौ क्रमात् निवेश्य संपाद्य अष्टारम् अष्टारं अष्टदलकमलं कर्णिकया सह नवकोष्ठकभावमायाति चतुर
स्त्रं नवकोष्ठात्मकं प्रसिद्धमेव चंद्रार्द्धम् अर्द्धचंद्राकारां रेखां कृत्वा तन्मध्ये दक्षिणोत्तरायतरेखाद्वयं कृत्वोपर्येकां दक्षिणोत्तरायतां रेखां

भूभूपुरं त्रिकोणं च वर्त्तुलं नवकोष्ठकं अष्टारं चतुरस्त्रं च चंद्रार्द्धं वसुकोणकं ८२ पंचकोणं च षट्कोणं तथा वै सप्तकोणकम्

कृत्वोपरि पदचतुष्कमध्ये पदत्रयमधस्तात्पदद्वयं पूर्वपश्चिमायताभिः क्रमेण त्रिध्येकरेखाभिः संपाद्य नवकोष्ठकतामानेयम् वसु
कोणकम् प्रसिद्धनवकोणात्मकचतुरस्त्र एव यदा मध्यतनकोष्ठ एव चतुर्षु कोणेषु कदानं विवक्षितं तदैवं वसुकोणनामकतामा
धत्ते नातश्चतुरस्त्रेण पौनरुक्त्यं पंचकोणं अधस्तादेकं त्रिकं तदुपरि मध्ये एकं चतुरस्त्रं तदुपरि त्रिकोणं कृत्वा मध्यस्थचतुरस्त्रस्य दक्षिणो
त्तरभागयोश्चतुरस्त्रद्वयं कृत्वा त्रिकोणस्य मध्ये एकां पूर्वपश्चिमायतां रेखां कृत्वा तद्बहिरस्यैकां दक्षिणोत्तरायतां आत्रिकोणरेखां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

संपायनवकोष्ठकन्त्वमानेयं सप्तकोणान्त्वमायं भेदोयद्वत्र मध्यस्थ चतुः कोणस्यैवोपरि त्रिकोणं तत्र तन्मध्यस्थ चतुःकोणत्रिकोणस्योपरी
ति अतस्त्वत्रिकोण पंचमत्वात्तत्र पंचकोणान्त्वप्रवादः द्वितीये त्रिकोणस्य चतुःकोष्ठत्रिकद्वयस्योपरिगतयाः सप्तकोणान्त्वप्रवादः षट्कोणं प्र



यन्त्र
१५

सिद्धमेव दक्षिणोत्तरयोरेकैकरेखामधिकां कृत्वा नवकोष्ठत्वमानेयं सप्तकोणम् अथ त्रात्रिकयंत्रं कृत्वा तदुपरि त्रिकोणं कृत्वा पंचकोणाव
देव त्रिकोणरेखाद्वयसंभिन्नं कृत्वा नवकोष्ठकतामानेयमित्येकादशधा नवकोष्ठयंत्रलेखनप्रकारोऽवसेयः अथ प्रसंगात्तंत्रांतरोक्त
यंत्रोपयुक्तकोणरचनां स्तवयन्नाह शतकोणमित्यादिना एकादशरेखाः पूर्वपश्चिमायता एकादशैव च दक्षिणोत्तरायताः रेखाः कृत्वा
शतकोणः शतकोष्ठतारूपासिध्यन्ति सहस्रकोणानां तु एकपंचाशद्रेखाः पूर्वपश्चिमायताः एकविंशतिरेखाश्च दक्षिणोत्तराय
ताः कृत्वा वैपरीत्यं वा प्रोक्तरेखापरिमाणयोः स्वीकृत्य संपद्यते पुनर्यदि तंत्रांतरेनास्तीत्थं यंत्रमित्युच्यते तर्हि वक्ष्यमाणकोष्ठादि
यंत्रेष्वेव शतकोणसहस्रकोणयोर्वैकल्पिकमुपादानमस्तु अत्र नीलकंठः शतकोणसहस्रकोणशब्दाभ्यां व्यष्टिसमष्टियंत्राणि
वक्ष्यमाणानि प्रदर्श्यंते तथाहि एतद्युगपद्बहूनि फलानि कामयमानस्यैकनिपयसमुच्चयविषयं समष्टियंत्रं विषयं च यदा नवको
ष्ठकयंत्राणि षोडशसंख्यकानि क्रियंते षोडशकोष्ठकानि वा नवसंमितानि क्रियंते तदा चतुश्चत्वारिंशाधिकशतकोष्ठानि कृत्वा ना
वंति तत्र लेख्यानि नवकोष्ठकसमष्टियंत्राणि तु तिर्यगूर्ध्वं चैकोनविंशतिरेखाभिरष्टादशाष्टादशकोष्ठकानि कृत्वा चतुर्विंशत्य
धिकशततत्रयकोष्ठेषु षट्त्रिंशन्नवकोष्ठयंत्राणि लिखित्वा संभवेत् यद्यपि त्रिंशद्देवतानि संति तथापि तेष्वेव कार्यभेदेन क्रमभेदमस्तु
पेक्षाधिकान्यपि षट्स्थानि एवं पंचपंचाशत्संख्येषु षोडशकोष्ठकयंत्रेष्वधिकान्नवभेदान्न्यूनसमष्टिफलार्थोऽप्यूहश्चतुःषष्टियंत्राणि

गुरु:
१५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शत्रिंशद्वर्गसंमितेषु चतुर्विंशत्यधिकैकसहस्रकोष्ठेषु लिखेत् तथा चायं ग्रंथः प्रसक्त तयं च परंतयैव संगच्छत इति साधुसौरस्यामिति ब्रूते अत्रे
दं वक्तव्यं नहि त्वदुक्तचतुश्चत्वारिंशाधिकशतकोष्ठेषु शतकोणानां वा चतुर्विंशत्यधिकसहस्रकोष्ठेषु सहस्रकोणानां वा तत्रोक्तनव
कोष्ठादियंत्रलिखनप्रमाणमस्ति इदमेव प्रमाणमिति चेत्तत्र अर्थान्तरपरतया व्यवस्थोपपादयितुं शक्यत्वात् नापि तावद्यंत्राणि एकत्र
लिखितुं शक्यन्ते लेखनीद्रवद्रव्ययोः कामनाभेदेन भिन्नत्वात् तथा तावांस्तावानंशस्तत्तत्कर्मप्राप्तलेखन्यादिना लेख्य इति शक्यं वदितुम्

शतकोणां सहस्राख्यं कोणानां गणनास्मृता अथोच्यते समासेन रेखानां क्रमगंभुभम् येन विज्ञानमात्रेण यंत्रविद्याविशा
रदः ८४ अथातोहं प्रवक्ष्यामि रेखानां गणनाक्रमैः सम्यक् यंत्राणि विधिवद् दुर्लभानि कलौ युगे ८५

यंत्रस्यापि कामनाभेदेन भिन्नत्वात् एतेन तत्तत्कामनाभेदेन नक्षत्रतिथिवारर्तुभेदेपि देवताभेदेपि च नक्षत्रतिः तत्र देवतासंप्रयत
तत्र सत्यादिषु तत्तद्भागस्यालिखितुं शक्यत्वादित्यप्यपास्तं अथ यत्रमपि तत्तत्कामनानुगुणतत्तद्भागानां संयोजनमित्यर्थः कृत्वैकीकर
णीयमिति चेत् तथापि कस्यचित् कुले कस्यचिद्वयपार्श्वे कस्यचित् हस्तंभे कस्यचिद्वक्षसि देहल्यंतः कस्यचित्कंठे कस्यचित्कर्णे कस्यचित्करे
इत्यादि विविधस्थलोक्तधारणकानां नानायंत्राणामेकपत्रारूढत्वे धारणमेव न संभवतीति विभावय एतेन सर्वकामनानुगुणमेव सर्व
भावेन बिल्वजमित्यादिनोक्तं पत्रमत्रग्राह्यमित्यपि प्रत्युक्तं तिर्यगूर्ध्वं चाष्टादश रेखादिकं च नास्मात्स्थलादायातीति न समाष्टिनवकोष्ठ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यंत्रपरताम्नूलस्य कतिपययंत्रपरत्वेप्यपिनमूलस्वरससिद्धं शतमात्रकोष्ठकरणेकतिपयकोष्ठानां रिक्तत्वापत्तेरितिसंक्षेपः
अथवक्ष्यमाणयंत्रेषुरेखानिर्माणमाह अथेत्यादि क्रमणक्रमः पूर्वपश्चिमदक्षिणउत्तरगयतादृश्यादिरूपं अथातःरेखाक्रमःभि
धानानंतरंयंत्राणिवक्ष्यामीत्यन्वयः रेखाक्रमोत्तरंयंत्राभिधानेकिंबीजंतत्राह रेखानांगणनाक्रमैःसम्यगिति सम्यक्त्वंचसर्वःस
मीहितार्थकारित्वं तथाचयथोक्तरीत्यारेखांविनाविधिवत्कृतान्यपियंत्राणिनसिध्यंतीतिभावः पश्चिमादेत्यादेर्नियमविधिः नव

पश्चिमापूर्वगारेखाश्चतस्रोदक्षिणायतः उदग्याश्चतथाचक्रंनवकोष्ठात्मकंभवेत् ८७ पश्चिमात्पूर्वगाःपंचरेखाःवृद्धि
क्रमेणतु चक्राण्यनेकान्यन्याथविषमाणिसमानिच ८८ तेषांकाश्चिल्लिखेत्प्राज्ञःसम्यग्विज्ञानतत्परः॥ष्टलोर्ध्वगातास्त
था पंचरेखाःप्रजायंतेकोष्ठाश्चापिचषोडशः ८९ अनेनैवप्रकारेणरेखाः॥इष्टांकपूरणोपायंतंवक्ष्यामिसांप्रतम् ९०

कोष्ठात्मकंचक्रंभवेदित्यनेनैवविहितत्वात् तेनपूर्वतःरेखाकरणेनशास्त्रार्थसिद्धिः निर्यणनादक्षिणाउत्तरंयावदायताः नवकोष्ठ
केयंत्रेतथानियमात् इहापिविशेषंतदनुवृत्तेरुचितत्वात् अशेषंकृत्स्नंनवकोष्ठकेषुअंकपूरणंनतुषोडशकोष्ठकेष्ठिवेहापिशे गण:
षपूरणं ध्रुवांकैर्ज्ञानंशिवपदेशानमित्याद्युक्तप्रकारेणध्रुवांकैःशेषपूरणं सशेषंचपश्चादित्यशेषपूरणमेकदास्एकप्रकारेणवा १९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नास्ति नत्वेव मन्त्रे निर्गलितार्थः नवकोष्ठकयंत्रेंकदानप्रकारमाह प्रकृतेरित्यादि एकादिनवांकअंकाः प्रकृतयः अष्टादि हृतसाधकवर्णांक
योगांकशेषांकमिति द्वितीयांतमध्याहार्यं तथा च वक्ष्यमाणरीत्या साध्यसाधकवर्णांकयोगे अष्टादिभिर्वक्ष्यमाणांकैर्भक्तेयच्छेषमेक
द्वित्रिचतुराद्यंकं तेन प्रकृतिं गुणयित्वा संपन्नांकैर्वक्ष्यमाणक्रमेण नवापि कोष्ठान्पूरयेत् एकांकरूपा प्रकृतिः शेषेण गुणिता शे
षरूपैवेति शेषांकस्यैव विन्यस्य द्विरूपा तु प्रकृतिः शेषेण गुणिता शेषगुणतामायाति त्रिरूपा त्रिगुणतां चतुःस्वरूपा चतुर्गुणतां

अशेषं नवकोष्ठेषु नास्ति शेषप्रपूरणाम् प्रकृतेर्द्विगुणां कृत्वा त्रिगुणां वा चतुर्गुणां पूरयेदनया रीत्या नवकोष्ठे क्रमा
दरात् ९१ षोडशादिषु चक्रेषु समशेषं प्रपूरयेद्बुधः इष्टांकान्स्थापयेन्मंत्री कवितान्तरगतो हरेत् ९२ प्रसंकाच्चिगु
णान्यंत्रपंक्तिसंख्यासमं लिखेत् लिखित्वा पंक्तिभेदेन वारणेनैव पूरयेत् ९३ पूरयेत्सर्वमार्गेण पक्षेणानेन देशिकः

तां पंचस्वरूपा पंचगुणतां षट्स्वरूपा षड्गुणतामायाति सप्तस्वरूपा सप्तगुणतां अष्टस्वरूपाष्टगुणतां नवांकात्मिका तु प्रकृतिः
शेषांकगुणिता सती शेषांकनवगुणतामासादयतीति तेन प्रकृतिगुणितशेषांकास्तत्र तत्र वक्ष्यमाणक्रमेण नवकोष्ठेषु विन्यस्याइ
त्यर्थः द्विगुणामित्यादि नवगुणांतोपलक्षणं एकगुणामिति नोक्तं शेषांकस्यैकांकरूपप्रकृत्या गुणनेपि शेषांकस्यैवावस्थितेस्तत्
प्रयोजनाभावात् तदंकोपन्यासस्तु शेषांकन्यासविधायकवक्ष्यमाणवचनादेव प्राप्तो भविष्यति क्रमादरात् वक्ष्यमाणक्रमम्

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मल्लाद १७

गीकृत्यअनयारीत्या पंचगुणां षड्गुणामित्यादिरीत्या ९१ षोडशकोष्ठेयंत्रे क्रमान्तप्रकारमाह षोडशादिष्विति सशेषं पूरयेदित्युक्त
मेवार्थमुपपादयति इष्टांकानिति शिवपदेगोष्ठुः सुरेति पदोपदिष्टान् पंचचतुरेकाष्टत्रिषट्सप्तद्विरूपानंकान्विचतुः पंचषड
कादशद्वादशत्रयोदशचतुर्दशपरिमितकोष्ठगलिखेदित्यर्थः अतस्त्ववशिष्टकोष्ठेषु वक्ष्यमाणरीत्यांकानुरलिखनशेषंलिखे
न्नुपदिष्टम् केचित्तुसशेषमेवोक्तेष्टांकालिखनंकार्यं यतोहि कथितस्थानेभ्यः परत्रेतरांकानांस्थापनंकर्त्तव्यमस्तीतिभावआह

यंत्रंयंत्रात्मकसंख्याभिर्विभजेत्तान्यथाक्रमात् तत्रैकभागोप्रथमेकोष्ठेमंत्रीप्रपूरयेत् द्वितीयादिषुकोष्ठेषुरुपैक
वृद्ध्याप्रपूरयेत् ८५ पंक्तिसंख्याविभागेनशेषांकायेभवंतिते पुनःप्रोक्तक्रमेणैवपूरयेदंकशास्त्रतः ८६ क्रमो
यंत्राणांपूरणेगुप्तमयोदितः यंत्रेषोडशकोष्ठाख्येभरणेपिक्रमांतरं ८७
(: शतादिसकलयंत्रेष्वयंपंथाः शतादियंत्रे
विशेषमाह क्वचिदिति शतांकादियंत्रेषुइष्टानांकानांस्थापनंकार्यं पूर्वोक्तरीत्यापीतिप्रकारद्वयेनशतांकादियंत्रपूरणमित्याभि
प्रायः तथाहि सप्तवेदविधिवेदधराग्निरश्मा स्ववह्निविधिनागसमुद्राः बाणवेदरसवेदगुणार्तु स्माब्दक्षिनववार्द्धिसुजाग्नि
१ नववह्निनागभुजचंद्रगुणाश्ववह्निमेघाब्धिवाजिगिरिवाजिभुजानयुग्म नंदद्विभूनयगुणानंदधराः करग्निस्यपसचंद्रगुणाव
ह्निषडक्षिसंख्या २ अंकाःक्रमेणप्रथमकोष्ठमारभ्ययंत्रतोलेख्याःशतांकयंत्रीयफलंयंत्रविदांवरैः इष्टांकेभ्यःपरेकेवांकाइहनिवेयां गुरुः १७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्यपेक्षायामाह प्रत्यंकानिति प्रत्यंकान्स्व चिकीर्षितचतुस्त्रिंशद्वात्रिंशदादियंत्रांकसंख्यार्द्धभूतसप्तदशषोडशादिरूपांकान् विगुणा
न् गुणसारशिवापदप्रतिपार्थैस्त्रिषट्सप्तद्विपंचचतुरेकाष्टरूपांकैर्हीनान्क्रमशः कृत्वा पंक्तिसंख्यावत्तद्रूपान्तस्मात्प्रयथासा त
था पंक्तिचतुष्टये द्विद्विक्रमेण फलकस्थो लिखेत् प्रथमपंक्तौ चतुष्कद्वयं द्वितीयपंक्तौ च चतुष्कद्वयं तत्र च पंक्तिभेदेन द्वितीयपंक्ति
स्थप्रथमचतुष्कीयप्रथमद्वितीयकोष्ठक्रमेण वाणरागेनैवगजगत्यैव तथाच सप्तदशांकषोडशांकजातंत्रिप्रभृतिभिरष्टांकैः प्र
त्येकंन्यूनीकृतं क्रमेण नवमदशमपंचदशषोडशप्रथमद्वितीयसप्तमाष्टमकोष्ठेषु लिखेदिति निर्गलितार्थः षोडशकोष्ठेष्वेव यंत्रे
षु प्रकारांतरेण पूरणमाह पूरयेदित्यादिना पूर्वमार्गेणागजगत्या अनेन पक्षेण वक्ष्यमाणप्रकारेण तमेव प्रकारमर्द्धश्लोकेनाह
यंत्रं यंत्रदेवता त्रिपुरादिः यंतासाधकः तयोः संख्यातदीयनामांकसंख्यानां वक्ष्यमाणरीत्या संपन्नामर्द्धीकृत्यावशिष्टां संख्यां तत्त
त्कोष्ठेषु लिखेदित्यर्थः विभजेत् विभज्य लिखेत् यथाक्रमात् प्रथमादिकोष्ठमारभ्य नतु पूर्ववत्नवमदशमादिकोष्ठमारभ्येत्यभिप्रा
यः सांप्रतं नवकोष्ठेषु यंत्रेषु प्रथमपंक्तिकोष्ठपूरणांकार्थमित्यत्राह तत्रेति नवकोष्ठकयंत्रे इत्यर्थः एकभागे एकस्मिन्कोष्ठात्मके भागे
प्रथमे वक्ष्यमाणवचनैः प्रथमं पूरणीयत्वेनोद्दिष्टे तदग्रतं तत्कोष्ठाद्द्वितीयाद्विवारं पूरणीयत्वेनोपदिष्टकोष्ठे एकैकवृद्ध्या पूरयेदि
त्यर्थः नवकोष्ठके यंत्रे प्रथमापेक्षयाद्वैगुण्येनापरांकदानमुक्तं षोडशकोष्ठके तु एकैकस्यां पंक्तौ यावती मिलित्वांकसंख्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मज्ञाद
१८

ज्ञितदपेक्षयोर्वरिनायास्त्वचिकीर्षितश्चतुस्त्रिंशदादियंत्रांकसंख्यानामंकन्यासविधायकशास्त्रमनुस्त्पगजगत्यापूरयेदित्याह पंक्ति
संख्याविधानेति विशेषांतरमाह भरणोपीति अपिभिन्नक्रमः तेनभरणेवक्ष्यमाणांकपांतरमप्यस्तिनतुक्रूवांकदानेभरणोनिय
मइत्यर्थः षोडशकोष्ठेषुसमसंख्याकचतुस्त्रिंशद्यत्रिंशदादियंत्राणांपूरणोपायंदर्शयति ज्ञानमित्यादिना कादिनवटादिनवपादि
नवपादिपंचयाद्यष्टौवर्णाःस्वसंमितांकाभिधायकाङञनणास्त्वंकाभावसूचकाः अकारयोगाल्लकारोपितथेपरिभाषयतामा
श्रित्यज्ञानपदैर्नानाननापदैश्चांकाभावउक्तः शिवपदेगोष्ठुःसुरापदेल्लक्रमेणपंचचतुरेकाष्टत्रिषट्सप्तद्विरूपांकाउक्ताः क्रू

रानंशिवपदेतानंज्ञानंगोष्ठुःसुराननं इष्टार्द्धमनितंतेषुयुग्मसारशिवापदैः १८ नानारसतुलानानानानाजयवशान्मा

दं यंत्रं मयाभद्रे तव स्नेहात्प्रकाशितं दुष्टाय भक्तिहीनाय न देयं वै त्वयानघे इति दुःखहरयंत्रं ६२ अथयंत्रसिद्धिसंत
प्रवक्ष्यामि श्रृणु सुव्रतं मुनीनां तपसाढ्यानां सांयोगिनां तथा वैद्यकानां च शिल्पीनां दैवज्ञानां विमानिनां सिद्धिदं ज्ञा
नदं चैव तद्विधि पूर्वं निबोधतत् अश्वमश्वं तथा नागं मंत्रिणां मंत्रिणां ततः यथानुक्रमयोगेन शास्त्रमार्गेण भामिनि

अश्वमित्यादि द्वितीयांतानामश्वादिगतिशास्त्रकोष्ठमभिव्याप्येत्यर्थः तस्य चलेख्यामित्यत्रान्वयः यावदंकविसर्पणां नवकोष्ठपू
र्त्तिपर्यंतं यथा यावत्संख्याकांकयंत्रमिदं चिकीर्षितं तावत्संख्यांकपूर्त्तिपर्यंतं अत्र साध्यं मातंगीतन्नामवर्णांका अष्टाविंशति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

:२८ गुरोर्गुर्तस्याः पितुर्गुरोर्मितस्य श्रीमन्मलेवम्मन्तृपांगजातः अर्थेनताम्नाचूसशत्रुशालः शल्यार्थकं शालपुदं नृहत्ते सोत्रसा
धकः तन्नामवर्णाकाः एकपंचाशत् ५१ तयोर्योगे एकोनाशीत्यंकः ७९ तदेतुगुणे अष्टपंचाशदधिकैकशतांकः १५८ तत्रपंच
दशाभिर्भागे ऽवशिष्टांकः शिष्टः ८ तस्माद्वितीयकोष्ठेभ्यासंकलनानन्तरमभ्यादिगन्यानन्तन्कोष्ठे एकैकवृद्ध्या हेतुगुणादिनांकन्यसनं
मध्यकोष्ठादितोलेखं यावदंकविसर्पणं साध्यसाधकयोर्वर्णान्पक्षघ्नांस्तिथिभाजितान् विलिखेन्मध्यकोष्ठादिक्र
मेणासुरवंदिते साध्यमन्त्रन्तु विज्ञेयामातंगी परमापरा अष्टगंधेस्तु पूर्वोक्तैर्मेलयित्वालिखेत्सुधं धारयेत्सततंच
क्रितः सिद्धिमवाप्नुयात् इदं यंत्रं मयाभद्रे भवतारणकारकं कथितंतवसान्निध्यप्रदं परमपावनं गोप्यंगोप्यंत्व
याभद्रे सिद्ध्यर्थं सिद्धसेवितं ७५ सिद्धिकरंयंत्रं सारस्वतप्रदं यंत्रं प्रणवक्ष्यामिसांप्रतं वेदशास्त्रपुराणानिका

करणीयं मेलयित्वा अष्टगंधान् परस्परं संयोज्यभवतारणकारणं संसारतारणाकरं सिद्ध्यर्थं सिद्धप्रा
यफलकं सिद्धनामर्थीयस्मादितिवाअनरुवतैः सेवितं तस्मात्सो सिद्धिकरं यंत्रं मेकोनविंशं वश्यकर्मणि
यंत्रांतरमाह सारस्वतेत्यादि साध्यमन्त्रकाली तन्नामवर्णाकाः पंचदश १५ कलिमर्दननामास्तेतुर्यः श्चीरा

१२	८	१५	४८	८	६४
१४	१२	१०	५६	४०	२४
९	१६	११	१६	७२	३२
३६					१२०

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जैस म्पत्र: कलियुगविभवजयायाज्ञयम्यान्वर्थसंज्ञोयं सस्वात्रसाधवः तन्नामवर्णांकास्त्रिसप्ततिः ७३ तयोर्योगेऽशीतिः ८०
तस्यनवभिर्गुणानेछिनवम्यधिकसप्तशतांकः ७९२ तत्रसप्तभिर्भागेएकांकः शिष्यते तस्यद्वितीयकोष्ठेलिखनंकृत्वाततः प
रं पूर्ववद्देवशोधपूरणं यंत्रेतुपंचमकोष्ठमारभ्यैवपूरणमित्यपिपूर्ववत् अथदक्षिणपञ्चपञ्चकम्याप्यदक्षिणेनसमापनं

अथ्याकरणानिच ज्योतिषंभैषज्यंकर्मसर्वविद्योपयोगिकं विशेषविद्यासंघानांज्ञानानांचपरं त्विदं नकस्यचिन्म
याख्यातंरहस्यमपिभामिनि सांप्रतंकथ्यतेदेवितवाग्रेयंत्रनायकः अश्वश्चैवहयश्चैवगजश्चैववरानने मं
त्रीमंत्रीचापिपरंनागश्चापिहयद्वयं क्रमेणानेनदेवेशिविलिखेद्दशकोत्तमः साध्यसाधकयोर्वर्णान्नव ग्रा
सप्तभाजितान्पूरयेन्मध्यकोष्ठादिविधानेनतरोत्तमः साध्यमत्रमहाघोराकालीनामाद्यदैवतं सु गंधैश्चा

पिनपिपूर्ववत् एकैकवृत्ताद्देगुणपादिनावापूरणमित्यपिपूर्ववत् प्रक्षालकांस्यादिपात्रेलिखितंयंत्रमितिशेषः पिबेदि
मंत्रप्रक्षालनकरंजलमितिशेषः यदितज्जलपर्यायंयंत्रंलिख्यतेतदातघंत्रंक्षालयित्वा संमार्जनजलं पिबेत् जलप्रवलि
खितयंत्रस्यतादृशप्रक्षालनासंभवादत्रग्रहणं २ ९ ४ त्यागः सर्वैःविद्याभ्यासेत्वेष्टसाधनताधीभृत्यःपाठेऽतस्मादृशा
६ १ ८
७ ५ ३
१५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धीशाली तथाच भयनस्याकर्त्तापि पाठितः स्यात् किं पुनस्तत्कर्त्तेति फलितं इतिविद्याप्रदं विंशतिमं यंत्रं अथवनभयापहं यंत्र
माह अथेति अत्र वनप्रयोज्यभयस्य नाशो यादिसमीहितस्तदाशांतो य दिताहृशभयभावस्यान्तरोतरं स वंधलाभो विवक्षितस्तस्य
वश्येयादिस्तु परुषान्तरे प्रसिद्धता दृशभयस्य स्वस्मविधेनागमनमात्रं विवक्षितं तं तदास्तं भनेस्य कर्मणोंतर्भावइति ध्येयं ध्रुवा

प्रक्षाल्यजलमध्येतुक्षालयित्वापिवेन्नरः मासान्केविद्धर्वन्तूनं पठनामासान्य पाठितोभवेत् वर्षान्सर्वविधानज्ञः सर्वविद्या
विशारदः मूर्खः पठितनांयाति किंपुनः पठितोजनः इदंयंत्रंमयाभद्रेगणेशायसमर्पितं गुरुस्त्वेगिरिजे दत्तंसवि
द्याविभवोभवत् गोपनीयं गोपनीयं गोपनीयं परात्परं शिष्याणांहितकामायमयाप्रोक्तंवरानने ॥२०॥ इतिवि
द्याप्रदंयंत्रंविंशं अथतेसंप्रवक्ष्यामियंत्रंवनभयापहं नव्याघ्रपथिकक्षुद्रदस्युपर्वतजंभयं भयंनजायते
देविमानमस्थंनसंशयः अष्टोभक्षगजोमंत्रीमंत्रीचाष्टयमतःपरं गजोमंत्रीतुरंगश्चहयेनपरितःक्रमात्

व्याघ्राद्यपेक्षयानिर्वः सर्पभल्लूकादयः प्रातिस्विकरूपेणाभयहेतूनामुपादानमशक्यत्वेनतथासर्वसंग्राहकरूपेणाह मानसस्थ
मिति यद्यपीनरस्वगतार्थंसर्वाग्रेमप्यास्तितथापितेषांप्राधान्यस्यसूचनार्थंपृथगुपादानं यद्वाधीरस्वभावानांपुंसांवनस्यस्वरू
पतोभयदायित्वाभावेप्याह नव्याघ्रेत्यादि अतितीव्राणांव्याघ्रादितोपिभयाभावात्राह भयंनेत्यादि मानसस्थंअकस्माद्विमुक्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पानसरिद्द्ध्यादिभ्रमवंय म्रनसाशं किंनंभयंतत् साध्यमन्त्रवनदुर्गिका यत्तुदुर्गासाध्यमन्त्रेतिनीलकंठेनोक्तंतत्तत्रयुक्तं मलाक्षरा
सोरस्यात् नचेदेवंनदपरपर्यायभवान्यादेरपितत्त्वं किंनरोच्यते: नन्वेवंश्रीपदमप्यत्रान्तर्भाव्यंस्यात् नस्यात्विशेषणपदत्वात् दे
वीतिवर्णयो:साध्यवर्णोऽत्तथाप्यनंतर्भावितत्वात् तथाप्यत्रे विशेषणवर्णानांनामवर्णेभ्योवहिर्भावस्यस्पष्टमाविर्भावनीयत्वा
च्च तन्नामवर्णाकाःसप्तषष्ठिः६७ भवतिरघूत्तमनामापुत्रः श्रीमत्पदवर्यस्य यःसंख्ययापिकांन्याधन्नेकंदर्पमानत्वं तन्त्रा
पूरयेन्मध्यकोष्ठादिगणनाक्रमभेदतः साध्यसाधकयोर्वर्णान्रविभक्तान्शिवाहतान् कोष्ठपंक्तेःप्रथमतोम
ध्यतोवैसमालिखेत् साध्यमन्त्रविजानीयाद्देवीश्रीवनदुर्गिका द्रवोक्तैर्गंधद्रवजलैः पदार्थैःसंलिखेद्बुधः धार
येद्दक्षिणेवाहौप्रुडदेवाथवाप्रिये धारणाद्यंत्रराजस्यभयंनैवप्रजायते इदंयंत्रंवरारोहेनगजोऽयनाशनं
गोप्यंत्वयाप्रयत्नेनदेयंपुत्राययार्वति ९२ इतिवनभयापहयंत्रं (मवर्णाकाएकोनपंचाशत्४९ तयोर्योगेषो
डशाधिकशतांक:११६ तस्यैकादशभिर्गुणनेषट्सप्तत्यधिकद्वादशशतांक:१२७६:संपद्यते तत्रद्वादशभिर्भागेहृतेचतु
रंकोवशिष्यते यद्यपिद्वाभ्यांभागहरणानंतरमेवगुणनाद्यानसंभवतिचकिंहिवत्तनंनकरोतीतिन्यायेनयोगांकस्येवद्वा
दशमष्टावशेषस्यैकादशभिर्गुणनेनपर्यवसितंसंख्याकस्यकोष्ठस्याभिनिवेशनं तथाप्यन्यत्रसर्वत्रहृतावशिष्टस्यैव रम: ३७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कोष्ठाभिनिवेशन दृष्टो नाहिहापि तथैव तात्पर्यमुन्नेयं शिवहतानृरविभक्तानित्यादौ तु छंदोभंगः स्यादिति स्वलेन भिधानमिति नील
कंठाईनामभिप्रायः शिवार्काभ्यां हतान् शिवघ्नान् रविभाजितान् इत्याधान्तु पूर्वोसर्वतस्य भगवतोकरणाबीजां तरासंभवेन यथा
क्तार्थ एव तात्पर्यमिति तट्ठुरवलाः न देवमव शिष्टस्य चतुरादेरं कस्य प्रथमायाः कोष्ठपंक्तेर्मध्यतो मध्यकोष्ठे द्वितीयको
ष्ठे वै निश्चये नन्या संकल्यानंऽउत्तरमभ्यादिगतिप्राप्तकोष्ठेष्वेकैकक्रम्याद्वेयुगपाद्दिनावाप्राप्तांकात्र्यसेत् मंत्रीमंत्री द्वय
मिति मंत्री मंत्री इत्येतन्न स्वरूपं यं द्वयमित्यर्थः द्वितीयमंत्रिपदस्य समस्तत्वेनु प्रथमं मंत्रिपदं परये दित्यत्र वश्यापेक्षितक
र्तृपरं एतदुपादानस्यावश्यकत्वे वीजं पुनरग्रे वक्ष्यामः अतएवायमंत्रिपदमनुवादार्थमिति नीलकंठोक्तिः प्रत्युक्ता गजो
मंत्रीतुरंगश्चेत्यं तद्यथेनफलकेलिख्नप्रकारं यंत्रस्य प्रतिपाद्य पूर्वरीत्यान्तत्र कोष्ठेषु प्राप्तानामेव तत्तदंकानां धारणीयत्व
र्जं पश्चाद्दोष रणाप्रकारमादर्शयति इयेनेत्यादिना गणानां क्रमभेदतः अंकानामेक द्वित्र्यादिरूपगणानां क्रमस्य भेदं त्यागं स्वी
कृत्य लोकसिद्धांक गणनाक्रमं परित्यज्येति यावत् मध्यकोष्ठादिमध्यमं पंचमं कोष्ठं समारभ्य इयेन परयेदित्यत्र विशेषानुपा
नेन प्रथमकोष्ठस्यावधित्वं वध्यते तथा च प्रथमकोष्ठादभ्यगत्याप्राप्तेष्टमे कोष्ठे परयेत् वस्तुतस्तु रिक्तकोष्ठस्यैवावधित्वं
सामर्थ्यादवगम्यते नहि प्रथमस्य रिक्तत्वं किंतु तृतीयस्येति ध्येयं चरमांकमध्यमकोष्ठं न्यसेदित्यर्थः परितः पूर्वादितः द्वितीय
कोष्ठमारभ्येति यावत् क्रमात् अभ्यादिगतिप्राप्तकोष्ठक्रममनुसृत्य अत्राभ्यादिगतिश्च पूर्वकोष्ठं द्वितीयकोष्ठात्मकमारभ्यै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मल्लाद ३८

वरएतदपिप्रादक्षिण्येन मंत्रीमंत्रिद्वयमिति अतः परमिममनेनैव पूरणोर्थान्तरमुक्तं तथा हि आद्यमंत्रिपदेन द्वितीयकोष्ठतो मंत्रिगत्याप्र
प्तचतुर्थकोष्ठः अतःपरं मंत्रिगत्याप्राप्तचतुर्थादिकोष्ठमारभ्यनतु एर्वविदिहादि द्वितीयकोष्ठस्यावधित्वं अतएवाश्वोश्वइत्याद्य
गतिस्थलेतः परमित्यनुपात्तं तथा वाश्वोश्वश्च गजो मंत्रीत्येव प्रथमपादांतं द्वितीयकोष्ठावधित्वमेवसर्वत्र तदुत्तरं तुनतप्राप्तको
ष्ठानामेवतथात्वं नत्वेवं गजो मंत्री तुरंगश्चेति तृतीयपादः कथमगच्छते मंत्रिपदप्राप्तषष्ठकोष्ठात् गत्वा कस्यापि कोष्ठस्य सं
ग्रहासंभवात् ततावतं चमः समसंग्रहीतुं शक्यः तस्यपूर्वमेवपूरितत्वात् अतएव न नवमः नापि तृतीयः तदुत्तरं मंत्रिगतप्रा
प्तकोष्ठस्यांकभूयस्त्वाभावेनचरममंत्रिपदस्यागत्यापत्तेः तदुत्तरं हयगत्या प्राप्तकोष्ठस्यैव तुर्लभत्वयानदसंगत्यापत्तेश्चेति
चेत्सत्यं षष्ठकोष्ठपूरयित्वांकपूर्णस्यापि पंचमकोष्ठस्य गजगत्या प्राप्तस्य स्पर्शाकृत्वात तो मंत्रिगत्या प्राप्तं तृतीयं कोष्ठं पूर
येत् ततश्चायमश्वगति प्राप्तस्याष्टमकोष्ठस्य पूर्णत्वमेव ईशानकोणकोष्ठादश्वगतिप्राप्तकोष्ठस्यैव पूरणेन समाप्तेः पू
र्वमभिधानमपिदुर्घटं ईशानकोष्ठस्यापि पूर्णत्वात् तथापि प्रथमकोष्ठं स्पृष्ट्वाष्टमं कोष्ठं स्पृशेत् तेन हयेन परिपूरयेदिति ग
जोमंत्री तुरंगश्चेतिचसाधुसिद्धं तदयं निर्गलितार्थः पूर्वरीत्या प्राप्तं तत्तदंकं प्रथमतः पंचमेत तो द्वितीयसप्तमनवमप्रथम
चतुर्थाष्टमषष्ठकोष्ठेषु ततः पंचमांकं स्पृष्ट्वा तृतीये विन्यस्य प्रथमस्थं स्पृष्ट्वाष्टमस्थं स्पृशेदिति अतएव नीलकंठः प्रथमं तावत्
चमेन पंचमं ततः प्रथमेन द्वितीयं द्वितीयेन सप्तमं चतुर्थेन नवमं षष्ठेन प्रथमं सप्तमेन चतुर्थं नवमेनाष्टमं तृतीयेन षष्ठं

सपः ३८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मध्येपंत्तसंस्थस्थाष्टमेन न्तनीयंचाद्यर्थ्यप्रथमस्यं षष्ठसंस्थस्थाष्टमस्यं नवमंसंस्थशेदिति इदमत्र प्रतिभाति पंचमकोष्ठस्पस्यशेंकिं
प्रमाणा नताबऊजपदअनेनन्ततीयकोष्ठस्याणुपादानुंशम्यत्वात् नवमंत्रिपदमसमंजसं पूर्वमतेआद्यपदिविहायितृतीयंकर्तं
परतयाहितेयं अभ्योभ्वइत्यादिपदानां स्वस्वगतिप्राप्तकोष्ठपराणामंतेस्तेषुपूरयेदित्यस्यापशमध्याहार्यतयातत्र चकर्तदप
दाकांक्षायाभावश्पकत्वात् किंचतृतीयकोष्ठादेवहयहत्याष्टमपूरणासंभवात्निर्मूलं प्रथमंस्थस्थाष्टमंस्थशेदिति आद्येयको
ष्ठादेवहयस्यानभूतेष्टमकोष्ठेपूरणासमाप्त्याहयेनपूरयेदितिमूलसौरस्यसंभवात् नहीशानकोणाद्रयस्यातइतिकिंचिद्वल
वन्मूलायातं भतरश्वयंत्रांतरेष्वनाद्दतस्यापूर्वतरस्पर्शकरणापक्षस्यानादरणानोमूलसौरस्यमितिप्रकृतमूलश्लोकेनैवफलके
धारणीयम्भूर्जेपत्रादौचवेधोद्वारःसूचितः इयांस्तुविशेषणेत्युक्तकादौपूरणोआद्यंमंत्रिपदंकर्तदपरंअत्रांतिमंआद्यमंत्रिपदंय
थाकृतमंत्रिद्वयामित्यनेनमंत्रिगतिद्वयप्राप्तषष्ठकोष्ठःसंस्थत्यतइतिरहस्यं तन्न्यासायथा श्रीमल्लेवस्मनामाभूपतिरग्र
माधकः तन्नामवर्णांकास्त्रिपंचाशा ५३ तत्तयोर्योगेष्वुत्तरैकशतांकः १०२ तस्येकादशभिर्गुणनेद्वाविंशत्युत्तरैकादशशतांकः
११२२ संपद्यते तत्रद्वादशभिर्भागेहृतेषडंकोवशिष्यते तस्याद्वितीयकोष्ठेन्यासंकृत्वाएकादिवृद्ध्याद्वैगुण्येनवाभ्यादिगतिप्राप्त
कोष्ठेषुपरांकान्विन्यसेत् फलकेलिखनमित्थंप्रकारेणायंत्रस्याक्षिप्य पूर्वोक्तरीत्याधारणीययंत्रेपंचमादिकोष्ठमारभ्यपूरणं
स्वीकरणीयं तन्न्यासायथा इतिवनभयापहयंत्रम् अथशांतावेवयंत्रांतरमाह अथेत्यादि वक्ष्यइतिप्रतिज्ञा अवधारणेकथन

९ ४ ११   २४ ४ ३२   ९।५।४।२।११।८   ११ ८ १३   ३६ ६ ४८   ११।५।६।२।१३।९
१० ८ ६   २८ २० १२   १०।६।८।१।६।८   १२ १० ८   ४२ ३० १८   १२।६।१०।१।८।८
५ १२ ७   ८ ३६ १६   ५।३।१२।७।१।४   ७ १४ ९   १२ ५४ २४   ७।३।१४।७।९।४
फलकयंत्रं फलकयंत्रं   पूरणयंत्रं   फलकयंत्रं   फलकयंत्रं   पूरणयंत्रं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

निष्फलत्वापत्त्यावधारणांऽऊर्ध्वमाह संप्रतीत्यादि सांप्रतं नेयवञ्चितं कृत्वावधारयेत् इति वाक्यां तरमतो न पौनरुक्त्यं साध्य मन्त्रललिता तन्नाम
वर्णांकाश्चतुस्त्रिंशत् ३४ एतु नारायणनामा राजकुमारो जयति षष्ठः आजन्मार्जितदुःखध्वांतरविरिवहियन्नाम असावत्र साधकः त
न्नाम वर्णांकास्त्रिसप्ततिः ७३ तयोर्योगे सप्तोत्तरशतांकः १०७ तस्य नवभिर्गुणने त्रिषष्ट्यधिकनवशतांकः ९६३ तत्र पंचभिर्भागे शेषांकः शि

अथ वक्ष्ये महेशानि विषनाशकरं परं यंत्रं संप्रति नेयवञ्चितं कृत्वा तदवधारय विषाणि तत्र भेदानि स्थावराणि चराणि च लूता
विषं सर्पविषं वृश्चिकस्यापि यद्विषं व्याघ्रजं वृक्षजं चैव विषं नाशयते ध्रुवं हयो हयो गजो मंत्री मंत्री चैव तथा गजः हयो
हयः क्रमादेतान् विलिखेन्मध्यकोष्ठतः साध्यसाधकयोर्वर्णान् नवघ्नान् पंचभाजितान् विलिखेन्मध्यतो देवि शुद्धवीत्ताल
क्रमागतः साध्यमन्त्रं महेशानि ललिता परमेश्वरी अष्टगंधैस्तु पत्रे वा कृत्वा विलिख्य परमेश्वरि धारयेद्यंत्रराजं तु विधिना
साधकोत्तमः इदं यंत्रं विषहरं नानाजातिसमुद्भवं हरते धारणाद्देवि सत्यं सत्यं न संशयः १०० इति विषहरं यंत्रं द्वाविंशति

ष्यते तस्य द्वितीयकोष्ठे लिखनं कृत्वा तदुत्तरमेकैकं कदर्ध्वाधेतु सपादिना वाभ्वगत्या प्रदक्षिणातिरिक्तक्रमेणाशे
षकोष्ठेष्वंकान् क्षिपेत् ततः पंचमकोष्ठमारभ्य क्रमेण चतुर्थकोष्ठपर्यंतं स्वस्वप्राप्तांकैर्यंत्रं पूरणीयं इत्यत्र
त्रत्र प्रायः प्राथमिक मध्यकोष्ठपदं प्रथमपंक्ते र्मध्यमकोष्ठपरं द्वितीयकोष्ठपरमिति यावत् द्वितीयं तु मध्य

८ ३ १० १८ ३ २४
९ ७ ५ २१ १५ ९
४ ११ ६ ६ २३ १२
२१ ४५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पदंसकलयत्रस्य मध्यमं यत्पंचमकोष्ठं तत्परं तत्त्वासोय इति विषहरयंत्रं शांतिकर्मण्येवयंत्रमाह अथेत्यादि षष्ठ्यंतपंचकस्य सिंहा
नामित्यादेर्भयं नश्यतीत्यत्रान्वयः मंत्री पूर्वं मध्यकोष्ठादिहाग्न्योर्ध्वइत्यादिरीत्यावान्नकोष्ठेषु यावदंकस्य पूर्णता तावद्विलिख्य अतःपरं
गुरुदर्शितमार्गतः साध्यसाधकयोर्वर्णान्विलिखेदित्यन्वयः मंत्री साधकः मध्यकोष्ठादिद्वितीयकोष्ठमारभ्य पूर्वं हयश्चान्त इत्या
दिरीत्या विलिख्य अतःपरं गुरुदर्शितमार्गतः पंचमकोष्ठमारभ्येत्यादिकथितरीत्याकिंलिखेदित्यत्राह साध्येत्यादि साध्यमत्र नील

अथकीटहरंवक्ष्येनानाजंतुनिवारणं सिंहानांचित्रकानांतुनराणांचविशेषतः नागानांचविषोल्वाणांनानालूतादिसंभ
वं शरभाद्वतथाकोलाद्वृश्चिकाद्वयदुःसहं सर्वंकरादिसंभूतंभयंनश्यतितत्क्षणात् हयश्चाग्न्वस्तथानागोमंत्री मंत्री च भा
मिनि नागश्चैकोहयश्चंद्वंमंत्री पूर्वमतःपरं मध्यकोष्ठादिसंलेख्ययावदंकस्यपूरणं साध्यसाधकयोर्वर्णान्सप्तप्रान्सप्त
भाजितान् विलिखेत्परमेशानिगुरुदर्शितमार्गतः साध्यमत्रमहेशानिदेवीनीलसरस्वती पूर्वोक्तैरष्टगंधैश्चविलिखेन्मं

सरस्वती तन्नामवर्णांकाश्चतुःषष्ठिः ६४ मातचंडवलिकरासिमुद्रक्षिप्यनंगयुगावानितिकिंवा सप्तम्यःक्षितिपनेस्कककुमारश्चीरमेशाउ
दितश्चरमेशः सस्वात्रसाधकस्तन्नामवर्णांकाएकोनचत्वारिंशत् ३९ तयोर्योगे त्र्यधिकशतांकः १०३ तस्य षड्भिर्गुणाने स्टादशाधिक
षट्शतांकः ६१८ तत्रसप्तभिर्भागेहृते ष्वंको वशिष्यते ७ २ ९ १२ २ १६ तस्यद्वितीयकोष्ठे लिखेन प्रभृतिकं सर्वं पूर्ववत् मनुष्येभ्यः

८	६	४	१४	१०	६
३	१०	५	४	१८	८
१८				३०	

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मल्लाद
४०

शठाय भक्तिहीनाय दांभिकाय गुरुद्रुहे इत्याद्युक्तदोषवज्जः प्रेयसे सर्वदोषभ्रष्टयन्येसति प्रीतिपात्राय तन्न्यासो इतिकीटभ
यहरं यंत्रं शांतावेवयंत्रांतरमाह अथेत्यादि परमकारणं शरीररक्षादिद्वारा परमपुरुषार्थसाधनं नानाकूटहरमितिना
म तान्किंडित्यडवित्यादिवत्पूढं नेत्याह कूटेत्यादि तथाचयौगिकं योगरूढं वेदं नामेत्युक्तं कूटछलं वञ्चन पर्यायं कापट्यं
धारयेत्स्वभुजे देवि यथेष्टं विहरेद्वने न भयं जायते क्वापि सर्वत्र समदर्शिनः विचरेत्सकलां पृथ्वीं निर्भयो मानवोत्तम
: इदं यंत्रं महेशानि कीटजन्मभयापहं गोपनीयं मनुष्येभ्यो वक्तव्यं प्रयसे सदा इतिकीटभयहरं यंत्रं त्रयो
विंशतितमं अथवक्ष्ये महेशानि यंत्रं परमकारणं नानाकूटहरं यंत्रं कूटकापघनाशनं शांतिकूटं मित्रकूटं
शत्रुकूटं तथा प्रिये स्त्रीकूटं देशकूटं च निवारयति यंत्रराट् कूटं परकृतं कार्यं कर्मणा देहघातनं हरते यं
त्रराजोसौ नात्र कार्या विचारणा सप्तियुग्मं गजश्चैको मंत्रियुग्मं गजः प्रियेसप्ति द्वयं च देवेशि मध्यकोष्ठक्रमे
कृत्या परैः कृतं कार्यं कर्त्तव्यं च यत्कूटकर्मणा अभिचारकर्मणा कृत्यानुष्ठानत्ववधिरत्नाद्युद्देशिके तिभेदस्तत्से त्यसप्तिर
ध्व रः मध्यकोष्ठ इत्यादेः पूर्ववदेवार्थः साध्यमत्र सुस्फुटं तन्नामवर्णिकाः षोडश १८ श्रीमन्नृपालतनयादरिमर्दना
रव्यादभूज्जनो गुणइवात्र सुधांशुदेहात् यः शत्रुसूदनपदेन गतः समृद्धिं सस्यादरातिमथनेन यथार्थनामा सोत्रसा

राम:
४०

धकः तन्त्रामवर्णाका अष्टपंचाशत् ५८ तयोर्योगेचतुःसप्ततिः ७४ तत्रैकादशभागाभिः पूर्वभागंहत्वापुनःसप्तभिर्भागंहत्वा
अवशिष्टांकस्यकस्यवतं द्वितीयकोष्ठेविलिख्यशेषमशाषंपूर्ववत् एकावशेषेद्वाद्विपक्षेद्वैगुणादिपक्षेवांकवैषम्याभा
वादेकवैकयंत्रं तन्न्यासोयथा इतिनानाकूटहरयंत्रं अथशांतावेवयंत्रांतरमाह

विलिखेत्परमेशानि ममसार्गविचक्षणाः साध्यसाधकयोर्वर्णान्विभज्यरसपंचभिः सप्तभिस्तहरेद्भागंशेषंको
ॐ ष्ठेप्रविन्यसेत् साध्यमत्रमहामाया सुसुखीसुसुखार्थदा कोष्ठपंक्तेःप्रथमतोविलिखेत्सुरवंदिते पूर्वोक्तैरष्टगं
धैस्तुविलिख्यचशुभेदिने धारयेद्दक्षिणेवाहौमूर्ध्निकण्ठेथवाप्रिये इदंयंत्रंसुरवरेमयाभुवनरक्षया धारितं
धार्यतेलोकेःसिद्धिकामार्थसिद्धये १२ इतिकूटहरयंत्रं अथवक्ष्येमहादेविलूताविस्फोटनाशनं यंत्रराजंसुरानं

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथवक्ष्येमहादेविलूताविस्फोटनाशनं यंत्रराजंसुरानंदेअधुनाप्रकृतंभ्रमात् लूताविषंप्राणाहरंनानाव्याधिविधायकं
असाध्यंतुमहादेविलूताविस्फोटसंज्ञकं छिसप्तरसनंदेषुवाराग्न्येवेदसंमिते तृतीयेचाष्टमेदेविविलिखेद्देशिकोत्त
मः साध्यसाधकयोर्वर्णान्संयुतान्परसपंचभिः नंदाग्निनाभाजयित्वाशेषंकोष्टेषुसंलिखेत् साध्यमत्रवरेशानिकुरुकु
ल्लावराधिका मध्यकोष्ठस्थपंक्तौरुक्तौविलिखेत्तानवान्नरः पूर्वोक्तैरेवतैर्द्रव्यैर्विचित्यप्रतिपादितैः लिखित्वायं
त्रराजंतुधारयेत्कंठदेशतः इदंयंत्रंमसुद्दिष्टंलूताविषहरंपरं गोपनीयंप्रयत्नेनजननीजारवत्प्रिये २४
इतिलूताविषहरंयंत्रम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शांतोयंत्रांतरमाह ज्वरेत्यादिना नेत्रेइत्यादिनान्यासोपिअभ्योष्वष्वेत्यादिकथितन्यासस्रमानकक्ष एव पंक्तिकोष्ठविभेदतः इति वात्र विशेष
: चरमपंक्तिस्थमध्यमकोष्ठप्राप्तांकप्रतिलोमक्रमेणेति हितदर्थः तथाचाष्टमकोष्ठप्राप्तांके नद्वितीयकोष्ठं पूरयित्वा तदुत्तरक्रमेणा
परकोष्ठेषंकान्लिखेदितिफलितार्थः साध्यमत्रभैरवी तन्नामवर्णाकाएकत्रिंशत् ३१ रविनारायणनामापुत्रःश्रीशत्रुशालस्य रविनारा

ज्वरदाहहरंयंत्रंनानोपद्रवनाशनं एकाहिकंद्व्याहिकंचत्र्याहिकंतुमहाज्वरं चातुर्थिकंपांचमिकंमास्यंषाण्मासिकंतथा वा
र्षिकंपित्तजंचैवकफजंवातजंप्रिये सन्निपातंमहाघोरंकृत्याराक्षसम्भवं ज्वरंनाशयतेशीघ्रंयंत्रराजःसुरेश्वरि नेत्रेषुनो
रसेनंदेवाराशुविचतुर्थके तृतीयेचाष्टमेदेविविलिखेत्कोष्ठमध्यतः साध्यसाधकयोर्वर्णांस्त्रिघ्नान्पंचविभाजितान् विलिखे
त्परमेशानिपंक्तिकोष्ठविभेदतः साध्यमत्रमहेशानिभैरवीत्रिपुरेश्वरी उक्तक्रमेणगंधाद्यैर्विलिखेद्यंत्रनायकं धारयेन्म
शिवंधेतुदक्षेवाहौवरानने सर्वेज्वराःपलायंतेसिंहंदृष्ट्वायथागजाः इदंयंत्रंज्वरहरंमयाप्रोक्तंवरानने उपकारायलोका
नांसाधूनांचहितायवै गोप्यंत्वयासदाभद्रेसाधुभ्योनैवगोपयेत् ३२ इतिज्वरहरयंत्रंषड्विंश

(यगानेजावोम्हयान्त्वहरिकरु

णानः सोत्रसाधकः तन्नामवर्णांकाःषट्सप्तति७६ तयार्योगेसप्ताधिकशतांकः१०७ तस्यत्रैगुण्येएकविंशत्यधिकत्रिशतांकः३२१ तत्रपंच
४ ९ २ भिर्भागेएकांकोवशिष्यते तस्मान्नवमांकस्यद्वितीयकोष्ठेन्यासंकृत्वाप्रतिलोमततस्तदुत्तरांकान्पुन्यादिषुकोष्ठेषुन्यसेत् परशांपंच
३ ५ ७
८ १ ६
१५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मन्त्रार्द
४२

अथशांतिकर्मणियंत्रांतरमाह ॐष्टेत्यादि ॐष्टरोगहरमितिनाम साध्यमन्त्रविरजा तन्नामवर्णाका अष्टत्रिंशत् ३८ कलिमर्दननाम्नो
ऽपिऊनोनाम्नाहयग्रीवः भवतुहयग्रीवकृपावशेनतत्त्वहवस्त्वाप्यः सोत्रसाधकः तन्नामवर्णाकाअष्टचत्वारिंशत् ४८ तयोर्योगे षडशीतिः ८६
तस्यवतुर्भिर्गुणनेचतुश्चत्वारिंशदधिकत्रिशतांक ३४४ तस्य षड्भिर्भागहरणे लब्धांकोवशिष्टस्तस्यद्वितीयकोष्ठेन्यासंकृत्वातदुत्तरमेकादि

ॐष्टरोगहरंयंत्रंध्वेत्यकायकरां तकृत् रूपहानंनरंदृष्ट्वामयाचिंतमनुकंपितं तदर्थंतुमहायंत्रंकल्पितंप्राणिनोहितं ब्रह्म
हत्यादिपापैस्तुजायतेव्याधिसंभवः तन्नाशकंवरारोहे यंत्रराजमिमंशृणु करोमुनोरसेचैवनवमेपंचमेप्रिये प्रथमेच
चतुर्थेचन्तृतीयेचाष्टमेप्रिये कोष्ठस्यपंक्तिभेदेनविलिखेत्कुरुतोदितः साध्यसाधकयोर्वर्णान्वेदघ्नान्त्रसंभाजितात् शे
षांकतःसमारभ्ययंत्रराजंलिखेत्सुधीः साध्यमन्त्रंशुभेभद्रेविरजानामदेवता पूर्वोक्तैरेवसद्द्रव्यैर्लेखनीयंप्रयत्नतः धा
रयेद्वक्षमादेवियत्रकुत्रभवेत्प्रिये तत्क्षणान्नाशमायातियंत्रराजस्यधारणात् वक्तव्यंसाधवेदेविस्वजवेदंभवर्जिते
दुष्टायभक्तिहीनायनवक्तव्यंकदापिच इदंयंत्रंमयाप्रोक्तंसद्यःप्रत्ययकारकं ४१ इतिकुष्टहरयंत्रं

ह्यग्रीवे ५ १० ३ ८ १८ ५ गुणापादिनावाशुन्यादिकोष्ठान्पूरयेत् कोष्ठस्यपंक्तिभेदेनेत्यनेनयंत्रपूरणोज्वरहरयंत्रवदेवाष्टमकोष्ठप्रा रम्भः
नाकमा ४ ६ ८ ६ १० १४ रम्यविलोमक्रमेणद्वितीयादिकोष्ठान्पूरयेतइत्युक्तं तन्न्यासोयथा इतिकुष्टहरयंत्रं ७ ४२
९ २ ७ १६ २ १२
१८ ३०

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शांतावेवयंत्रांतरमाह   अथचिंताहरंवक्ष्ये प्राणिनांधर्मशालिनांमित्यादि चिंताहरणांचविनापितत्तत्कार्यसिद्धिं मनसो विवेक वैराग्या
दिसिद्धापिसंभवतीतिभावस्तथाचयंत्रतस्तत्तत्कार्यसिद्धिरावश्यकीतितत्तत्कार्यसिद्धावेवविशेषनिर्वंधस्तांनानेनगतार्थतेतितत्तत्कार्यक
रयंत्रारायवश्यवक्तव्यान्येवेतिनतद्वैयर्थ्यं दर्शितरीत्यैतद्यंत्रानुकूल्यमभजतांचतत्साफल्यमव्याकुलं साध्यमत्रभवानी तन्नामवर्णा

अथचिंताहरंवक्ष्ये प्राणिनांधर्मशालिनां धातुचिंताम्लचिंताचिंतायाजीवसंभवा देशचिंताराज्यचिंता पुत्रचिंता तथाप्रि
ये नाशयेद्यंत्रराजस्तनात्रकार्याविचारणा गरुपर्वततर्केषुनवपंचाद्रिभेषुच गुर्यन्ततीयकोष्ठेषुवसुसंख्यांलिखेत्क्रमा
त् मध्यकोष्ठविभेदेनतत्रइष्टेनवर्त्मना साध्यमत्रमहेशानिभवानीभवतारिणी साध्यसाधकयोर्वर्णान्दशगुणपा
न्विभाजितान् त्रयोदशैःपरेशानिशेषंकोष्ठेप्रविन्यसेत् अष्टगंधैःपुरोद्दिष्टैर्विलेख्यंमंत्रमुत्तमं धारयेद्हृदयेदेवि
नानाचिंताहरंभवेत् गोपनीयंप्रयत्नेनसर्वथावीरवंदिते नाभक्तायप्रदातव्यंनिंदकायशठात्मने इतितेकथितं
यंत्रंसर्वचिंताहरंपरं महाद्भुतंमहाकालित्रिपुरासुरनाशिनि चिंताहरंयंत्रं

(कास्त्रयस्त्रिंशत् ३३ मंगलागंडकी
संगमेपुण्यदेशेभक्त्यासाधुभिर्दर्शितेनाध्वनेव यःकिलेमापतेर्यावतंसप्रचक्रे तन्मलैवम्मतोनित्यसौख्यानुरूपधी सस्यवा
नसाधकःतन्नामवर्णाकास्त्रिपंचाशत् ५३ तयोर्योगेषडशीतिः८६ तस्यदन्ताभिर्गुणानेषष्ठ्यधिकाष्टशतांकः८६० तत्रत्रयोदश

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मन्त्राद ४३

भिर्भागे हृतेऽथ्यंकशिष्यते तस्य मध्यकोष्ठविभेदेन नवकोष्ठात्मकेष्व कस्मिंस्त्राशौ मध्यमकोष्ठत्व प्रथमकोष्ठत्व ७ २ ९ १२ २ १६
सप्तमकोष्ठत्वादिकं परिकल्प्य द्वितीयकोष्ठे न्यासं कृत्वा सप्तमादिष्वप्येकैकवृद्ध्याङ्केषु राण्यास्मिन्नागपूर्ववन्न्यसेत् ८ ६ ४ १४ १० ६
तत्त्वामेौ इति चिंताहरमष्टाविंशा अथ सर्वप्राणिनां संसारतारणार्थं मोहमानः परमकारुणिको भगवान् श्रीशि १० ५ ४ १८ ८
वोपवर्गकरं वश्यकर्मण्येवानर्घ्यतं यन्त्रमाह अथात इति अत्र साध्यं वैष्णवीनामशक्तिः तन्नामवर्णका अष्टाविंशतिः २८ १८ ३०

अथातः श्रृणु देवेशि यंत्रं मोक्षकरं परं ऋषीणां तापसानां तु मुनीनां योगिनां प्रिये विरक्तानां गृहस्थानां धर्मशी
लविलासिनां हितार्थं कथ्यते देवि यंत्रराजमिदं ष्टराफ भुजे शैले रसे नंदे पंच मे प्रथमे तु वौ वह्निगजे सुरे शास्त्रि
विलिखेत्तंत्र मार्गतः साध्यसाधकयोर्वर्णान् रसघ्नान्स त्रिभाजितान् मध्यकोष्ठविभेदेन विलिखेत्सुरवंदिते
साध्यमत्र महारौद्रे वैष्णवी शक्तिरुत्तमा पूर्वोक्तैरष्टगं चैस्तु विलिखेत्सुरसाधिके धारयेत्कुस्यं रक्षेत्तु शिखाग्रेवा

कस्मात्स्ववर्गैस्त्रिदशाः समस्ताः शिलास्वरूपा विहिता हि तानः इतीव वध्नाति हि गाढ कोडाकृष्णी मान्मलैवस्म न्टलोकशा
स्ता सोऽत्र साधकः तन्नामवर्णका स्त्रिपंचाशत् ५३ तयोर्योगे एकाशीतिः ८१ तस्य षड्गुणने षडशीत्यधिकचतुःशतं रामः
कः ४८६ अत्र सप्तभिर्भागे हृतेऽथ्यंकः शिष्यते तस्य द्वितीयकोष्ठे न्यासं कृत्वा शेषमंशेषं पूर्ववत् सकलसुखहृद्रामेवह्न ४३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भेनत्रिनेत्ररहस्सिसमुपनीतोगंडकीनामवध्वा: भवसिकिमितिविघ्नंतत्रयातातपरस्तादितिमहलवसंतामंगलांकिंवर्वं
ध सात्रसाधकतामायाता तन्नामवर्णांकास्थकोनसप्तति: ६९ तयोर्योगेसप्तनवति: ९७ तस्यषड्गुणानेचा शीत्यधिक
८ ३ १० ६ १ ८ पंचशतांक: ५८२ तत्रसप्तभिर्भागेस्यकांक: शिष्यनेतस्यद्वितीयकोष्ठेन्यासंकृत्वाशेषंपूर्ववन्नस्वरणीयं अत्रा
९ ७ ५ ७ ५ ३
४ ११ ६ २ ९ ४ धारणाद्यंत्रराजस्यमुक्तोभवतिमानव: इदंयंत्रंमयाप्रोक्तंयथार्थफलदंप्रिये मार्कण्डेयायसंदिष्टं
२१ १५
पूर्वंतस्वात्तुनास्थतं गोपनीयंत्वयासम्यक्तवंत्रश्रेयसोच्छ्या स्वयंगम्यंतानगम्यंयंत्रराजंहितंमम इतिमो
क्षकरंयंत्रं अथसम्यक्प्रवक्ष्यामियंत्रंमंत्रमयंपरं वंदिमोक्षकरंयंत्रंप्राणिनांहितकारकं राजद्वारगतानां
तुवंदिनांचौर्यकारिणां परस्त्रीधर्षकाणांतु परद्रव्यापहारिणां हितकारिमहायंत्रंसुखकीर्त्तिकरंपरं

पिकथितरीत्यापंचम्प्रकोष्ठादिकमेवयंत्रस्पूरणमितिनविस्मर्यतोक्तमेणोदाहरणान्यासो मोक्षकरंयंत्रमेकोनत्रिंशं
अथशांतिकर्मणियंत्रमुपदिशति अथेति साधमत्रचाद्रुगाऽ तन्नामवर्णांकास्त्रिचत्वारिंशत् ४३ योलीलयैवसक
लामरराजमौलिरत्नानिनैजभक्तिकर्मच्छनेददाति तंरावणांघ्रिहितपुष्यमिवाकरोद्य: कारान्टहेकमपितंभजहेहयेशं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सराचरगोत्रसाधकः तन्नामवर्णाकास्यकचत्वारिंशत् ४१ तयोर्योगे चतुरशीतिः ८४ तस्मात् भिर्गुणाने द्विसप्तत्यधिकषट्शतांक ६७२
तत्रैकादशाभिर्भागे हृते शेषांकः १ शिष्यते तस्मात् द्वितीये कोष्ठे न्यासः तदनन्तरं चैकैकस्मात् क्रमेण गणपादिनावास नमादिको ष्ठे षंका
न्यसेत् एवं रीत्या तत्तत्कोष्ठेषु प्राप्तांकाः पंचमकोष्ठादिकमतः पूर्ववदेव यंत्रेषु विन्यस्याः एतद्यन्त्रस्यानुभूतफलमाह
शायेन्दुनेरसेचांकेपंचमेप्रथमेप्रिये चतुर्थे च तृतीये च गजत्र संख्या लिखेत् सुधीः साध्यसाधकयोर्वर्णानुगजभा तु
ङ्भाजितान् विलिखेन्मध्यकोष्ठादि पंक्तिकोष्ठस्य भेदतः साध्यमन्त्रमहेशानि चाष्टरसा वरवाहिनी दूर्वादितैर्घ्यते
र्द्वैर्यथास्वं परिकल्पितैः लिखित्वा धारयेद्यंत्रं बंदीमुक्तो भवेन्नरः देयं शान्ताय दान्ताय दयालवे परायच राज्ञे
वसुखिने देयं यंत्रराजं सदानघे न देयं निंदकायापि कृतघ्नायानसूयवे इति ते कथितं भद्रे यंत्रराजं मनोह
रं बंदीमुक्तिकरं येन तज्जवरागायार्पितं पुरा बंदिशालांगतायापि सहस्रार्जुनमंदिरे इदं गोप्यं पुराणकरं उःखं
दंतु प्रकाशितं बंदिमोक्षकरं यंत्रं इति श्रीशिवताण्डवे नवकोष्ठकयंत्रकथनो नाम त्रयोदशः पटलः

रावणोत्पादि सहस्रार्जुनस्य नतु यस्य कस्यापि निर्बलस्य बंदिशालांगताय नतु मार्गादौ मिलिताय तथा च उक्तरमपि बंध
मोक्षमेव यंत्रराजः साधयेदिति सूचितं तस्यासौ इति शिवताण्डवटीकायां मन्त्रार्दर्शाभिधानायां त्रयोदशो नवकोष्ठ

६ १ ८
७ ५ ३
२ ९ ४

६।६।१।१।८।८
७।७।५।५।३।३
२।२।९।९।४।४

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथषोडशकोष्ठकयंत्राणिप्रदर्शनीयानितत्रशंतेः प्रथमोद्दिष्टतयातत्प्रयोगमादावुपदिशति   कोष्ठेत्यादि विबुधैर्विशेषे
णयंत्रशास्त्रविज्ञैर्याक्रियाइति कर्त्तव्यताक्रियतेस्वीक्रियते तांकथयिष्ये त्वंमावधानतःसमाधानचेताःसतीश्रृणुष्वे
त्यन्वयः महाप्रत्ययकारकमितितुकथयिष्यइतिक्रियाविशेषणंअतएवद्वितीयांतं। यदामहाप्रत्ययेत्यादियंत्रमित्ये

कोष्ठषोडशकानांतुभ्रमक्रमभंडेपरांक्रियां क्रियतेविबुधैर्याहितांसमाधानतःपरं कथयिष्येवरारोहेमहाप्र
त्ययकारकं विशेषतःकलियुगेगाप्तव्यंसर्वथाविके दारिद्र्यशमनंयंत्रंडःखिनांप्रीतिकारकं श्रियोविपुल
तामिद्धन्सःसाधयेद्यंत्रनायकं निधिदंरत्नदंचैवस्वर्णादंरौप्यदंप्रिये देयंनासाधवेभंडेसदाभक्तविधायकं
भादेषोडशकोष्ठानिकृत्वासाधकसत्तमः साध्यसाधकयोर्वर्णानेकीकृत्यदलीकृतान् अंकीकृत्यततोभंडे
विषमेसार्द्धहानकं समादेकेनवाभ्यन्यंकर्त्तव्यंतंत्रचोदितं शानंशिवपदेशानंतानंगोकुसुरानन

नद्विशेषणं यंत्रमित्यपिकथयिष्येइतिक्रियायाःकर्मतयाचेति नकेवलंदारिद्र्योपशामकमात्रमेतत्किंतुमहालक्ष्मीवृ
द्धिमपिनिधिरत्नस्वर्णरौप्यादिदानद्वाराकुरोतीदंयंत्रमतःश्रीवृद्धिकामोपियंत्रमेतत्साधयेदित्याह श्रियोविपुलेत्यादि
नाएतत्यक्षेवश्यकर्मणापस्यांतर्भावः कोष्ठादेःसंभवतीतितत्प्रतिषेधयति आदावित्यादिनासाध्यमत्रत्रिपुरा तन्नामव

निधर्वमधिपिवापापंकालेसवनमार्गेफिम्पविशेषविवं

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्णांकास्त्रिपंचाशत् ५३ तयोर्योगे एकोननवतिः ८९ तस्यार्द्धं साचतुश्चत्वारिंशत् ४४ ततोर्द्धं परित्यज्य चतुश्चत्वारिंशत्यात्र मादेयं
एवं यं त्रसप्तदशादिरूपो विषमांकः साध्यसाधकर्णांकयोगांकार्द्धभूतः स्यात्तत्रैकं त्याज्यं यत्र तु सार्द्धसप्तदशादिकं तदर्द्धभूत
न तत्र सार्द्धैकं त्याज्यं तदेतदाह विषमे सार्द्धहीनकमिति समादिति समभूतांकादुपरियावानधिकभागः स्यात्तावत्सर्वं प
रित्याज्यमित्यर्थः अत एव पंचषष्ठि ६५ षट्षष्ठि ६६ सप्तषष्ठि ६७ चतुःषष्ठिः ६४ रूपांकयोगे सर्वत्र द्वात्रिंशांकस्यैवोपादानं

शेषांकमर्द्धविषमं तु तस्मा रशिवापदैः अनेनविधिना देवि प्रसरणीयं प्रयत्नतः साध्यमत्र वरारोहे त्रिपुराभुवनेश्व
री मध्यकोष्ठविभेदेन पूर्वोक्तैश्चाष्टगंधकैः पूर्वोक्तमान्तकार्णांनालेखनं कारयेत्क्रमात् कण्ठे वा दक्षिणे वा हो
धारयेद्यंत्रनायकं दरिद्रो लभते सौख्यं धनं निधिसमाकुलं इतिते कथितं सौम्ये महादारिद्र्यनाशनं यंत्रवर्यं
मया प्रोक्तं गोपनीयं विशेषतः ११ इति दारिद्र्यशमनं यंत्रं (एकोनसप्ततिः ६९ सप्तत्येकसमत्य ७१ षट्षष्ठि ६६

रूपांकयोगे चतुस्त्रिंशांकस्यैवोपादानं कार्यमित्याह नीलकं ठ तस्मा रशिवा पदप्रतिपाद्यैः क्रमात् शेषांकं न्यूनीकृ
तं योगांकार्द्धभूतसमांकं शान्ततनपदप्रतिपाद्यांकभूतं स्थानेषु न्यसेत् तत्रापि अर्द्धविषमं यथा स्यात्तथा न्यासः स्या
त् एवं चत्वारो प्रदक्षिणाक्रमेण पुनश्चत्वारः सप्रदक्षिणाक्रमेण न्यस्तव्याः रपदप्रतिपाद्यत्वं कस्य नो यथोक्तयोगार्द्धांको

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ष्ठेसाकारोक्तां कन्यूनः स्वसप्तमे त्वकारोक्तां कन्यूनस्क सद्वितीये गुपदोक्तां कन्यूनस्क प्रथमे न्यस्तव्यः अथैतत्क्रमेणोवेतिस्पष्टार्थ
त्तस्पष्टार्थत्वस्य अपुभेत्तुविपरीतमिदंवोध्यं भुवनेश्वर्य्यादीनि विशेषणपदानि तु नामवर्णेषु तन्नभवतीति स्पष्टमेव न
वकोष्ठकयंत्रेषु मध्यमकोष्ठसत्वात्तत्र कामनादिकं सर्वयंत्रसाधारणप्रक्रियाप्राप्तं लेख्यं स्यात् अत्र तु मध्यकोष्ठस्या
भावात्कुत्र तल्लेख्यं आहोस्विन्नैवलेख्यं विहितस्य तल्लिखनस्थलस्याभावादित्याशंकां निराचिकीर्षुराह मध्यकोष्ठविभे
देनेति षोडशकोष्ठकेषु यंत्रेषु चत्वारो मध्यकोष्ठास्तेषां विभेदेन विमिश्रेण सर्वेषां मध्यमकोष्ठानां यथासंबंधः स्यात्तथे
तियावत् लेखनं कारयेदित्यत्र वाक्यान्वयः मातृकाणामिति पूर्वोक्तवीजादिसकलोपलक्षणं तथा चैवं पर्यवसितं
सौः इति जीववीजं मध्यस्थं कोष्ठचतुष्टयं यथास्पृशति तथालेख्यं हंस इतिवीजं सोहमितिवीजं चाद्विद्विकोष्ठस्पर्शि र
मिरेखारूढतयाजीववीजस्य पार्श्वयोर्लेख्यं साध्यसाधकनाम्नी क्रमेण संबुध्यंतषष्ठ्यंते कामप्यवाचकपदं चाद्विती
यांतं क्रियापदं च जीवपदस्यांतर्लेख्यं यत्तु साध्यनामसंबुध्यंतं जीवमध्ये ऊर्द्ध्वरेखारूढशिरस्कतयालेख्यं साधक
नामानि षष्ठ्यंतं जीवमध्यस्याधस्तन रेखारूढशिरस्कतयालेख्यं इष्टवाचकं चाद्वितीयांतं पदं देवतावाचकपदोत्तर
मेव पूर्वरेखारूढशिरस्कतयालेख्यं क्रियापदं चद्विरभ्यस्तं पार्श्वस्थरेखारूढशिरस्कतयालेख्यं अत्रापि सर्वत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४६

मन्त्रा ६

४१ ३८ ५ ४
१ ८ ३३ ५२
३९ ५० ३ ६
७ २ ६३ ३६

मायावीजंकोष्ठानांमध्येप्रत्येकंलेख्यं तदंतःकामवीजंतस्याप्यंतःस्त्रीवीजंतदंतःपर्वरीत्यानिष्पन्नाकालेख्याः तस्याप्यंकस्याभितोगदितदिशाद्या प्र
मातृकावर्णालेख्याः इतःशेषमशेषंनवकोष्ठयंत्रवदेवध्येयं अत्राप्यत्रचवर्णाःसर्वेपिमध्यवीजाभिमुखाःकार्याः मध्यवीजंचस्वाभिमुखं
लेख्यं दारिद्र्यनाशस्योद्देशात्पृथ्वीवर्णा अष्टधाआवृत्ताःअष्टदिक्षुलेख्याः यदिलक्ष्मीवृद्धिःसमुद्देश्यातदावायोर्वर्णाइत्यपिनविस्मर्त्तं
व्यंप्रयोगप्रभावेचेदंअखिलंस्पष्टंभविष्यति त्यास दारिद्र्यशमनंयंत्र विद्वेषकर्मणियंत्रमुपदर्शयति अतःपरमित्यादि परंइतरादि

अतःपरंप्रवक्ष्यामियंत्रंविद्वेषणांपरं साधकानांहितार्थायकथयिष्येतवाग्रतः द्वेषिणांराजहर्तॄणांतथाग्रामापहारिणां
वृत्तिवर्त्तनहर्त्तॄणांतथापैश्चून्यशालिनां महामात्यवशीकर्त्तुराज्ञोजनविलोडनं युवत्योःप्रेमसंगार्थंतथात्र पविकारिणां
सर्वस्वहारिणांभडेविदूषकराणांमत भूत्यंश्चस्यंवाणावेदाश्वंडाष्टोभ्रत्यपरंश्रकं रंध्रंरोकंवह्निशास्त्रेस्वरपक्षौविभूत्यं
कं साध्यसाधककयोर्वर्णानेकोकल्पविधानवित अङ्कीकृतंप्रथमतस्त्वितर्कमुनिवाऊष वाणानुपैंडुनागेषुशेषंसमे

द्वेषणाकर्मप्रयोगापेक्षयासर्गोप्यभिचारेणाफलाधायकतयाश्लेष्टं यंत्रंप्रवक्ष्यामीत्यनन्तरवाग्रतइत्यंतदं[illegible]स्याधिकविधेय
तयाकथयिष्यइतिप्रतिज्ञातंतरंतपौनरुक्त्यदोषमासादयति वृत्तिःसर्वेषांजीवनोपायभूतम्भत्यादिः व[illegible] सांप्रतमेवय राम:
त्सम्यतेस्वस्याजीवनार्थंवनादिनउच्यते राज्ञोमहांतंपरवत्वनानियंत्रितममात्यंवशीकर्त्तुंस्वाधीनीकर्तुंयेपैशून्यभाजस्तेषांस्यं ४६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रात्रोज नविलोडनंजनैः सह विरोधं कर्त्तुं ये पेभ्द्रन्यभाजस्तेषां स्वंतुवत्योः युवाचयुवतीचनयोः परस्परं प्रेमसंगार्थं प्रीतिवृंधार्थं ये पेभ्द्र
न्यभाजस्तेषां अमीषां सर्वेषामपि षष्ठ्यन्तानां विद्वेषकरणमित्यन्वयः अत्र यंत्रनिर्लज्जं यथा स्यात्तथा विकारिणां मदनोन्मत्तानां स्त्री
पुरुषाणामेतेषां च मिलितापकर्त्तृणां परस्परविरोधे सति बलभंगस्य जाततया नापकारकारतासंभवेदिति भावः अंकन्यासप्र
कारं सार्द्धश्लोकद्वयेनाह भून्यमित्यादि रंध्रपदं शोकपदं च भूम्यापरं तथा चानेन सप्तराशिश्लोकेन ज्ञानमित्याद्यर्द्धश्लोककार्यं कृत्वा इ

साध्यमत्र प्रिये देवि तुलजापरमेश्वरी आद्यकोष्ठविभागेन पूर्वोक्तैश्चाष्टगंधकैः विलिख्य यंत्रराजं तु करणेवामतृर्द्धिधारये
त् धारणाद्विषताद्वेषो भवत्येव परस्परं इदं यंत्रं द्वेषणाकं कथितं तव सन्निधौ गोपनीयं त्वया भद्रे स्वयोनिरिव सुंदरि २०
इति विद्वेषणायंत्रं

(सार्द्धमित्यादिरूपज्ञानेत्यादिश्लोकार्द्धकृत्यं सार्द्धश्लोकेन साधयितुमाह साध्येत्यादि अयमर्थः साध्यसा
धकनाम्नवर्णांकराशिं परस्परं मेलयित्वा निष्पन्नांकस्युक्तदिशासमांकरूपाद्र्ता मानीयत्रिनकोष्ठयंत्रांके प्रत्येकं त्रनीकृत्यशेषां
कं भूम्यकोष्ठेषु पूर्ववन्मेलयेत्स्यापयेदिति युग्नसाराशिवापदैरित्यनेनाप्यत एवांकाउक्ताः नीलकंठस्क भून्यं भून्यमित्या
दिश्लोकेन ज्ञानमित्यादिश्लोकार्थउक्तः साध्येत्यादिनातु प्रकारांतरमुच्यते प्रथमेनतः प्रथममारभ्य तत्र प्रथमे त्रयः द्वितीये षट्
सप्तमेसप्त अष्टमे द्वौ नवमेपंचदशमे चत्वारः पंचदशोम्कः षोडशेद्वौ शेषांकपरणांत्वशंकाधिष्ठितकोष्ठाउद्युगन्याद्याप्तकोष्ठे

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वैसाध्यसाधकनामवर्णाकराशैपर्दीकृतसमांकाभिर्न्द्वीकृतस्याप्यः ततःसप्तांकाधिष्ठितकोष्ठात् ततएकांकाधिष्ठितकोष्ठाङ्ऽऽगत्या
प्राप्तकोष्ठे पूर्वरीत्या ततृक्रबांकैर्न्द्वीकृतपरस्परं प्राप्तांकविन्यसेदितिसूत्रे अत्रेदंवक्तव्यंसम्यगिदंप्रकारांतरेणायंत्रमुपदिष्टं
भगवतस्तत्रेहतात्पर्यं तथाहि तत्पैकेन भूम्यमित्यादिश्लोकेनज्ञानमित्यादिसंपूर्णश्लोकार्थः कथमप्युपदेष्टुंशक्यते नवासाध्य
साधकवर्णाकराशैपर्दीकलाभस्ततः कथमपिस्यात् येनभूम्यकोष्ठपूरणंस्यात् किंचप्रथमंकोष्ठमारभ्येत्यर्थकात्प्रथमतद्दय
तः प्रथमद्वितीययोः प्राप्तावपितत्तोयादिपरित्यागेनसप्तमाष्टमादिलाभःकथंवास्यात् अस्मन्मतेचप्रथमकोष्ठमारभ्यसर्वेषु
पिभूम्यकोष्ठेषुक्रमात्त्रिप्रभृतिस्थानांकृतपूर्णांकाकदानेनकिंचिदपिग्रंथासौरस्य अपिचशेषांकपूरणायङ्ऽगत्याभवतोपि
ततत्केनप्रमाणेन तवाःव्यवहितपूर्वमन्यत्रैदमुक्तं नापिशेषपूरणापूर्ववदित्यादिकमत्रोक्तं यदाकथंचित्पदांतरपूरणेन
ष्टार्थतरणांचानुपपत्तिमंतरेणातरोचयंतिशास्त्रविदइतितत्वंसाध्यमत्रतुलजातन्नामवर्णांकाः षट्त्रिंशतिः३६ किमितिभज
तिशिवात्स्वीतितोनिःस्वतेयंपरपुरुषनितिविष्टेत्यवरात्मोसुहृत्स्था किम्पुमहलवसंताडेषणार्थंतयोर्योगंकुद्दहम्भवतिसुयंत्रेसाध
कालीवरिष्ठा तन्नामवर्णांकाएकोनसप्ततिः६९ तयोर्योगे पंचनवतिः९५ तदर्द्धंसार्द्धसप्तचत्वारिंशत् ४७॥ तत्रसार्द्धैकस्यात्या
गेषट्चत्वारिंशत् ४६ तत्रत्रितयांदिभिर्न्द्वैनत्वेसप्तविंशेषयत्रिचत्वारिंशाच्चत्वारिंशदाद्यंकजातंतत्प्रथमकोष्ठमारभ्यभूम्यकोष्ठेषु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्रमात्प्रसेदितिनिर्गलितार्थः यत्तुनीलकण्ठेनोक्तं ज्ञानं छिद्रपदेज्ञानमितिश्लोकोक्तक्रमेणसंश्लिष्टानां मन्त्रविश्लेषदर्शनादयंप्र
कारोविद्वेषणेज्ञेयः विद्विष्टयोःप्रीतिजननेतुज्ञानमित्यादिक्रमोज्ञेयइति तद्दिदंप्रमाणाभूत्वं अतःपरंप्रवक्ष्यामियंत्रंविद्वेषणं
परं इदंयंत्रंद्वेषणार्थंकथितंनत्वस्मात्रिधाविस्तुपक्रमोपहारयोर्विरोधप्रसंगश्च तस्माद्द्वेषणायंत्रमेवेदमित्येवमुक्तंपद्मपाणः तत्मा
त्सम्बइतिविद्वेषणायंत्रंद्वितीयं अथवंध्यकर्मार्थंतत्पुत्रप्राप्तिकरयंत्रमाह वंध्यापुत्रप्रदमित्यादिना यत्तुरामयातवायेवं

वंध्यापुत्रप्रदंयंत्रंनवार्येतुमयास्मृतं श्रृणुतंसंप्रवक्ष्यामियंत्रराजंमनोहरं नारीणांहिमहद्दुःखंवंध्याशब्देनवाचितं तद्दुः
खंहरतेदेवियंत्रराजोमयास्मृतः तुर्यकोष्ठेभ्यगत्वाचतिथौचस्वगतिंलिखेत् द्विःसप्तेरपगत्वाचवाजिगत्वारवाम्य
के मंत्रिगत्वाभ्वगत्वाचप्रथमंपूरयेत्सुधीः तदंकात्रजगत्वाचनागकोष्ठानिपूरयेत् सर्वतोन्यूनमंकेनविपरीतंस
माश्रयेत् साध्यसाधकयोर्वर्णानेकीकृत्यविशेषतः अर्द्धीकृत्यचपूर्वोक्तविधानेनलिखेत्सुधीः साध्यमत्रवरारोहेनित्यं

ध्यापुत्रप्रदयंत्रमितिउद्देशमात्रेणास्मृतंतंयंत्रराजंसंप्रतिवक्ष्यामीत्यन्वयः वंध्यापुत्रप्रदमितिसंज्ञानरूढिमात्रेणकिंतुयौगि
केनेत्यभिप्रायेणतद्योगार्थंदर्शयति नारीणामिति तुर्यकोष्ठेएकादशकोष्ठादितिशेषः तिथाविषत्यास्वमकोष्ठादितिशेषः द्वि
षंकात् सप्तेरश्वस्यस्वीयया गत्यातथाच प्रथममेकादशेतल्लयेंततोष्टमेततःपंचदशतमेकोष्ठेएकद्विसप्तांकालेख्याइति फ

४३ ४० ५ ४
१ ५ ३९४४
४१ ४२ ३ ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

फलितार्थः एकअंकयोः क्रमप्राप्तयोरस्कन्तत्रलेखेवचनप्राप्तः सप्तमाष्टमयोस्तत्रलेखेकिंप्रमाणमितिचेन्न अन्यांकदानेक साम्याभावेन तथैवतात्पर्येन्नियनात् अपगत्याविलोमक्रमेणविलोमकमष्टम्येवाविवक्षितः चरमकोष्ठाऽग्रणनयाद्वर्यको ष्ठादेकादशे पंचदशतमकोष्ठादष्टमेइतिरीत्याच तथाचषोडशतमकोष्ठतोगणनयायश्चतुर्थस्तत्रएवंतस्मादेकादशेपश्चा न्नुनश्चषोडशतमकोष्ठात्पंचदशतमकोष्ठात् पंचदशतमेततोष्टमेक्रमेणपंचमषष्ठतृतीयचतुर्थोकाविन्यस्याइतिफलि

पूर्वोक्तरेखाद्वयैर्यंत्रराजंसमालिखेत् धारयेद्दरेकघांयोषितोगर्भधारणात् यावज्जायतेजंतुस्तावद्यंत्रंतुधारये त् पश्चाच्छिशोःकंठदेशेवधनीयंप्रयत्नतः इदंयंत्रंधर्मकाममोक्षैकसाधनं संतानंलभतेवन्ध्यासत्यंवचो

(मम इतिवंध्यापत्रप्रदं)

तार्थः इतिकोष्ठाष्टकंपूरणीयं शेषकोष्ठष रणार्थमाह खरात्मकइति खरउष्ट्रः तदात्मकेत दीयगतिप्राप्तकोष्ठेइदंतुबोध्यं पूर्वोक्तदिशालिखितांकेषुसर्वापेक्षयाधिकांकमारभ्यमुक्रमेणतत्रदंककोष्ठतउष्ट्रगत्या प्राप्तकोष्ठेषुतत्रदंकांल्लिखेदिति इदंचकर्मणिप्रकारांतरेणयंत्रमाह मंत्रिगत्येत्यादिना द्वितीयकोष्ठेप्रथमांकंत तोद्वितीयंमंत्रिगत्यासप्तमकोष्ठेततोऽश्वगत्यानवमकोष्ठेततोऽश्वगत्यैवपंचदशकोष्ठेविन्यस्यततोगजगत्याषोडशतमे

१६	३	१३	२	
९	६	१२	७	३४
४	१५	१	१४	
५	१०	८	११	

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततोनवमकोष्ठतोगजगत्वादशमकोष्ठे ततः सप्तमकोष्ठतोगजगत्वाष्टमेकोष्ठेततोद्वितीयकोष्ठादृजगत्वाप्रथमकोष्ठेकंवि
न्यसेत् एवमंकाष्टकं विन्यस्यशेषांकपूरणमृजुगत्वापूर्ववदेवज्ञेयं यथा षष्ठकोष्ठाद्दशयोर्मध्येत्रिगत्वाद्वितीयांकतृतीयांकोद्वि
तीयांककोष्ठादृजुगत्वाप्रथमांकः तृतीयांककोष्ठादृजुगत्वाचतुर्थांकः ततः पूर्ववदेवाधिकांकाद्विपरीतक्रमेणपंचमाद्यंकच
तुष्टयं ततऋजुगत्वापूर्ववद्व्युत्पूरणमितिज्ञेयं ऋजुगत्वालेखनमपिनयतन्यस्तः कोष्ठाद्यत्रतत्रकोष्ठेकार्यंकिंतुनियम
विशेषेणेत्याह सर्वतोन्यूनमिति तत्रयंत्रेनिहितेभ्यः सर्वेभ्योप्यंकेभ्यः यन्न्यूनमस्ति तस्ययद्यपिप्राथम्यमेवलोकेप्रसिद्धं त
थापिचात्रविपरीतंअंतिमत्वंसमाश्रयेत् अयंभावः तत्रलिखितेभ्योष्टभ्योंकेभ्योयदधिकंततः प्रथमऋजुप्राप्तकोष्ठेलिखनं
ततस्तदंकन्यूनांककोष्ठात्ततस्तदंकन्यूनांककोष्ठात् एवंरीत्याअंतिचरमंसर्वापेक्षयान्यूनांकाधिष्ठितकोष्ठादृजुगत्वा
प्राप्तकोष्ठेकंलिखेदिति अथकिमंकमत्रानयादिशालेख्यमित्याकांक्षामंकलेखनविधिरेवप्रथमत्वागेकारणाभावात्
प्रथमादिषोडशांतांकवृंदमाक्षिपंतीनियद्यपिशमयतिनत्वेवंलिखनंभगवतोविवक्षितमित्तिलेखांकात्रियमप्यदर्शयति
ध साध्यसाधकयोरिति साध्यसाधकवर्णकानांपरस्परंयोगंकृत्वाविशेषतश्चेति समांकाउपरितनैकसाद्धैकाद्धरूपोविषमांक
स्यशेषन्यूनभागोविगतोयस्मादेवंभूतंयथास्यात्तथायोगांकमर्द्धीकृत्येत्यर्थः किंवाविशेषतएकीकृत्येत्यत्रान्वयः स्वरचं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

	३		२
	६		७
४		१	
५		८	
८	१		
		२	७
३	६		
		४	५

तुर्यकोष्ठन्यस्य

		८	१
७	२		
		३	६
४	५		

मंत्रीगर्भन्यस्य

जनंविंउविसर्गाणां नामघटकानां मध्येकमपि भागमपरित्यज्येत्यर्थः यथायत्रह्रिलविधिनाव्यंजनद्वयंसंवृत्तंतत्रह्रितीयव्यं
जनस्यांकयोगेप्रमाणाभावः प्राथमिकव्यंजनांकयोगादेवसाध्यसाधकयोर्गणनिश्चीकृत्यत्यादिवचनानांचारितार्थ्यादिति
शंकानिराचिकीर्षुराह विशेषतइति अशेषतइत्यर्थः पूर्वोक्तविधानेनेतिप्रकृतेह्रिगुणीकृतेत्यादिनाविधानेनविलि
खेत्पूर्वपूर्वोच्चवृह्रितःपरकोष्ठकेइतिविधिनावेत्यर्थः तथाच ताइशवर्णांकराशिमर्द्धीकृत्यसंपन्नांकंप्रथमतः कथित
कोष्ठेविन्यस्यततोह्येयुगपत्रैयुगपादिक्रमेणैकैकवृद्ध्यावापरकोष्ठेष्वंकान्न्यसेदितिफलितार्थः यत्तुपूर्वोक्तविधानेनेत्यस्य
गुणसाराशिवापरैस्त्रत्रतताकरणेनेत्यर्थइति तन्न नहितत्सामान्यशास्त्रंयेनात्रापिप्रसरेत् प्रकृतेरित्यादिकंतुसामान्यशा
स्त्रमेव ननुक्तानांशिवपदेइत्यादिकंयंत्रोपक्रमात्पूर्वमेवाभ्रातंवचनंसामान्यशास्त्रमेवेतिचेन्न यत्राक्षर्वांकन्यासपूर्वकं
शेषांकपूरणांतत्रैवतस्यवृत्तेः पूर्वोक्तेस्फुतत्कर्पात्तुगुणोरितिशेषः इदंयंत्रंवंध्यायांपुत्रमनिच्छन्पतिःस्वस्मादरेधारयेत
गर्भनिष्पत्तिपर्यंतं ततश्चगर्भिणाःस्त्रियःकण्ठेयंत्रमिदंनिधेयं शिशोर्जन्मोत्तरंतुतत्कण्ठेनिधेयमितिवदताभगवते **रामः**
दंस्तवितं यद्गर्भनिष्पत्तिर्गर्भरक्षाजातस्यशिशोरक्षानेतस्माद्भवतीति इत्थंनदीर्घायुःपुत्रप्रदमिदंयंत्रमितिसूचित **४९**

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथा योषितस्त्वोदरकयोर्याद्दिकमुपादानं वंध्यापदं च पुत्रभूत्यस्त्रीमात्रपरं नारीणां च वंध्याशब्देन संतानस्य त्येतिश
ब्देनसंज्ञा तं यदुःखं तत्परिहारकस्मात्रयं त्रे प्रतिपादितत्वात् नेदं यंत्रं पुत्रमात्रप्रदं किंतु धर्मार्थकाममोक्षप्रदमपिभ
वति अत्र सार्ध्यनित्यक्लिन्ना तत्राभवर्णाकाश्चतुःषष्ठिः ६४ श्रीमन्मलेवस्मान्नृपालवैरिणां उक्तीर्तिकांतानिजसंतति
किंतु समोहमानाविद्याद्युपासनामनुष्यजातायदखण्डसंततिः तत्राभवर्णाकाएकत्रिंशत् ३१ तयोर्योगे पंचनवति
९५ तदर्द्धं सार्द्धसप्तचत्वारिंशत् ४७ तत्र सार्द्धैकस्यागेष्टचत्वारिंशत् ४८ अंकः शिष्टः तस्य पूर्वोक्तदिशान्यासः कार्यः अत्र

६१	४८	५८	४७	५३	४६	५९	५६	५९	५६	५३	४६	
५४	५१	५७	[illegible]	५२	५८	५७	४७	५२	५२	४७	५८	५७
५९	६०	४६	५९	४८	५१	५४	६१	५४	६१	४८	५१	
५०	५५	५३	५६	६०	५५	४९	५०	४९	५०	५५	६०	

प्रमंकाउ परिस्त्रांकाययथस्मात्पतंतितदाशीघ्रं पुत्रलाभः वैप
रीत्येकन्यापत्यलाभ इति नीलकंठः प्रमंकत्वं पुल्लिंगे पात्रांकत्वं
स्त्रांकत्वं स्त्रीलिंग परो पात्रांकत्वं यथास्वबुद्ध्यादेशाति तत्रासाः
इति वंध्यापुत्रप्रदयंत्रम् अथ वश्यकर्मांतर्भूतं क्षेत्रविजययंत्रमुपदिशति क्षेत्रेत्यादि महापुद्धे अनेकप्रत्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

र्थिसार्थैः सहयुद्धे घोरयुद्धे रात्रियुद्धे कूटयुद्धे कपटयुद्धे इष्टार्द्धप्रकृते साध्यसाधकनामवर्णांकयोगार्द्धे तत्कृष्णनितंतन्त्र द्धृ
वांके हीनीकृतं सत्र तत्कृतांके भ्यतत्कृद्गतिप्राप्तकोष्ठे न्यसेत् साध्यमन्त्रकामाक्षा तन्नामवर्णांकाः षड्विंशतिः २६ तुस्ता
ङ्-भूपतिवरं किलकाकवेणापारुद्ध्रस्वदर्पवशतोज्ञु मलेच्छरेण संमोचकम्हायास्वचम्दूवलेन प्रत्यर्थिवृंदमखिलं नयति

शत्रुमर्द्दननामानं यंत्रं वक्ष्ये नवाग्रतः महायुद्धे घोरयुद्धे कूटयुद्धे भयापहं पुरा परशुरामेण शिक्षितं यंत्रमु
त्तमं ततो वैरेण तेनैव क्षत्रं दग्धं मनोहरे नानारत्नतुलानाना नानानृपवशानना इष्टार्द्धघृनि तंतदुत्तुजगत्या
ततो लिखेत् साध्यसाधकयोर्वर्णान्ते कोष्ठन्यसेत्तः परं पूर्वोक्तविधिना लेख्यं वह्निकोष्ठविभेदतः साध्यमन्त्रम
हेशानि कामाक्षा परमेश्वरी पूर्वोक्ते रेखनेई वै विलिखेत्साधकोत्तमः धारयेद्दुर्भेवीरेन्द्र यो भवति निश्चितं इदं यंत्रं
मया प्रोक्तं सर्वशत्रुविमर्द्दनं गोपनीयं गोपनीयं गोपनीयं मम प्रिये इति शत्रुमर्द्दनं यंत्रं

स्मराजा तस्य श्रीमलैवम्मनाम्नो भूपतेर्नामवर्णांकास्त्रिपंचाशत् ५३ तयोर्योगस्य कोनाशीति ७९: तदर्द्धं सार्द्धैकोनचत्वा
रिंशत् ३९ तत्र सार्द्धैकांकस्य त्यागे ऽष्टत्रिंशदंको ३८ वशिष्यते तस्याष्टैकचतुःपंचाशिसप्त षडष्टांकः क्रमेण हीनत्वे ममत शिष्ट
कप्रथमादिभूत्सकोष्ठे लिखेत् यत्रासाध्यसाधकयोरंकं पूर्वरीत्यासंस्कृतं प्रथमपंक्तिरत्नी

यकोष्ठेषुकेकैकदृष्ट्यालिखेत् यदुक्तं वह्निकोष्ठविभेदनइति श्लोकस्यार्थः तृतीयएवकोष्ठेपूर्वदक्षिणापश्चिमोत्तरपंक्तिषुक्रमेणैको
कद्वित्रिचतुःसंख्याङ्कांल्लिखित्वा ततश्चतुरादिषुअङ्केषुतांककोष्ठतः क्रमेणगजगत्यापञ्चषट्सप्ताष्टांकांल्लिखेदिति शेषकोष्ठेषुषट्सुअष्टांककोष्ठ
मारभ्यपूर्वक्रमेणाऽष्टगत्याप्राप्तकोष्ठेषुपूर्ववरीत्यानिष्पन्नंपञ्चत्रिंश ३५ दायकाष्टकंक्रमाल्लिखेदिति तदयंसंग्रहः अर्केषुशक्रदशाभू
नपसप्तकोष्ठेषुकादिकान्विलिख्यभोनरपालसिंह योगार्द्धभूतमनुमयिकृपट्शिवाब्धिषट्पुक्षितिद्विनवसंमितकोष्ठकेषुइति व
ह्निकोष्ठविभेदनइतिमूलात्कथमयमर्थोलभ्यतेतिचेत् आकलय प्राचीपंक्तौप्रादक्षिण्येनैवगणनानुसरणीया येनतृतीयएववह्नि
ह्निकोष्ठतामासादयेत् दक्षिणपंक्तौतुपश्चिमाभिमुखेनसायेनप्रसिद्धगणनया द्वादशतमएवकोष्ठेवह्निकोष्ठतोपपद्येत पश्चिम
पंक्तावुत्तराभिमुखेनसाकार्या येन चतुर्दशतमकोष्ठे वह्निकोष्ठत्वंस्तु षट्भवेदिति एवरीत्याकृत्वा चतुष्टयंलिखित्वाधिकांकमारभ्यगज
गत्यादशमादिकोष्ठेषुकचतुष्टयंलेख्यः ततोधिकांकमारभ्याष्टगत्या पूर्वस्थितिना न्यूनकल्पनादितिदिक् यद्वा वह्निकोष्ठविभेदनइ
त्यस्यैवपरीत्येनगणनयातृतीयकोष्ठेकचतुष्टयंलिखित्वातोगजगत्यांचतुष्टयंलिखित्वाष्टगत्यापूर्ववच्छेषपूरणंकुर्यादितितात्पर्यं तथाचप्राची
पंक्तौउत्तराभिमुखेनगणनाकार्या येनद्वितीयकोष्ठस्यवह्निकोष्ठत्वंस्यात् उत्तरपंक्तौपश्चिमाभिमुखेनसायेनपञ्चदशकोष्ठस्यतृतीयकोष्ठत्वं
स्यात् दक्षिणपंक्तौपूर्वाभिमुखेनसायेनाष्टमकोष्ठस्यतृतीयतास्यादिति तदयंसंग्रहः द्विनेत्रष्टतिथ्यद्रिजाकांतवेदत्रिभूषष्ठकोष्ठेक्रमाद्ध्यंदेयां
का: तपाद्यारभ्यकाष्ठाधरापंचशक्रत्रिभानुप्रमाणेष्वथस्युःपरेका इति अथपत्नोकः शत्रुरूपरिस्थेनांकेनाक्रम्यत इत्यस्मात्त्रासात् जयःस्यादिति

३८

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ वश्यकर्मणि यंत्रमाह कन्याप्रदमित्यादि ऊर्द्धितीये प्रथमद्वितीयकोष्ठे यन्त्रहे ऊर्द्धितीये इति पार्वतीसंबोधनमिति नीलकंठेनोक्तं तदसिप्र
माणात् एवं तर्हि रंध्रं रंध्रमिति प्राथमिकपदयोः कोष्ठसाकांक्षत्वापत्तेः इतरकोष्ठानामप्येकांतरे विशिष्टतया प्रतिपाद्यतयार्थादेव प्रथमद्वि
तीयकोष्ठयोरेतद्वयाधिकरणत्वेन लाभ इति चेत् न किंमंतरेणैव पदमर्थापत्तिः शाब्दीमाकांक्षामुपशमयति पदमेव किंचिदध्याहार्यमि

कन्याप्रदं महायंत्रं श्रृणु पार्वति सांप्रतं वस्तुमान्सुभगां कन्यां विवाहयितुमिच्छति तदर्थं यंत्रराजस्तु कथ्यते ऽनन्तकारणं रंध्रं रंध्रं ऊर्द्धितीयेतु
तीये वाणसंमितं चतुर्थे कोष्ठसंस्थाने पंचमे वह्निसंज्ञितं षष्ठे नागमितं चांकं सप्तमाष्टमरंध्रकं नवमे दशमे रंध्रं शिवेग्निर्द्वादशे रसः
विश्वेमुनिमितं लेख्यं भुवनेनेत्रसंमितं तिथौ विकारे रंध्रं तु विलिख्य परमार्थवित् साध्यसाधकयोर्वर्णानेकीकृत्य दलीकृत् विलि
ख्य परमेशानि गुप्तसारशिवापदैः साध्यमन्त्रस्तु रेशानि कौमारी परमेश्वरी पूर्वोक्तैरेव तैर्द्रव्यैर्विलिख्य धारयेत्सुधीः ध्वजोपरि
संधार्य मनोज्ञां लभते स्त्रियं इति ते हि समाख्यातं यंत्रं कन्याप्रदं शिवे नाभक्ताय प्रदातव्यं देयं भक्तेभ्य एव च कंन्याप्रदयंत्रं॥ ॥

ति चेत् केनेदमुपदिष्टं यद्दशाङ्कु तस्यानुपयुक्तार्थांतरकल्पनमपेक्ष्य तस्याध्याहरणमिति किंच इतरसर्वकोष्ठानां स्पष्टमुपादानं प्राथमि
कयोरेवापादाने विद्वेष इति कुतः समंजसं स्यात् यदप्यपत्यकामस्य वा कन्याप्रदमिदं यंत्रमिति तेनोक्तं तदपि न वरीयः मनोज्ञां लभते
स्त्रियमित्यत्रेत नयं थस्वारस्येन दारपरतयास्यवोचितत्वात् किंच सुभगां कन्यां विवाहयितुमिच्छतीत्युपक्रमग्रंथोप्यसौरस्यमायाति भव
न्मते न च कन्यादानफलकामनया यो विवाहयितुमिच्छतीति तात्पर्यकमयास्मूलं योऽयमिति वाच्यं तद्रहाभिमुख पठन्तीत्यादि दर्शनात्रि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ध्वनितात्पर्यकेभुत्तवराजमंत्रमहोदध्यादिग्रंथेषुकन्याप्रदप्रयोगस्यदारदात्ततायाएवस्पष्टमवगमादितिभावनीयं साध्यमत्रकौमारी तत्रामव
र्णाकाद्वाविंशतिः २२ श्रीमन्मलेवमन्नृपालस्त्रिरिणाप्रायस्त्विदंयंत्रमुपासितंपुरा नचेन्मनोज्ञायतिदेवतोत्तमालभ्येतकांताकथमिंदिरापरा
तत्रामवर्णाकास्त्रिपंचाशत् ५३ तयोर्योगेपंचसप्ततिः ७५ तदर्द्धं सार्द्धसप्तत्रिंशत् ३७ तत्रसार्द्धकोकसागेषड्त्रिंशांकः ३६ शिष्यतेतस्यैके
कशःक्रमेणाग्रसारशिवापदप्रतिपाद्याकाष्टकेर्हीनत्वेसत्यवशिष्टाकाष्टकंक्रमेणाभ्यन्यकोष्ठेषुन्यसेत् उग्रसारादिभिर्हीनतांकृत्वे
त्यर्थः कुतआयातीतिचेत् यतआयातिभवन्मतेतदेवास्मन्मतेपि विलिखेत्तस्यैवसमानजातीयपदांतरेणानतिप्रयोजनकोहृत्त
स्यैवायंकथंचिदर्थइतिचेत् तुल्यममापिहीनीकृत्येत्यध्याहार्यमितिचेत् ममाप्येषएवपंथाः ध्वजोपरीतिपथालिंगोपरियंत्रस्यस्थि
तिःस्थिराभवति तथायत्नेनकोटिस्त्रैयंत्रमेतद्विधेयमित्यर्थः अभक्तायनदेयमिपितदर्थसिद्धिःसर्वथैवादत्वापिसंभवति तत्किं
सर्वथैवनदेयंनेत्याह देयमिति भक्तसंप्रदानकदानस्यैकस्मैदत्वापिसिद्धिसंभवात् किंभक्तिमद्भ्योपिवहुभ्योनदेयंनेत्याह भक्तेभ्य
इति यत्राभक्तसंप्रदानकंदानमस्यनोद्देश्यंभक्तसंप्रदानकंतूद्देश्यंतत्रभक्तसान्निध्यमापन्नाभक्तस्यापिश्रवणमस्यप्रकृतंतत्राभक्तो
पिनप्रतिषेध्यः तत्प्रतिषेधाकरणोपिशास्त्रार्थाप्रच्यवादितिशंकांनिरसितुमाह एवेति एवमन्यत्रापि
न्यासः इतिकन्याप्रदंयंत्रंपंचमं॥ ॥

३३	३०	५	४
१	८	२९	३४
३१	३२	३	६
७	२	३५	२८

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथवश्ययंत्रमाह स्वामीति स्वामिपदार्थमुपदर्शयति प्रभुरित्यादिना प्रभुः पृथ्वीपतिः स्वसेव्यः भर्त्ता स्त्रीवशीकरणामप्येतेयंत्रादन्तस्त्वेयमस्ती
तिनासामपिस्वामित्वमुक्तं जनकः उत्पादकः मातृपितामहमातामहादिः तानः पितृपदेनसहपोनरुक्त्यं साध्यमन्त्रकौशिकी तन्नामवर्णाका द्वा
विंशतिः २२ महाराजश्चराज्ञीवसाधकौ पूर्वजन्मनि आनुकूल्ययनोन्योन्यं त्रिवर्गपरिवर्द्धने तन्नामवर्णाकास्त्रिपंचाशत् ५३ एकोनसप्तति
श्च ६९ तयोर्योगेपंचसप्ततिः ७५ एकाधिकनवतिश्च ९१ तदर्द्धंसार्द्धसप्तविंशत् २७ सार्द्धपंचचत्वारिंशच्च ४५ ततःसार्द्धैकाकस्यागेघट

१७४

५०	४७	४०	३७
४१	३६	५१	४६
३९	४२	४५	४८
४४	४९	३८	४३

स्वामिवश्यकरं यंत्रं प्रवक्ष्यामिसमासतः स्वामीप्रभुः स्त्रियोभर्त्तापालकोजनकः पिता तेसर्वेवशमायांति यंत्रराजस्यलेखनात् षष्ठेन
यैतिथौवांकेवह्नौवाराग्दिशाग्निये षोडशेविश्वसंख्यानेरुद्रेनागेक्षिसंमिते सूर्येमनौतथावायेसप्तमेचक्रमालिखेत् साध्यसा
धकयोर्वर्णानेकीकृत्यविधानवित् अर्द्धीकृत्यसमायोज्यपूर्वकोष्ठविभेदतः साध्यमन्त्रमहेशानिकौशिकीपरमेश्वरी पूर्वोक्तैरे
वतैर्द्रव्यैर्विलिखेद्यन्त्रनायकं धारयेद्बाहुयुग्मेनदक्षेवामेपुमांस्त्रियः धारणाद्यन्त्रराजस्यस्वामीवश्योनरोभवेत् इदंयंत्रंस्वा
मिवश्यकारकंसमुदाहृतं गोपनीयंप्रयत्नेननान्यथाममभाषितं ५० इतिस्वामिवश्यकरंयंत्रंषष्ठं॥

त्रिंशत् ३६ चतुश्चत्वारिंशच्चक्रमादवशिष्यते तस्यषष्ठेन्यासंकृत्वाततएकैकवृद्ध्याहेयगणादिनावायुर्यादिकोष्ठेषुपराकांत्र्यसेत् पूर्वको
ष्ठविभेदतइति नीचेनोच्चवशीकरणेईशानकोष्ठतः प्रादक्षिण्येनैवगणनाउच्चेननीचवशीकरणेतुविभेदतःप्रातिलोम्येननैर्ऋत्यकोष्ठमा
रभ्यगणनाकार्येत्यर्थः बाहुयुग्मेनेत्यस्यव्यवस्थादक्षेवामेइति तन्यासोयथा इतिस्वामिवश्यकरंयंत्रं॥

५८	५५	४८	४५
४९	४४	५९	५४
नामवर्णाकाश्चत्वारिंशत् ४७ नयोर्योगेष्टसप्ततिः ७८ तद्दर्द्धमेकोनचत्वारिंशत् ३९ तत्रैकत्यागे अष्टत्रिंशाकः शिष्यन्ते
नतो क्रमाकमारभ्य व्युत्क्रमेण विश्वादि कोष्ठे षष्ठत्रिंशाकपर्यन्तं विलिखेत् ततः पुनः क्रमेण गोपगमा पाप कोष्ठे षष्ठाक
मारभ्येक पर्यन्तं व्युत्क्रमेणा लिखेत ॥ ॥ तन्न्यासः ॥ ॥ इति शत्रुराज्यादिहरयन्त्र चत्त्रिंशत्तमं यन्त्रम् ॥ ॥

४७	४२	४१	५२
४०	५३	४८	४३
५०	३९	४४	४६
४५	४६	५१	३८

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथवश्ययंत्रमाह॥ अथेत्यादि॥ साध्यमंत्ररंध्रदंतिका॥ तन्नामवर्णकाएकषष्टिः ६१॥ दलसाहिराजपत्नी भवति सुभद्रामदामुद्रा॥ अग्निवी
रकमतिरुंमतो उं नपिहसती पुनर्जाता॥ साध्यसाधिका॥ तन्नामवर्णकाष्टिगान् २० मयोर्योगेएकोनत्रिंशवति ८१ तदर्द्धसार्द्ध पंचचत्वारिंश
त् ४५॥ तत्रसार्द्धैक त्यागे चतुश्चत्वारिंशांकमिति घ्यते॥ एतदंकादुत्तरोत्तरमेकैकवृध्या देवगुणपादितावापरांकास्त्रिखेत्॥ एषामंकानांस्थाना
नि क्रमेणषोडशादीनि सांतानि॥ उपास्ययंत्रेषु चैवं क्रमेण पूरणं नागगमानमपरमितस्य॥ उक्तरीत्यासर्वकोष्ठानामपि पूरितमनयात

अथकाम्यकरं वक्ष्येतथासौभाग्यविवर्द्धनं॥ फलदयाकुलं यंत्रं मन्त्रः स्मरणवराननं॥ षोडशकोष्ठयासेवारोवश्यो पक्षेवसोस्त्रिवे॥
विम्बे स्वरेत्रप्रथमेमनौ मानोनयाकके॥ तियौ तुर्ये रसमिते पूरयेच्चसमाहितः॥ पूरयेत्साधकश्रेष्ठो नागगत्यान्नतः परं॥ साध्यसाध
कयोर्वर्णान् कीलमदलीकृतान्॥ विलिखेत्सर्वपूर्वांच पूर्वपूर्वविभेदतः॥ साध्यमंत्रमहेश्वराग्नि विशेयारंध्रदंतिका॥ पूर्वो
क्तलेखद्वयेणविलिखेद्यंत्रनायकं॥ धारयेत्कंठगंवाश्च तत्सदानत्फलभाग्भवेत्॥ कामयंत्रकुरुतेदेवि षटिकाशतकं कृपात॥
महाकविर्भवेन्मासासंमहाकुद्धिमतांवरः॥ इदंयंत्रंफलद्वंद्वजनकंसमृद्धम्॥ गोपनीयंप्रयत्नेनतामयामसमभाषितं॥ ५७॥ इतिकाम

तः परमितसादेरसंगत्यपचेतः तस्मादुत्कोष्ठेषुफलकादौ पूर्वसंस्थानांकान्विलिखित्वा प्रथमद्वितीयादिक्रमेणलतत्कोष्ठगतसांकान्
लेखयेदित्यत्रैवतात्पर्यं॥ तदयंसंग्रहः॥ पंक्तीषुवेदतिथिरामनन्दपांकषट्कविश्वद्विशैलरविनागगिरींद्रचंद्राःसंख्य
यपूर्वदिशायाफलितांकतोभूदृक्ष्याक्रमेणालिखितारच्चवसंख्यिकांकाः॥ तन्न्यासोयथा॥ इतिकाम्यकरंमेधाकरं

५२	४८	६७	५८
४६	५२	५२	६२
५६	६५	५०	५५
५२	५४	६७	४४

२०८

[illegible]

॥ ३५ ॥ [illegible]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

म.द.
६९

अथ वश्ययन्त्रमाह ॥ अथात इति ॥ अत्र साध्यं स्त्रीवशहृतिका ॥ तत्र प्रथमवर्णाकादि पञ्चाशत् ५२ ॥ अरीणां मन्त्राः क्षणादि सागर्वा मलैव मध्यमीयन्तेषेन
तां के ॥ ॐ एज न्मनीदं महायन्त्रमुच्चैः प्रमाणाच्चितं स्यादितिस्त्रीयवश्या ॥ तत्र प्रथमवर्णाकाद्यि पञ्चाशत् ५३ तयोर्योगादि संख्यारेखस्थिते एतितरोषां कोष्ठि
पञ्चाशत् ५३ तस्य पञ्चमे कोष्ठे न्यासं कृत्वा ततएकोत्तरवृद्ध्या द्वेत्ययादि त्रयावा भुवनादि कोष्ठेषु लिखेत् । पूर्वपूर्वविभेदतः इत्यस्य पूर्वं द्वितीय
तृतीयादि क्रमेणाकोष्ठपूरणमित्यर्थः ॥ पंचमे इत्यादिना ॥ अनयारीत्या एककादेलिखनेन प्रथमकोष्ठादेयंकाः पतन्ति तएव लेख्या इत्युक्तं वर्णाह

अथातः संप्रवक्ष्यामि मन्त्रयुद्धहरं त्विदं ॥ येन विज्ञात मात्रेण नराः मन्त्रान् क्षणात् क्षिपेत् ॥ पंचमे भुवने रुद्रे तुर्ये च क्षेर वो तथा ॥ विश्वे रसे विकारे च
मुनौ चैव द्वितीयके ॥ तत्र भेदक्रमेणाथ नागे पंचदशो मुनः ॥ पूरयेत्तु क्रमेणानि पूर्वपूर्वविभेदतः ॥ साध्यसाधकयोर्वर्णान्नेकीकृत्यदली
कृतान् ॥ पूर्वोक्तविधिना लेख्यं वर्णरूपविभेदतः ॥ साध्यमत्र महेशानि विज्ञेयास्त्रीवशहृतिका ॥ पूर्वोक्तारांचैर्विधिवल्लिखित्वा धारयेत्प्रि
ये ॥ शिखायामथवा कण्ठे करे वा वामदक्षिणे ॥ धारणाज्जायते शौर्यं रणमन्त्रविमर्दनं ॥ वलं भवति तस्याशु नवनागसहस्रकं ॥ इदं यन्त्रं प
रागोप्यं देयं पुत्राय साधवे ॥ इति वरकरं यन्त्रं ॥

\\ येति ॥ मातृकास्तु अंकक्रमेणैव लेख्या नतु कष्टक्र

६५	६२	५६	५५
५२	५९	६१	६६
६३	६४	५४	५७
५८	५३	६७	६०

मेणेत्यर्थः ॥ तथाच यंत्रसंग्रहः ॥ नाकेशारुद्रशरवेदकुनागकाष्ठातिथ्यर्कविश्वदहनर्तुगिरिद्विभूपाः ॥ नंद
स्य पूर्वदिशया तु नसंख्यितायां कांश्चेरव्याः क्रमात्क्षितिभुजादिककोष्ठकेषु ॥ न्यासः ॥ इति वलकारं यंत्रं ॥

राम.
६९

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ वक्ष्ये कर्मणि प्राप्तानि कर्मणि च यत्नमाह ॥ अथोत्पादिता ॥ मृत्युहरणं नाम प्राणवियोगाभावस्योत्पत्तेन्तरं संबंधं तो भस्सदा रूद्रपय
दि च मरणकालानागमनं तथा तदा लंभनं ॥ यदि गृताद्दृत्राकालस्य ज्योतिःशास्त्रादि सिद्धस्य मरणं चायकत्वरूपविशेषणं च्छेलन
गत्रविशिष्ट च्छेलस्सदा तथा तां निरे वेति च्छेयं ॥ मृत्युहरणं रैवलोके प्रपालकस्य महिमवृद्धिर्भवति ॥ महामृत्युर्नामपरमायुर्भागान
न्तरं प्रलम्बमरणं ॥ अल्पमृत्युश्च नदीये भोगं विना मरणं ॥ अपमृत्युश्च नदीव्याघ्रनजादिजः प्रलम्बमरणं दुःस्वप्नप्रसिद्ध ॥ तत्रादानंतसूचि

अथ वक्ष्ये चतुःकोष्ठयंत्रं महिमवर्द्धनं ॥ महामृत्युहरं चैव अल्पमृत्युहरं तथा ॥ अपमृत्युहरं चान्यत्तथा दुःस्वप्ननाशनं ॥ चतुष्कफलदं भद्रे
ममचातिप्रियंकरं ॥ विकारे दशमे वाणे वह्नौ नेत्रे च मेघनः ॥ रुद्रे विश्वे लिखेद्देवि नागाग्न्यान्ततः परं ॥ साध्यसाधकयोर्वर्णान्नेकीकृत्य द
लीकृतान् ॥ पूरयेत्पूर्वपूर्वैस्तु विलोमगमनेन च ॥ साध्यमत्र महेशानि सर्वसंमोहिनीपणं ॥ पूर्वोक्तैश्चाष्टगन्धैश्च विलिख्य विधिपूर्वकम् ॥ धार
धारयेत्सर्वदा कण्ठे महामृत्युविनाशयेत् ॥ इदं यंत्रं चतुष्कं तु महादेवि निवेदितं ॥ गोपनीयं प्रयत्नेन स्वयोनिरिव सुन्दरि ॥ १६३ ॥ इति चतुःकोष्ठात्मक

तात्मकं यंत्रं निर्णयः ॥ ईशानतः प्राग्भिमुख्येन नैर्ऋत्यान्तं गणनामतः स्यालिखेन्महामृत्युनाशः ॥ अग्निकोणात्पश्चिमाभिमुख्येन वायुकोणान्तं न्यासेऽल्पमृत्युनाशः ॥ नैर्ऋ
त्याद्उत्तराभिमुख्येनेशानान्तं न्यासेऽपमृत्युनाशः ॥ वायुतः पूर्वाभिमुख्येनाग्नेयान्तं न्यासे दुःस्वप्ननाश इति ७४ ७१ ८० ८९ ७६ ७१ ८१ ७४ ८३ ७० ७३ ७६ ८९ ७८ ७२ ८३
फलचतुष्टयाधानाच्चतुष्कसंज्ञा साध्यं सर्वसंमोहिनीरं नामवर्णाकाष्ठकोनसप्ततिः ६९ ॥ नागरदल ८१ ६९ ७५ ७८ ७३ ८२ ६८ ७१ ७२ ७७ ८२ ७१ ८० ७५ ७७ ७०
साहिश्रीश्रितीज्ञात्मत्र जननयत्रिंत्रनमध्ये चास्त्र संगोपकीर्त्ति ॥ इह महलवसंतामंदिरयाहरीश्च ७१ ८२ ७७ ७२ ७० ७७ ७५ ८० ७८ ७५ ६८ ८१ ८९ ६८ ८२ ७३
भजति चक्र सपत्नीश्रीमलेवस्मभूप ॥ सात्र साधिका नामवर्णाकाष्ठकोनसप्ततिः ६९ स्तत्वोप वेवश्रो ६९ ७३ ७० ८३ ८३ ७२ ७८ ८९ ८९ ८० ७१ ७४ ७४ ८१ ७१ ७६
गादिसंस्कारेकोनेतिघ्नाकादस्थसंख्याकान् जोड़स्थानमाकम्प्र... तानानुक्रिकादिषु लिखितास्तेऽष्टगन्धप्राप्तकोष्ठेषु सर्वापेक्षया धिका कानारभ्येकाधरुक्रं

इति चतुःकोष्ठयंत्रं ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अथ वश्यकर्मणि स्तंभनकर्मणि च यंत्रमाह ॥ प्रतिमेत्यादि ॥ प्रतिमाचालनं नाम प्रतिमायाश्चलनक्रियालाभः ॥ अत्र साध्यं वास्तुण्यात्
नाम वर्णकाश्चत्वारिंशत् ४० श्रीमन्मथैव भगवन्तपालो उन्नाम यंत्रं विदसाधिनवान् रा ध्रुवं ॥ यद्देरि सुश्रीश्वरस्य तन्नामाप्युकानत्यान
लः स्तंभित नाम वा पितः ॥ तन्नाम वर्णकास्त्रिपंचाशत् ५३ तयोर्योगे त्र्यशीतिः ८३ तदर्द्धं सार्द्धैकचत्वारिंशत् ४१× तत्र सार्द्धैकत्यागेन

प्रतिमाचालनं यंत्रं शृणु चान्य द्वरानने ॥ तदेव चाग्निसंस्तंभकारकं समुदीरितं ॥ रवौ वह्नौ रसे विश्वे समनौ वारौ
चतुर्थके ॥ रुद्रेत्वाग्नेयपंक्तिसंख्येति यौ नागे स्वरे तथा ॥ षोडशे नवमे पक्षे संमिते त्र्यम्बकोलिखेत् ॥ साध्य साधकयोर्व
र्णानि की कृत्य दली कृतान् ॥ विलिखेत् पूर्ववत् पूर्वाङ्कविधिना परमेश्वरि ॥ साध्यसत्त्रसहेत्यानि वास्तुण्याश्च वबाहिनी ॥ प
र्वैकैरेवमेतैर्द्वैर्विलिखेच्चाष्टगंधकैः ॥ धारयेत् प्रतिमायास्तु सम्मुखं सा चलेत् क्षणात् ॥ इदमेव परं यंत्रं विलोक्य जलस्थ
यन्तः ॥ मोक्षयेद्दग्निसंदग्धं विदग्धं भवति प्रिये ॥ सहास मग्निं ग्रासयेद्वा वानलमथापि वा ॥ इदं यंत्रं मया प्रोक्तं प्र
तिमाचालनं परं ॥ सहाग्निस्तंभनं भद्रे सम्यगेव प्रकाशितं ॥ १०८ ॥ इति प्रतिमाचालनं अग्निस्तंभकरं च यंत्रम् ॥

त्वारिंशांकः शिष्यते ४० तस्य रवौ न्यासं कृत्वा तदुत्तरस्मै कैकवृद्ध्या द्वैगुण्यादिवृद्ध्या वा निष्पन्नाकाचहि प्रस्तानि कोष्ठेषु क्र
मशो लिखेत् ॥ परं यंत्रं श्रेष्ठं यंत्रं इदं यंत्रं जले प्रक्षिप्य तज्जलेनाग्निं प्रोक्षयेत् तेनाग्निस्तंभनं स्यात् ॥ तन्न्यासः ॥ इ

४८	५५	४७	४६
४२	४२	५२	५१
५४	४२	४७	४०
४२	४४	५०	५२

अथ वश्यकर्मणि यंत्रमाह ॥ अत्र साध्यं पंचपंचाशिका ॥ तन्नामवर्णकाः सप्तसप्ततिः ७७ ॥ श्रीमलैवम्म भूपालः साधको मुच्यते ततो ॥ कुल
वृद्धिस्तितरया कथं स्याद तिदुर्लभा ॥ तन्नामवर्णाक्षि पंचाशतान् पर् तयोर्योगे त्रिंशोत्तरशतांकः १३० तदर्द्ध पंचषष्टि ६५ ॥ तत्रैकत्यागे

अथ सम्यक् प्रवक्ष्यामि यंत्रं तु कुलवर्द्धनं ॥ येषां कुले संततिर्नो तेषां चापि हितं मतं ॥ वंध्यानां पुरुषाणां च नारीणां च विशे
षतः ॥ हितकारि भवत्येतत् यंत्रं तत्रार्थकोविदे ॥ तुर्ये षष्ठेष्टगत्या चत्वारिंशगत्यानवात्मके ॥ वाजिगत्यापि योलेख्यं त्वं जग
त्यामतो लिखेत् ॥ सूर्यं तु वाजिगत्याथ सप्तमे मंत्रिमार्गतः ॥ प्रथमे वाजिगत्याथ विलिखेत् साधकोत्तमः ॥ तदंकान्
जगत्यां तु नागकोष्ठेषु संलिखेत् ॥ साध्यसाधकयोर्वर्णानेकीकृत्य दलीकृतान् ॥ विलिखेत् पूर्ववत् पूर्वं तु विलोमगति
ना प्रिये ॥ साध्यमत्र महेशानि पंचपंचाशिका परा ॥ पूर्वोक्तैश्चाष्टगंधैश्च विलिख्य सुरसुंदरि ॥ धारयेत् कंठभागे तु
स्त्रियः कंठे तु वध्नीयात् ॥ धारणाद्यत्र राजस्य कुलं वर्द्धति भामिनि ॥ अष्ट पुत्र कुले गेहे जायते पौत्रसंभवं ॥ इदं
यंत्रं कुलकरं मयाते समुदीरितं ॥ गोपनीयं प्रयत्नेन न सर्वथा वीरवंदिते ॥ इति कुलवर्द्धनयंत्रं ॥

७१	७८	७३	५४
७२	५५	७०	७२
५५	७५	७६	५९
७७	५८	५७	७४

चतुःषष्ठ्यंको ६४ वशिष्यते तस्योत्तरोत्तरमेकैकवृद्ध्या आद्यगुणादिवृद्ध्या वा तुर्यादिकोष्ठमारभ्य प्रथमकोष्ठांतं विलिख्य ततो
ऽधउपरीति क्रमेण विलोमगत्या वान्कोष्ठमापि लिखेत् ॥ चतुर्दशापंचदश कोष्ठांकयोस्तु पर्यया कन्यासो गजग

न्यासः कार्यः ॥ इदं यंत्रं पुरुषः कटिभागे धारयेत् ॥ स्त्री चेद्धारयित्री त
या कंठे ॥ न्यास ॥ इति कुवर्द्धनयंत्रम् ॥

अथ स्तंभनाख्येन तीयेकर्मीत्ययंत्रमाह ॥ रथेत्यादि ॥ साध्यं साकं भगेन न्यासपवर्गकाः पंचविंशात् २५ ॥ सकपालसदृशाद्विनिपातोक्षिप्रवेशाय
पिवैरिणो भेषः ॥ कुंटितांगनिमहोविदूधानिश्चापानिर्वदयंत्रकपापिः ॥ तन्न्यासपवर्णकात्रिपंचाशात् ५३ तयोयेणिश्चाशीतिः ८८ ॥ तत्र सर्वे
वर्णस्वरान्यारिंशत् ४४ तस्मात्षोडशतत्संकल्प्य रक्तकोष्ठे न्यासं कृत्वा तदुत्तरमेकैक क्रमेण दत्वा कोष्ठांतमालिख्येत स्मोदेवनागगत्वासंख्या

रथस्तंभकर्वैवगतिस्तंभकं तथा ॥ प्रोक्तं प्राज्ञैर्वश्यापि नागार्जुनविधायकं ॥ तद्यंत्र योदशोपक्षेनागे गणेतत्तोयकोः षोडशो
दशापदे विपूरयेत्क्रमशः पृथीः ॥ तत्कोष्ठागतान्यनागकोष्ठांतिपूरयेत् ॥ साध्यसाधक पोर्वर्णनेकीकृत्यदलीकृतान् ॥ विलि
खेत्सर्वपूर्वाद्विधिनोभगतिनाप्रिये ॥ साध्यमध्यमहे च्छनिविदोपानांभवीपए ॥ पूर्वोक्ते च्छानाधे च्छलिखित्वाधारयेत्करे ॥ रथ
स्तंभप्रयात्यानुवाजिवेगप्रहृन्नेतः ॥ श्रीप्रणश्वनथापञ्चुकृत्तेनविवारणा ॥ इदं यंत्रं रथस्तंभगतिस्तंभकरं स्मृतं ॥ गोपनी
यं तत्पाभडेनिंदकायनदापयेत् ॥ ५३ ॥ इति रथस्तंभगतिस्तंभकयंत्रमेकचत्वारिंशत्तमं ॥

साकाधिष्ठितकोष्ठाद्यु क्रमान्यापाप्रकोष्ठेषु क्रमतोंकाश्चतुश्चत्वारिंशत्पर्यंततानालिखेत् ॥ क्रमशइतिपतद्यंत्रयोदशोपक्षे
इत्यादि वचनात्क्रमेणेत्यर्थः ॥ अंकाक्रमंतारवलेखाः ॥ विलोमगतिनेत्युक्तेः तदयंत्रं स्यात् ॥ दशाक्रमंधवपातुगिरि
द्विविभ्रषत्तंदभूपाणाकंभपाश्वकाष्ठा ॥ अंकाक्रमपूर्वविधिनाकृतलंखियांकेलत्वाः क्रमेणगतिऐधकयंत्रएजो ॥ तत्रा
सोपथा ॥ ॥ इति रथस्तंभगतिस्तंभकयंत्रं ॥

४४	५७	५४	५१
५५	५०	४५	५६
४९	५२	५९	४६
५८	४७	४८	५३

२०६

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

म.द.
७१

अथ वश्यकर्मणि यंत्रमाह ॥ अथेति ॥ अत्र साध्यं पंचपङ्क्तिकान्याम वर्णा का च द्रष्टिः ६६ तदूपे पञ्चपतिः ७० भवेयं यंत्रराजो लक्षपाल
कान्वलीः ॥ नोर्ध्वद्वन्द्वमयमेव निम्नशोजाय नांवयम होम हजपं ॥ तन्नाम वर्णा का द्विपंचाशत् ५२ अथो र्मणे एकोनविंशत्यधिक
शतं ११९ वदर्श्छलाञ्छनवाधिकपंचाशत् ५२ तत्त्वैक्यार्थसहितस्य नाग्ने अष्टपंचाशांकः श्री घाते तस्य पंचमे न्यासं कृत्वा तत्र ऊर्ध्वमे
कादिवृश्चाद्यादिकोष्ठेषु पंकावृत्तेन स्थापनेन ॥ यत्र शिवेनाग्नि विषो यत्र सिध्येवाहोमारे २ वौ ॥ तिथौ नंदे २ लेखं यंपं कोष्ठपेन लेख्य

अथ वश्ये महादेवि घूते विजयदायकं ॥ विवादे जयदं चैव व्यवहारे विपर्यार्थतः ॥ पंचमेवाङ्कि कोष्ठवशो ऽयं पंक्ति लंभिते ॥
तुर्ये लेखनं दिने तिथौ लक्ष्यैरे लिखेत् ॥ द्विती येति यलं यैत्र मतौ प्रथम कोष्ठके ॥ नागेशिवे क मा २ ये यंपङ्क्ति कोष्ठ पूर्वे
तथा ॥ साध्यसाधक योर्वर्णाने कीकृत्य दली कृतान् ॥ विलिखेत् पूर्व पूर्वाद्य विलोमगानि तोपिमा ॥ साध्य मन्त्र म हे शानि विशेषार्थ
चपङ्क्तिका ॥ पूर्वोक्तै रेव तैर्द्वे यैर्विलिख्येव रूपापिति ॥ धारये जानुमध्ये तु घूते विजयमाप्नुयेत् ॥ विवादे कंठलग्नं यंत्रं तु
र्यात्स्वदनघे ॥ विवादे विजयो जाये छत्रुनाशकरं परं ॥ इदं यंत्रं सम्यक् दृष्ट्वा भावार्थयुतं परं ॥ साध्यसाधकनायादे विपरीतं को तु कर
यतः ॥ घूत विवादयो जयकं यंत्रम्

रा ॥ इत्येवं अत्र पाशुक्रम दिशा पठित कोष्ठेषु क्रमेण एव पाश्चात्य प्रथमांनांकां लिखेत् ॥ पंक्ती तिदशम कोष्ठे वज्रं केस्थाने पंको ७१ ६८ ५८ ६२
लेख्यः स्यर्थः ॥ अपि तापंच कोष्ठे न्यंकोलेख्य इत्युक्तं ॥ साध्य साधक यो दली कृतां कलं व्यापारय वज्रं र्थे को फलव्यो प्रापेस्मापि ५८ ६३ ६७ ७२
प्रायः ॥ वज्रं केकां कोतु पूर्वक्रम पठित सांक स्थान पतनयो स्तलीपयो ऽन्य कोष्ठ योर्लेख्यो विन्यारर्थिकं ॥ अनयो यंत्रयोः स ६४ ६१ ७२ ६६
र्वतो कला पंक्ताली तिमापद्विवादः सामान्य प्रमाणान् ॥ तन्मालो यथा ॥ इति घूत विवाद यो जयकरं द्विवज्रा दिगतयंत्रं ॥ ६८ ७० ६५ ६०

रा.चि.
७१

अथवश्यकर्मणि यंत्रमाह॥ अथेत्यादि॥ अत्र साध्यं वज्रेश्वरी॥ तन्नामवर्णाकार एकषष्टि ६१॥ राज्ञी महलवसंतासुससपृथ्वीप्रदाता
ये:॥ संतोषितभूमिसुराभूमिसपत्नी प्रियापितभूपस्य॥ सात्र साधिका॥ तन्नामवर्णाकारकोनसप्तति ६९॥ तयोर्योगे त्रिंशोत्तरशतं
१३० तदर्द्धं पंचषष्टि ६५ तत्रैकन्यासे चतुःषष्टिः ६४ तस्यादक्रमेकोष्ठे न्यासकृत्वा तदुत्तरमेकैकवृद्ध्या षोडशावान्तकोष्ठेषु एकसप्तत्य
मानेकानुक्रमेण विन्यस्य तत्रश्चतुःषष्ट्यंकतोष्ठेमायोकरस्तकोष्ठतरस्ततो वैपरीत्येन द्वितीयतृतीयादिकोष्ठेषु तेष्व उक्तानामाप्र

अथवक्ष्ये भेदं विस्मयानन्दप्रदं परं॥ इन्द्रजालकरंचान्यफलद्वयसमावृतं॥ नष्ठविद्याहितंचैव महाकपटकारकं॥ पक्षो
विकारेवक्रौचवाणोनागेतु पक्षके॥ विश्वेदिशिविलिखेद्द्विनागगण्यानतःपरं॥ साध्यसाधकयोर्वर्णानेकीकृत्यदलीकृतान्
विलिखेत्पूर्वपूर्वान्तु विलोमगतिना प्रिये॥ साध्यमन्त्रमहादेवि देवी वज्रेश्वरी परा॥ पूर्वोक्तैरेवनेड्यैर्विलिख्य विधिपूर्वकं॥
धारयेच्चरणोद्देशेन त्वारमेस्सुरेश्वरि॥ इन्द्रजालिकविद्याया लोकान्संदर्शयन्विदं॥ लोकानादृष्टिवंधंचकुर्तेनात्र संशयः॥ इ
दंयत्रं नन्दनाकरं तथेन्द्रजालसिद्धिदं॥ कथितं गोपनीयं तेस्त्वयो शिरिवपार्वति॥ २०८॥ इतिनन्दनेन्द्रजालसिद्धिदयन्त्रं त्रिचत्वारिंश

प्रथमसप्तमादिकोष्ठेषु क्रमेणद्विसप्ततित्रिसप्तत्यादिकानेकोनाशीतिपर्यंतानंकान्न्यसेत्॥ इदंयंत्रं दक्षिणपा
देधृतंचेन्न विद्याप्रदं इन्द्रजालिकविद्यायां यदि इन्द्रजालीयावन्तो लोकास्तदृष्टि समक्षमिदंयंत्रं प्रदर्शयेत्॥ तदा तद्दृ
ष्टिप्रतिवंधेन कौतुकदर्शनं तेषां स्यादित्यर्थः॥ ॥इतिनन्दनेन्द्रजालसिद्धिदयंत्रं॥

७२	६९	६६	७२
६७	७८	७२	६८
७७	६४	७१	७४
७०	७५	७८	६५

म.द.
७२

अथ वश्यकर्माणि यन्त्रमाह। मोहनादि॥ एकतो भयं एकस्माद्यन्त्राग्निः संदिग्धं फलद्वयं यद्यपि कामनाभेदाद्विभिन्नकामनास्व
रूपाणि यन्त्राणि भिन्नमेव। तथापि कादिसकलापराक्षरादिभेदाभावादेकत्रैव सृष्टिः॥ साध्यमन्त्रत्रिपुरमालिनी। तन्नामव
र्णांकाः अष्टषष्टिः ६८॥ अम्बानागरपालसहिताः तन्त्रसंसाधितमसिद्धियन्त्रकं॥ यदमीमन्त्रवीक्षिता अपि प्राणिवर्णाः सिमस्त

महासारस्वतं यन्त्रं तयामन्त्रस्य सिद्धिदं। उभयं स्येकतो वश्ये सावधानं तथाम्बराः॥ सर्वार्णानुहिता र्थयन्त्र थाविंशमिव
त्रये॥ नानामन्त्रार्थसिद्धीनां फलदं विधिनास्मृतं॥ त्रिविविंशे वार्णसंख्ये वह्नितुर्यैरसेमनौ॥ खौतुपरयेद्देवि एवं नागस्य मार्ग
णः॥ साध्यसाधकयोर्वर्णाने कोष्ठमदली कृतात्॥ विलिखेन्तर्वपर्वाणि विलोमगतिना प्रिये॥ साध्यमन्त्रवरारोहे देवी त्रिपुर
मालिनी। पूर्वोक्तैरेव वर्णैर्द्वैर्विलिख्य परिधारयेत्॥ कण्ठे सारस्वतप्राप्तेमन्त्रसिद्धेस्तु सर्वदा॥ धारणात्सर्वविद्यानां वेत्ता
भवति भामिनि॥ मन्त्रसिद्धिर्भवेत्तस्य प्रयोगेण न संशयः॥ इदं यन्त्रं समुद्दिष्टं महासारस्वतप्रदं॥ मन्त्रसिद्धिकरं
सेवनीयं प्रयत्नतः॥ इति महासारस्वतप्रदं यन्त्रं॥ ॥

सम्पदः॥ तन्नामवर्णांकाश्चिपञ्चाशत् ५३ तयोर्योगादिसंस्कारे कृते समस्तवर्णाङ्काः षष्टिः एवं ६० तस्मात्षोडश्यां यंकानूवे
परीत्येन न्यास्य वादिरमानं कोष्ठेषु लिखेत्तथा च विवेचनसप्तति: विश्वचतुःसप्तति: ७४ वारांत्रि सप्तति रितिरीत्या
रविकोष्ठषष्ठ्यकोलेख्यः। तत्तश्च समीप्षु पञ्चादयोर्कावपरीत्यक्रमेण ...कष्ठ्यं व्रतः क्रमेणापापाकते ऊक्तगत्या भाप्त

६०	६७	७२	७१
७३	७०	६१	६६
६३	६४	७५	६८
७४	६९	६२	६५

कोष्ठेषु लिखेदिमर्पः॥ न्यासः॥ इति महासारस्व
तप्रदं यन्त्रं चतुश्चत्वारिंशत्तमम्॥ ॥

अथ शांतिकर्मणि यंत्रमाह ॥ वज्रकोष्टेत्यादि ॥ प्रथमं मीनकोष्ठमारभ्य ऐशान्यकोष्ठान्तं दक्षिणाभिमुख्येन गणनामाश्रित्य ऐशान्यादि
कोष्ठेषु लिखितेन पूर्वतनं यंत्रं कोपहरणं एजादिर्क्रोधशांतिकरणं परं आग्नेयक्रमेण पश्चिमाभिमुख्येन वायव्यान्तं गणनामाश्रित्य लि

वज्रःकोष्ठात्मकं यंत्रं भ्रमणं वा न्यसेद्भवि ॥ प्रथमं कोपहरणं घोरं स्याद्दहरं परं ॥ षडशीति हरणं वान्यत्पापघ्नं रहपरं ॥ प्र
यक्षाभिविभेदेन पूर्वपूर्वेण भेदनः ॥ दौमनौनथावंडेत्य प्रविश्य श्रीविनायजो ॥ पक्षे वक्रौ वाणाभिनेद्द्व्यमेषोऽन्यौ रसौ ॥ न्यै
त्रिपौ वांकेभिनोगिलिखेत्परमेश्वरि ॥ साध्यसाधकयोर्वर्णैर्नेकीकृत्य दलीकृतान् ॥ लिलिखेत्पूर्वपूर्वाख्यकोष्ठसंख्याविधे
दतः ॥ साध्यमन्त्रमहेशानि मालिनीपरमेश्वरि ॥ पूर्वोक्तैरेव तैर्द्वैर्विलिख्य परिधारयेत् ॥ बाहौ वा दक्षिणे कण्ठे धारयेद्यं
त्रनायकं ॥ धारणात्कोपहरणं घोरं स्याद्वज्रनायकं ॥ षडशीतिहरणं क्षेत्रमध्यगं च विधारितं ॥ पापघ्नं रहं मार्गे दक्षपंत्रं पुटे
प्रजेत ॥ पापघ्नं भयं हित्वा प्रवीवरति मार्गतः ॥ इदं यंत्रं वज्रःकोष्ठसंज्ञकं परिकीर्तितं ॥ गोप्यं तु सर्वदा यत्नेनात्र कार्यो विचारणा ॥ वज्रकोष्ठलिखितं

लिखितं द्वितीयं यंत्रं घोरस्याद्दहरं ॥ भयान्तकसिंहादिधानोपशामकं ॥ अथ मीनमारभ्य ईशान्तं दक्षिणाभिमुख्येन ईशानान्तं गणनामाश्रित्य लिखितेन तृतीयं

पंक्तिषट्कानिहरेत्॥ अनिरुद्धकोष्ठादिकाः शालभाः प्रकाः॥ सर्वकोष्ठपदकोष्ठे तिमन्त्रविधेतिमध्येपदकानिरेखाषट्कानिताः
यत्करे॥ मंत्रास्योपोविरुद्धिर्वैतिन्यायादेतिमत्यागस्यैवस्यात्पत्यात्॥ कोपहरणेपंक्त्रैणैवपदकोष्ठवारणेस्थापितलंभवान्यपदेषु
वादितःपूर्वापिप्रवेनाग्निकोणेतंगणनामाग्नियलिखितंवतुर्थयंत्रंपाद्यहरणे॥ वोरेपद्रवशमनकरं॥ मन्त्रसाध्यंमालिनी॥
तन्नामवर्णकाद्येयपत्रिंशान् ३२ भीएजएजेभ्यदीपदानप्रमापविज्ञातिनवोरसंघः॥ मतीनएजोपिलनीतिएजोमन्तंप्रएजन्म
निसाधकोस्प॥ तन्नामवर्णकाद्विपंवाशान् ५३ नपोर्यागिषड्शीतिः ८६ नदर्द्धत्रिवत्वारिंशान् ४२ तत्रैकस्यागेद्विवत्वारिंशान् ४२
एतस्यरवोन्यासंकृत्वान्तरुत्तरमेकैकस्याक्रमप्राप्तान्सप्तपंचाशान्पर्यन्तानंकानमेत्रकोष्ठमारभ्यनवमकोष्ठपर्यन्तंपूरयेत्॥ ॥
वर्णलिपनेविशेषमाह॥ कोष्ठवर्णाणिपेदनइति॥ कोष्ठानांयेवर्णाः स्वरः स्वर्णहलः तेषांपेदनोविभेदेनक्लिश्यणानयाकोष्ठप्र
धानतयाकोष्ठक्रमात्रएषेनेतियावत् तथाचात्रप्रथमस्यानंईशानकोष्ठतः क्रमेणमानवालिखितेनांकक्रमेण द्वितीयेतात्
नेयकोष्ठमारभ्यक्रमस्योमानकालिखितं तृतीयेनैऋत्यकोष्ठात् ४४ ४८ ५० ५५ ४६ ५७ ५१ ४४ ४३ ५६ ४३ ४६ ५५ ४८ ४२ ५२
वतुर्थेवायव्यात इतिध्येयंम्॥ ॥ तन्यासायथा॥ ॥ ५१ ५५ ४५ ४८ ४२ ५२ ५४ ४२ ४२ ४७ ५२ ५७ ५० ४५ ४७ ५६
५७ ५२ ४७ ४२ ५६ ४७ ४१ ५० ४८ ४५ ५४ ५१ ४९ ५४ ५२ ४२
इतिवत्तुःकोष्ठात्मकंयंत्रंपंचवत्वारिंशन्ममम॥ ॥ ४६ ४३ ५६ ५३ ५२ ४२ ४८ ५५ ५५ ५० ४९ ४४ ४४ ५१ ५७ ४६

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ वश्यकर्मणि यंत्रमाह॥ स्तंभको त्थापनमिति॥ स्तंभकोत्थापनं नाम स्त्रावशारीरे क्रियासंबंधेला मः॥ विकलीकरणं च यदि तत्रापि नाम्नावेशलाभो विवक्षितस्तदा वश्यमेव यदि तु तदीयप्रज्ञाविशेषोपशमस्तथा तदा शान्तिरिति ध्येयं अत्र साध्या त्रिपुरभैरवी तन्नाम वर्णाकाः षट् षष्टिः ६६॥ श्रीमन्मलेवंमन्नपालआस्त्रे(?) यन्त्रस्य तु साधकोत्र॥ तच्चेदमी वैरिणः उक्तः कुतोपि वैकल्यपदप्रयाताः॥ तन्नाम वर्णकास्त्रिपंचाशत् ५३ तयोर्योगे एकोनविंशत्यधिकशतं ११९ तदर्द्धसाधनवाधिकपंचाशत् ५९॥

स्तंभकोत्थापनवान्यद्विकलीकरणं तथा॥ यंत्रं समष्टियोगेन कार्यद्वयसमाहृतं॥ नोगेपक्षे तथा विश्वे रुद्रे पंक्तौ तु षोडशे॥ वह्निकोष्ठे वाणसंख्ये नागगमानतः परं॥ साध्यसाधकयोर्वर्णनिकृत्तयोजयेत्पुनः॥ दलीकृत्य विलोमेन पूरयेद्दिग्गिकोत्तमः॥ साध्यमत्र वरारोहे देवी त्रिपुरभैरवी॥ पूर्वोक्तैश्चाष्टगंधैश्च विलिखेत्सर्वमार्गतः॥ धारयेद्द्रुसरश्रेचनकस्य वरानने॥ हृदमेव रिपोर्गेहे निखनेद्देहलीतटे॥ विकलीकरणं कुर्याद्यदासोलघ्येङ्गितम्॥ वर्णमात्राकेमभिदांज्ञात्वा वैयंत्रनायकः॥ महाश्चर्यमयं देवि गोपनीयं प्रयत्नतः॥ ३० ॥ स्तंभको

तत्र सार्द्धैकत्यागेक्ष पंचाशांको वशिष्टस्तत आरभ्ये कोत्तरवृद्ध्या नागादिवाणांतं विलिख्य ततः पूर्ववत् क्रमप्राप्ता दानू क्रमप्राप्ताककोष्ठेष्वःसकाशाद्युगानि प्राप्तकोष्ठे विलिखेत्॥ दृश्यास्त्वेतयोः कामनयो यंत्रलिखनेभेदः यत्पूर्वकामनायां सर्वपक्षया प्रथमांकमारभ्य मात्रकालिखनं द्वितीयायां तु सर्वापेक्षया चरमभारभ्य क्रमेणान्तिमे

३०	५८	४४	५५
६५	४६	७१	५८
४७	५२	११	७२
५०	७२	५५	५२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

म॰द॰ ७४ अथ वश्यकर्मणि यंत्रमाह ॥ इदानीमित्यादि ॥ अत्र साध्यं श्रीमच्चण्डीनामवर्णकाः पंचाशत् ५० ॥ धर्मार्थकाममोक्षा यद्वारे मम
भावमापन्ना ॥ अथ निर्मले वस्त्रखण्डे राजा के ल्पं कुर्यात् वेत्ता ॥ सोयं साधकस्य नामवर्णकास्त्रिपंचाशत् ५३ तयोर्योगे त्र्युत्तरशतं १०३

इदानीं शृणु देवेशि षट्कोणं तु महाद्भुतं ॥ यंत्रराजं तदेवेशि सद्यः प्रत्ययकारकं ॥ धर्मप्रदं चार्थदं च का
मदं मोक्षदं त्रिदं ॥ ज्ञानदं लयदं येन त्र्यक्षकोष्ठसकलार्थदं ॥ विश्वे रुद्रे वसौ नेत्रे वह्नौ वाणे च दिग्मिते ॥
षोडशे चापरा कोष्ठे नागगन्यासमालिखेत् ॥ साध्यसाधकयोर्वर्णानेकीकृत्य दलीकृतान् ॥ विलिखेत् पूर्व
पूर्वाङ्कविलोमगामिनां प्रिये ॥ साध्यमत्र महेशानि श्रीमच्चण्डी परापरा ॥ पूर्वोक्तै रववैर्देवि येन यथा कार्यं
विचारितैः ॥ विलिख्य यंत्रराजं तु धारयेद्दक्षिणे करे ॥ हृदये वा यदे देवेशि सद्यः फलमवाप्नुयात् ॥ इदं यं
त्रं च षट्कोष्ठक यितं तव गोरवात् ॥ गोपनीयं त्वया भद्रे त्वं त्राये कुलनायिके ॥ ७ ॥ इति षट्कोष्ठकं यंत्रं ॥ राम: ७५

तदर्द्धसार्द्धैकपंचाशत् ५१४ ॥ तत्र सार्द्धैकत्यागे पंचाशको ५० वशिष्यते तस्मात् षोडशांतमांकं पंचषष्ठिरूपं ६५ विश्वे विन्यसेत्
उत्तरमेवैकहासेन षोडशान्तकोष्ठान्तं त्रिन्यसेत् ततः अंश शब्दांक कोष्ठे मध्ये षोडश गत्या साप्तकोष्ठे ऽ शेषमतः सप्त पंचोत्तरत्तमाः

कमारभ्य पंचाशदंकपर्यंतं न्यसेत्॥ एभ्यश्च गणनायादिईशानमारभ्य नैर्ऋत्यांतं प्रादक्षिण्येनांक्रियते तदा तु ऐघे नैव विश्वादिसंख्यानुस
रणं तदा धर्मप्रदमिदं यंत्रं॥ यदि त्वग्निकोणात्पश्चिमाभिमुख्येन वायव्यांतं गणनामाश्रित्य विश्वादिसंख्यानुसरणं तदा कामप्रदमि
दं यंत्रं यदि तु वायव्यकोणात्पूर्वाभिमुख्येनाग्नेय्यंतं गणनायां विश्वादिसंख्यानुसरणं तदा मोक्षप्रदमिदं यंत्रं॥॥ यदि तु पूर्वं तन्न्या
से तु संश्लिष्टयोरंकयोर्विप्रयोगः विश्लिष्टयोश्च संयोगो यथा भवति तथांकन्यासः क्रियते तदा ज्ञानदमिदं यंत्रं॥ तथाहि पूर्वं संश्लिष्टानां
कांकयोर्दशाष्टादशात्मयोर्द्विपंच्योरेकपंच्योरंकयोः पूर्वन्यासे संश्लेषोस्ति तावदेतत्र यंत्रे तयोः क्रमेण प्रथमचतुर्थकोष्ठयोर्न्यासं कृ
त्वा विश्लेषः संपादनीयः॥ पूर्वन्यासे तयोस्तु संश्लिष्टांकाद्वितीयस्य प्रमाकयोः प्रकृते एकपंचाशत्षट्पंचाशद्रूपांकस्वरूपयोः क्रमे
ण द्वितीयतृतीयकोष्ठयोर्न्यासं कृत्वा संयोगः संपाद्यः एवं प्रथमपंक्तौ कृत्वा द्वितीयतृतीयचतुर्थपंक्तिष्वेवमेव कर्तव्यमिति यदि
तु ज्ञानप्रदयंत्रस्यादिमपंक्त्यंक्रमेण चतुर्थ्यां द्वितीयपंक्त्यंकास्तृतीयायां तृतीयपंक्त्यंका द्वितीयायां चतुर्थपंक्त्यंकाः पूर्वस्यां पंक्तौ भ
वंति तदा लयप्रदमिदं यंत्रं॥ ल
येनामश्रीभगवत्सयता॥ क्रमे
णतन्त्राण्यायथा॥ इति षट्कोष्ठा
त्मकं यंत्रसप्तचत्वारिंशत्तमम्॥

५१	६२	६१	५६
६०	५७	५०	५३
५४	५९	६४	५३
६५	५२	५५	५८

धर्मदं

६५	५४	६०	५१
५२	५९	५७	६२
५५	६४	५०	६१
५८	५३	६३	५६

अर्थदं

५८	५५	५२	६५
५३	६४	५९	५४
६३	५०	५७	६०
५६	६१	६२	५१

कामदम्

५६	६३	५३	५८
६१	५०	६४	५५
६२	५७	५९	५२
५१	६०	५४	६५

मोक्षदम्

६२	५१	६५	६१
५७	६०	६३	५०
५९	५४	५३	६४
५२	६५	५८	५५

ज्ञानदम्

५२	६५	५८	५५
५९	५४	५३	६४
५७	६०	६३	५०
६२	५१	५६	६१

लयदम्

म॰द॰
७५

अथ वश्यकर्मणि यंत्रमाह ॥ खेचरीत्यादि ॥ फलद्वयं खेचरीसिद्धिः सकलार्थलाभश्चेति फलद्वयं ॥ यद्वा कार्यगौरवेपि सिद्धिदं ॥ तल्लाघवेपि सि
द्धिदमित्यर्थः ॥ यंत्रान्तरं तु कार्ये लाघवसत्वे तद्दुर्लभं ॥ गौरवे त्वावश्यं भवतीति ततो वैलक्षण्यं ॥ एतेन पूर्वार्थपक्षपाती नीलकण्ठः प्रत्युक्तः ॥
तत्रामवर्णिकाः सप्तादश ॥ साधकोत्र नरपालनायको गायकः प्रतिपदं रमापतेः ॥ कर्मणामखिलकामदायकः सायको रिपुकुलक्षये ध्रुवं
॥ तत्रामवर्णकालिपंचाशत ५३ तयोर्योगे सप्ततिः ७० तदर्द्धं पंचत्रिंशत् ३५ तत्रैकस्योरोपे चतुस्त्रिंशांकः स्थाप्यते तस्य मध्यकोष्ठे न्यासं कृत्वा

खेचरीसिद्धिदं यंत्रं यथायिफलप्रदं ॥ इदं यंत्रं तु सकलार्थप्रदं परिकीर्त्तितं ॥ फलद्वयप्रदं स्पेतत्कार्यगौरवलाघवात् ॥ नवमे च
तिथौ वेदे रसे षोडशके पुनः ॥ दशमे पंचमे वह्नौ पक्षे नागे शिवे पुनः ॥ विश्वेस्वरे चंद्रमिते मनौ भानौ समालिखेत् ॥ साध्यसाधक
योर्वर्णानेकीकृत्य दलीकृतात् ॥ विलिखेत्पूर्वपूर्वाच्च विलोमगतिनाप्रिये ॥ साध्यमत्र वरारोहे ऋद्धिस्तु परमेश्वरी ॥ पूर्वोक्तैरेव तैर्द्रव्यै
र्लिखितायंत्रनायकं ॥ धारयेत्तु स्वके देहे खेचरीसिद्धिमाप्नुयात् ॥ सकलार्थप्रदं स्पेतद् ह्यस्मिन्यंत्रोत्तमं ॥ इदं यंत्रं समाख्यातं गुप्त
कार्यार्थसाधकं ॥ गोपनीयं सदा देवि नात्र कार्या विचारणा ॥ ५४ ॥ इति खेचरीसिद्धिदं यंत्रं ॥

तत्र मेकैकह्रासात्तन्मध्यकोष्ठांतमेकोनपंचांशत्मध्ये मानं कान्त्यासेन विलोमगतिनेत्यस्याप्ययमर्थः ॥ सकलार्थप्र
दमित्यस्यानन्तरगपदे च सर्वसिद्धिदमुच्यते किंतु सर्वमध्येदशं पौराणमाश्रावितार्था विवर्णाये गोदिकपीभूतानां पर्वेणामे
वार्थानामेकैकस्योदायकसकलफलदानत्वेपि खेचरीत्वासुस्फिन्नवान्यामित्राययेण तन्न्यासः ॥ इति खेचरीसिद्धिदं यंत्र

३६	४१	४२	४७
४३	४६	३७	४०
४९	४४	३९	३४
३८	३५	४८	४५

॥ ५८ ॥ खेचरीसिद्धिदं यंत्रं ॥

राम:
७५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ शांतिवश्यस्तंभनविद्वेषोच्चाटनमारणकर्मस्वेकमेव यंत्रमाह॥ ॥चन्द्रकोष्ठेत्यादि॥ सर्वकामा हि नयुगपद्वेदोद्देशीकरणीयाः॥ एकस्य हि प्रयोग
स्य नकुत्रापि फलद्वयमिति दर्शनात्॥ अतएव कर्मभेदाद्भिन्नं लेखनीद्रव्यपत्रभूषणवर्णादिकमप्युपादानं शक्यं॥ नहि नानाकर्मोद्देशेन कप्रयो

चन्द्रकोष्ठात्मकं यंत्रं सर्वसिद्धिफलदायकं॥ नवात्मके कथयिष्यामि रहस्यं कौतुककारकं॥ कामधेन्वभिधं चैतत् कल्पवृक्षाभिधं त्विदं॥ चिंता
मणिसमाख्यं च रोहिणाख्यं ततः परं॥ चन्द्रकोष्ठं तु विज्ञेयं मनोभिलषितप्रदं॥ सप्तमे प्रथमे देवि भुवने भानुसंमिते॥ नवमे च
तिथौ वेदे रसे वाणेन्द्रियके॥ कोष्ठे दशमे रुद्रे त्रयोदशमिते लिखेत्॥ द्वितीये चाष्टमे मंत्री गर्भं तु तत्परः सरं॥ साध्यसाध
कयोर्वर्णान्नेकीकृत्य दलीकृतान्॥ विलिखेत्पूर्वपूर्वाश्च विलोमगतितः प्रिये॥ साध्यनामत्रमहेशानि मूलप्रकृतिसंभवा॥ पूर्वोक्ते
श्चाष्टरां चैव तु विलिखेत्सुरसुंदरि॥ धारयेद्दक्षिणे पाणौ वांछितार्थप्रदायकं॥ इदं चन्द्रकोष्ठमयं मनोभिलषितप्रदं॥ गो
प्यं सर्वदा भद्रे नास्तिकेभ्यः स्वदैवहि॥ इति चन्द्रकोष्ठात्मकं यंत्रं॥

गेवितिरागमनाविरहादेकमप्युपादानं शाक्यम्‌· नवा समुच्चितमप्युपादानं शक्यं॥ न स्वे कदेके न नानापत्रादिकमुपादायैकं यंत्रं शक्यं लि
खितुं· नन्वेवं सर्वमनोभिलाषप्रदत्वं कथमस्योपपद्यत इति चेत्॥ यथा सर्वेभ्यो दर्शपौर्णमासावित्यत्र एकैककामे· एकैकाभिद्धि
भुक्तेदमाम्नातं· अस्य वनेकप्रयोगेण सर्वकामावाप्तौ तात्पर्यं॥ किंतु पूर्वोक्ताः सकलाः कामनाः दर्शपौर्णमासनामकयागाङ्गं वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

म॰द॰
७६

तीति॰ तथा च काम्यवस्तुभेदस्य वास्यापि तन्मर्यमिति यदि बुधेन दास्याकमपेष्ठस्य एव पंथाः ईशानादिनैर्ऋत्यांतं पूर्वाभिमुखेन गणनामनुस्त्य

सप्तमप्रथमादिकरणेन विन्यस्तांकस्य यंत्रस्य कामधेनुनामकत्वं ॥ आग्नेयादिवायव्यांतं पश्चिमाभिमुखेन गणनया अंकन्यसनेन

सिद्धयंत्रस्य कल्पवृक्षनामकत्वं ॥ नैर्ऋत्यादीशानांतं पूर्वाभिमुखेन गणनया यंत्रकरणेन तद्यंत्रस्य चिंतामणिसंज्ञता ॥ वायव्या

त्पूर्वाभिमुखेनाग्निकोणांतं गणनेन साधितयंत्रस्य रोहिणीसंज्ञत्वं ॥ एकैकस्य नामचतुष्टयं नामचतुष्टयमिति तन्नाम्यं ॥ क्र

कारेणापरं पदेन च भिन्नं धर्मिकतायां नामसूचनात् ॥ अत्र साध्यं मूलप्रकृतिसंभवा ॥ तन्नामवर्णकानवतिः ९० ॥ घनश्याम

सूनुर्नेमाणेकुमारेन वा पार्वतीजो महादानभूरः ॥ नकल्पद्रुमादिः प्रतिष्ठापितलक्ष्म्या न वा माधवो यं स्व पूर्वैः सिराजो ॥ सोत्र साधक

स्तन्नामवर्णकाद्विपंचाशत् ५२ तयोर्योगे त्रिचत्वारिंशोत्तरशतं १४३ तदर्द्धं सार्द्धैकसप्ततिः ७१४ ॥ तत्र सार्द्धैकत्यागे सप्तत्यंको

वशिष्टस्तस्मात्षोडशात्मपंचाशीत्यंकमारभ्य क्र

मेण संप्रतिपर्यंतानंकान्सप्तमाद्यष्टमांतकोष्ठेषु

लिखेत् ॥ चतुर्थांकोष्ठगणनानुसारेणाष्टौ कोष्ठ

त्वमस्य ॥ एवं पूर्वत्रेतन्यासाभ्यासी ॥ ॥

इति चतुःकोष्ठमिश्रयंत्रमेकोनपंचाशत्तमं ॥ ॥

राम:
७६

८४	७१	७६	७९
७७	७८	८५	७०
८१	७४	७३	८२
७२	८३	८०	७५

कामधेनुः

७२	८१	७७	८४
८३	७४	७८	७१
८०	७३	८५	७६
७५	८२	७०	७९

कल्पद्रुमः

७५	८०	८३	७२
८२	७३	७५	८१
७०	८५	७८	७७
७९	७६	७१	८४

चिंतामणि

७९	७०	८२	७५
७६	८५	७३	८०
७१	७८	७४	८३
८४	७७	८१	७२

रोहिणी

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ वश्यकर्मणि यंत्रमाह॥ ॥अमरौघेत्यादि॥अमरौघवशीति यंत्रनाम न केवलं रूढं किंतु यौगिकमपीत्याह॥यंत्रस्येत्यादिना॥ तथा च योगरूढमि
दं नामेति सूचितं॥ यौगिकत्वमात्रस्य यंत्रस्येत्यादिनैवोद्धननसंभवादमरौघवशनामेति पुनरुपादानाद्रूढतापि सूचिता॥ अत्र साध्यं दंडकौ॥ तत्राम व
र्णा का ह्रिंषात् ३२॥ इह महत्त्वसंताश्रीमत्तेजम्मदेवावमरनिकरवश्यं यत्र मेनदूजेतो॥ नयदि सकलकामादेवुवश्यः कथं स्तुः करतलन्यत्ववाससस्त
यारणयत्वात्॥ तदत्र साधकयोर्द्वयोः क्रमेणानामवर्णांकाएकोनसप्ततिः त्रिपंचाशच्च ६९।५३। यत्र मिलित्वाद्वयोर्युगपदेकसाधकत्वं तत्र द्वयोरप्य कोः

अमरौघवशं नाम यंत्रराजं स्मराम्यहं प्रिये। यंत्रस्यास्य प्रभावेन देवाः सर्वे वशं गताः॥ पद्मेनागेशिवेवृत्ते विश्वेस्वरे चैव सुरेश्वरि॥ पुनरम्बुदे मनोभानो
नं देके साधकोत्तमः॥ तिथौ वेदे रसे पश्चात्षोडशे दशमे स्मरे। वह्नौ लिखेत्क्रमेणैव पूर्वं पूर्वं विभेदतः॥ साध्यसाधकयोर्वर्णानेकीकृत्य दली
कृतान्॥ विलिखेद्दिशिकः सम्यग्विलोमगतिना तथा॥ साध्यमत्र महेशानि कराङ्कौ वश्यकारिणी॥ गंधाष्टकैः सर्वमुक्तैर्विलिख्य धारयेत्सु
धीः॥ अमरौघा वशं यान्ति सत्य एव न संशयः॥ इदं यंत्रं समुद्दिष्टं देवौघवशकारकं॥ गोपनीयं त्वया भद्रे पशुभ्यः सर्वदा शुभे॥ इति देववश्यकरं
यंत्रं पंचाशत्तमं॥ ५ साध्यांकेन सह योजनीया॥ यथा एतत्रस्पष्टी यंत्रे पुरं पतोरनएवसमाभ्यां विषमं हत्यादिनत्राद्विवचनसंगतिः। नत्वोक्तसं
ख्यायाएरस्मररांकथं कर्त्तव्यमिति वाच्यं संख्यार्द्धकृत्यातत्सम वा न मिलित्वेककाष्ठुनामुद्दिष्टएवग्रासराद्धारात्तत्संभवाद्वर्ईदशस्थलेषु परस्मीषु परस्फू
र्त्ताहानपुत्रानुत्पत्तिः॥ तथा च योगात्मतुः पंचाशदुत्तरस्मान्नतदर्द्ध सप्तसप्तति ७७ तस्मात्क्रमेणाषोडशांकानां पक्षादिकोष्ठेषु
न्यासः कार्यः एवंपक्षः क्रमेणैव पूर्वं पूर्वं विभेदतः इत्यनेनोक्तः॥ अथवा षोडशानमंद्विनवतिरूपांकमारभ्योक्तक्रमेणापक्षा

६४	७०	२२	६७	६७	२२	७०	६२
२१	४४	६२	७८	७८	६१	४४	२७
६५	६०	७१	६५	६५	७२	२०	६५
६०	६३	६६	६२	६२	६६	६३	६०

दिक्षु न्यासो विलोमगतिना चैत्यनेनोक्तोत्र
सरणीयः न्यासो यथा॥ इति देववश्यकरं यंत्रं॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथावस्थायंत्रमाह॥ अधुनेनादिर्यात्तुनरकापहमिति दर्शनाह्नतिकर्मवेदमितिनं त्ता नहीदमुत्तन्नरकस्यक्षयायोपदिश्यते किंतुनरकानुपपत्यर्थं साचनर
कामावस्थोत्रैत्रेरसवंधलाभरूपावश्यकर्मणोपवांतर्भवितुमर्हति॥ अत्र सा ध्यकमला॥ तन्नामवर्णाकास्वर्णाखिपेत् ३३॥ कामघनुसुरयारपाभावेकशो
पिजमदार्तिनाशकौ॥ दंपतीतुस्तुनरमितीवांकेतसुगावतनरांसुगंत्वदः॥ तदत्र ग्रन्थेकदंपत्योःसाध्यकत्वेतन्नामवर्णाकाश्कोनसप्ततिखिपेचाशत्र·ददः·
पउत्तयोःग्रन्थेकंसाध्यांकेनयोगेड्डाधिकशंतंषडशीतिरूपंपंचांकस्वरूपंसंघृत्त्र १०२ं४६ं तदष्टमेकपंचाशत् ५१ त्रिचत्वारिंशत्तु ४३ तत्रैकस्यागेनपंचांशाके

अधुनाश्वरादेवेशियंत्रराजं महाद्भुतं॥ फलस्यकारकंयेन महाकालाभिधंशुभं॥ महारौरवसंज्ञंतुकालघ्नंनरकापहं॥ दशमेपंचमेयद्वौपक्षेतागेशि
वेपुनः॥ विश्वेस्वरेचेद्रुसंज्ञेमनोभानोनयात्मके॥ तिथौवेदरसेपश्चान्तपोडशोविलिखेत्क्रमात्॥ साध्यसाधकयोर्वर्णाने कीकृत्यदलीकृतान्॥ विलिखे
त्सर्वपर्वाद्यविलोमगतिनाप्रिये॥ साध्यमत्रविजानीयात्कमलारक्तवाहिनी॥ पूर्वोक्तेष्वाष्टगंधेश्चविलिख्यसकलार्थदं॥ धारयेत्कंठगंशश्च कालघ्नंनर
कंहरेत्॥ विहरेत्स्वर्गवर्गेषुपुनंर्भिश्रैरभिरम्यते॥ महापातककनाशाय नरकंनैवपश्यति॥ इदंयंत्रंमयाप्रिये चिन्तकोचात्प्रकटीकृतं॥ गोपितव्यंममवचोसाधुभ्यो
यप्रदर्शयेत्॥ इतिनरकघ्नं॥

''हृचत्वारिंशांकश्चशिष्यते॥ तस्मात्पोडशानमंकोष्टमारभ्यदशमकोष्टपर्यंतंलिखेत्॥ एवंपर्वाद्यविलोमगतिनेत्यस्य
कोष्ठंनयोर्द्वयोरप्यन्वयविवक्षयैतदर्थलाभः॥ अत्र चांकसाम्यंसर्वतोनभवति· चतुर्थपंक्तेर्वर्णायोगत्वे षष्ठ्यांतनीस्वकेष्ठे
नैपिनासेतथान्यानपायारितिवोध्यं॥ यद्यपिदशमादिषोडशांतकोष्ठेषुक्रमेणान्यासोदृश्यवमेवांकाःपर्यवस्यंतितथापिमूल
वचनानुरोधात्तथैवयंत्रपरंपरामनुष्ठेयं॥ अतएवोक्तंनीलकंठेनतिथिलोमस्थे॥ न्यासोत्रवोध्यः॥ तन्त्यासोयथा॥ इतिनरकघ्न

५८	५३	५२	६३	५०	५५	४४	५५
५१	६४	५७	५४	४३	५६	४२	४६
६१	५०	५५	६०	६०	५३	४७	५२
५६	५२	६२	६५	४८	५१	५४	५७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अथएवोक्तयंत्राणामतिनरदुर्दैववैभवतो यथोक्तफलानामदायकत्वे सति तन्नाहदृशदुरदृष्टोपशमनाय शांतिकर्मणि यंत्रमाह ॥ अथातश्चत्वादि ॥
जायत इति ॥ प्रतिबंधकनिरासद्वारेति शेषः ॥ कृते चास्मिन् यंत्रे एवोक्तयंत्राणामप्यभिचारेण फलदानादमोघत्वसाधर्म्येण शुभ्रास्त्रनामकत्वमस्या
यद्वा एवोक्तानां सर्वेषामपि यावति प्रत्येकशः फलानुक्तानि तेषां सर्वेषामपि फलानां दायकमिदं यंत्रमिति वा त्रमलनान्वर्थ ॥ इत्थं च षट्कर्मकरत्वम
स्येति यद्यत्कर्मसमीहये तत्तदुपास्यते नेतत्कर्मानुगुणमेव चरत्वादेय ॥ अत्र साध्यंति सो देवताः ॥ सावित्री गायत्री पृथिवी चेति ॥ तन्नामवर्णाकाः अ

अथातः शृणु देवेशि शुभास्त्रं यंत्रनायकं ॥ यस्य विज्ञानमात्रेण यंत्रसिद्धिर्हि जायते ॥ तं देपं च दक्षे वेदे रसे चैव तु षोडशे ॥ दशमे पंचमे वह्निप
पक्षे नागे शिवे पुनः ॥ विश्वे सारेश्वभिमितेम नौ भानौ यथाक्रमं ॥ साध्यसाधकयोर्वर्णान्वेष्टनं परलीकृतान् ॥ विलिखेत्सर्वपर्वासु विले
मविधिना शिवे ॥ साध्यमत्र तु सावित्री गायत्री गायत्री पृथिवीति च ॥ एवोक्तं शीघ्रं चंदनैर्विलिख्य हृदि धारयेत् ॥ सर्वं फलति देवेशि एवोक्तं यंत्र
मुत्तमं ॥ इदं यंत्रवरारोहे न वाच्यं यस्य कस्यचित् ॥ गोपनीयं त्वया भद्रे सत्यं सत्यं मयोदितम् ॥ ७२ ॥ इति द्विपंचाशत्तमं शुभास्त्रयंत्रं ॥ ॥ ॥

मेणाद्वात्रिंशत्पंचविंशतिश्च ३२।३०।२५ ॥ गोगांकः सप्ताशीतिः ८७ सर्वयंत्रफलसेवितपादः श्रीरमारमणास्तु ८३ ७८ ७७ ७२
स्मरणात्कः ॥ सर्वमस्तु रसमीहितमादः कोपि ममर्पातपतिर्जयतीह ॥ तन्नामवर्णांकास्त्रिपंचाशत् ५३ तयोर्योगे चत्वारि ७६ ७३ ८२ ७९
शाधिकशतांकः १४०: सप्तशतेन दश सप्ततिः ७० तदादिकान् पंचाशीत्यंकान् षोडशांकान् तेदादिकोष्ठेषु न्यसेत् ॥ ७० ७५ ८० ७५
यंत्रैकपूरणांत्यकानां कोष्ठानां च विलोमतः पूर्ववदेव कार्यं ॥ फलं तुल्यमित्युक्तमेव ॥ तन्न्यासो यथा ॥ इति शुभास्त्रयंत्रम् ॥ ८१ ८४ ७१ ७४

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अथक्रमेणाशान्तिकर्मणि वश्यकर्मणि चैकं यन्त्रमाह॥ अथैतदादिना॥ एकस्यैव यन्त्रस्य कामनाभेदेन संज्ञाभेदः॥ अत्र साध्यं महामाया। तन्ना
मवर्णाङ्काः षट्त्रिंशत् ३६॥ हसनति हसितवक्त्रारोषकालेनरुष्टाश्रयनज्जुषितुतुष्टास्तीयपत्योतिसगौतन्॥ इतिषष्ठतमन्तरूपाकांतरूपोतिक्षांतो
मनुरघरइहास्त श्रीमलेवम्मनोमा॥ सोत्र साधकस्तन्नामवर्णाङ्काश्चिपंचाशत् ५३ तयोर्योगे सप्ताशीतिः ८७ तदर्द्धं सार्द्धत्रिचत्वारिंशत् ४३½
तत्र सार्द्धैकत्यागे द्विचत्वारिंशांको वक्ष्यते॥ तस्मात्षोडशतमं सप्तपंचाशदंकमारभ्य द्विचत्वारिंशत्पर्यन्तवाङ्कोष्ठमारभ्यतयतपर्यन्तं युक्तो

अथोच्यते महेशानि यन्त्रराजो मनोहरः॥ नारसिंहं तथा यन्त्रं नारायणमथापरं॥ भवन्त्येव महादेवि यन्त्रैकैतु फलद्विभाक्॥ नारसिंहं भयह
रं रक्षेवं चापरं प्रिये॥ तयतेनागकोष्ठतुष्टिवं विश्वमितस्वरे॥ चेद्रमनोरवोनं दन्ति थोवेद रसेषुनः॥ विकारे दशमे वारो वाङ्कोष्ठे लिखेत्सु
धीः॥ साध्यसाधकयोर्वर्णान्विकोष्ठन्यटलोक्तान्॥ विलिखेत्सुर्वपूर्वोक्तविलोमेन तु रेश्वरि॥ साध्यमत्र महामाया देवी त्रिभुवनेश्वरी॥ एवं
कैरवतैइर्व्योर्विलिख्य सुरसुन्दरि॥ धारयेत्कण्ठगं वापि वापि वा हीबाहौ दक्षिणे प्रिये॥ धारणात्रिर्भयो देवि जायते मानवः प्रिये॥ रक्षितो देवताह्
दै जायते परमेश्वरि॥ एतत्तेयन्त्रराजस्य मया सम्यक्प्रकीर्तितः॥ गोपनीयो प्रयत्नेन दातव्यो हि देयः शिष्योभ्यस्तु वचा॥ ८०॥ इति नारसिंहयन्त्रं नारायणाख्ययन्त्रविप
णमतनम॥ ॥

तानंकान्युक्तांतकोष्ठेषु विन्यसेत् यद्यपि तयतमारभ्य वदांतं क्रमेणांतन्यासे प्येवमेवांकविन्यासः फलतितथापित
थैव विन्यासः साधकाभीष्टकारीतिन्वो क्रं अत्र तात्पर्यस्य भवतोस्माहं कं च विलोमेनेति पदद्वयमेवनीलकं ठो
पिदूतो॥ तन्न्यासो यथा॥ ॥ इति नारसिंहयन्त्रं नारायणाख्ययन्त्रम्॥ ॥

४७	४२	५७	५०
५६	५३	४६	४३
५०	५५	४८	४९
४५	४८	५१	५४

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ शान्तिकर्मणि वश्यकर्मणि च यंत्रमाह॥ अथेत्यादिना॥ निग्रहः शापादिदानेन खड्गपीडनं॥ अनुग्रहः वरदानादिना स्वप्रीतिपात्रस्य समीहितसाधनं तस्य सत्ता शक्तिविशेषस्तद्वास्य वश्यकर्मणि पवान्तर्भावास्तु पृथक् वश्यकर्मणि चेति॥ अत्र साध्यं धूम्रलोचना॥ तन्नामवर्णाङ्कान्नुःषष्टिः ६४॥ राज्ञी महलक्ष्मी राज्ञी रूपानुसारेण॥ अवनी राज्ञा तत्र रूपाप्रियव्रतादि सुमुखरत्नका धात्री॥ सात्र साधिका॥ तन्नामवर्णाङ्का एकोनसप्ततिः॥ ६९॥ तयोर्योगे त्रय

अथ वक्ष्ये रौद्रसंज्ञं चान्यघोरमपूर्वकं॥ विधिवन्कथयिष्येऽहं फलद्वयसमन्वितं॥ षोडशे दशमे वाणे वह्नौ नेत्रे च वसौ शिवे॥ विश्वेश्वरे चन्द्रसंज्ञे मनौ भानौ तथा कके॥ तिथौ वेदरसे पञ्चाशे षोडशाद्धि लिखेत्क्रमात्॥ साध्यसाधकयोर्वर्णाङ्कान्यसुरेश्वरि॥ दलीकृत्य पूर्वपूर्वादि लोमविधिना शिवे॥ साध्यमत्र सुरेशानि देवी श्री धूम्रलोचना॥ पूर्वादितेरेवद्वयोर्विलिख्य परिधारयेत्॥ कण्ठे वा वाम बाहौ वा हृदये मूर्ध्नि धारयेत्॥ धारणा जायते सौख्यं रोगग्लानिविनाशनं॥ अघोरा जायते देवि निग्रहानुग्रहक्षमः॥ मयानुधार्यते देवि यंत्रे राजः सुरेश्वरि॥ इदं यंत्रं महितं गोपनीयं तु सर्वदा॥ ८७॥ इति रौद्राघोरं यंत्रं॥

स्त्रिंशदुत्तरशतं १३३ तदर्द्धं सार्द्धषट्षष्टिषु ६६॥ तत्रार्द्धत्यागे षट्षष्ठ्यां कोऽवशिष्यते तस्मात् षोडशतममेकाशीत्यंकं षोडशतमं कोष्ठं चारम्य षट्षष्ट्यंकपर्यन्तं समिन्त कोष्ठपर्यन्तं च विन्यसेत्॥ इदं च यंत्रं यद्यपि रसादि कोष्ठमारभ्य षोडशकोष्ठान्तं पाठक्रमेण न्यासेनापि निष्पद्यते तथापि विलोमविधिनेति निदर्शनात् एवं क्रमप्रकारेणैव त्रापिन्यासः॥ यदित्त विलोमविधिनेत्यनेन कोष्ठानामेव यथोक्तपाठव्युत्क्रमो विवक्षितस्तथापि न तो विद्वेषः॥ तन्न्यासो यथा॥ ॥ इति रौद्राघोरं यंत्रं॥

७२	७७	७८	६७
७९	६६	७३	७६
६९	८०	७५	७०
७४	७१	६८	८१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ वश्यप्रकर्मणि यंत्रमाह॥ अधुनेति॥ श्रीशिवतुल्यता पादक शक्तिविशेषलाभो स्यापि फलमतो वश्यकर्मत्व मेवास्येति ध्येयम्॥ अत्र साध्यं भवानी
नृत्यमवर्णाकास्त्रयस्त्रिंशत् ३३॥ यंत्रस्यापासको यः क्षितिपतितिलकः श्रीमलेवसम्पः का श्यागेहस्तु सोधृ निजकुलचरिता तल्यसंदर्शकस्य॥ मन्त्रोद्दर्शस्यत्र
त्रैस्यगुरुकरुणा याश्रमे मनिध्या हृदयाय स्त्र्याभि यो ददाति प्राणि स्मनु तमामेयपर्णाखिलार्थः॥ तन्नामवर्णाकास्त्रिपंचाशत् ५३ तयोर्योगे षडशीति ८६ः त

अधुना श्रृणु देवेशि यंत्रराजमिधं परं। न कस्यचिन्मयाप्रोक्तं दृष्टं वापि न वेनचित्॥ तदिदं तव संप्रीत्या प्रसन्नोस्मि न तानने॥ अस्मात्परतरं
नास्ति मम प्रेम्णा विवर्द्धनं॥ तदेतिष्ठोन थाव देरसेच षोडशे पुनः दशमे पंचमे वह्नौ नेत्रे चैव वसोश्रिवे॥ विष्णस्त्वरेर्ध्दमिमितमनो सूर्ये लिखेद्बु
धः॥ साधसाधकयोर्वर्णानि कोष्ठस्यदलीकृतान्॥ विलिखेत्सर्वपद्मांचविलोमगतिनाप्रिये॥ साध्यमत्र महेशानि मदानी भवानारिणी॥ एवौ
दितेस्तथा गंधैर्विलिख्य विधिनाप्रिये॥ धारयेन्मस्तके मद्रूममतुल्यापि जायते॥ दन्तीकन्नोस्य यंपानाजायते मानवोत्तमः॥ इदं यंत्रयंत्ररा
जाभिधं तुभ्यं प्रकाशितं॥ गोपनीयं प्रयत्नेन स्वयोनिरिव पार्वति॥ ९५ ॥ इतिशिवसाम्यप्रदं यंत्रराजाभिधंयंत्रं पंचपंचाशत्तमं॥ ॥
इति श्रीशिवताण्डवे सर्वतंत्रेदक्षिणाम्नायेपार्वतीसंवादे षोडशकोष्ठकयंत्रकथनं नाम त्रयोदशः पटलः॥ ॥

दंष्ट्रात्रिचत्वारिंशत् तत्रैकत्यागेष्टचत्वारिंशाव ४८ शिष्यते तस्मात् षोडशान्मंसप्तपंचाशदंकमारभ्य प्रत्युक्तानानंकान्वेदादिपरक्रम | ४४ ४९ ५० ५५
कोविन्यसेत्॥ स्वयोनिरिवेत्यनेन यथा परमप्रसिद्धमपि च स्वस्वामाव्यादेव गोप्यं मस्तिनतुप रोमाज्ञानान्वितो ह्युपा तथाचज्ञात्कम्यापी | ५१ ५४ ४५ ४८
दंगोप्यं स्यादुर्दशः पटलः षोडशकोष्ठकेन यंत्रविस्तारः॥ सुतरां पुनर ज्ञान्स्यप्रति सूचितं॥ तन्यासो यथा॥ इतिशिवतांडवटीकायां मन्त्राद | ४७ ५२ ४७ ४२
४६ ५३ ५६ ५३

१९८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ कातिचिन्तु यन्त्राणि विनैव साध्यसाधकनामवर्णौ कमिलनादिसंस्कारं शिवताण्डवादिषु तन्त्रेषु पटलान्तरेषु प्रणीतानि ॥ ॥ तथा हि ॥ उत्तरखं
डतृतीयपटले मातङ्गीदेवत्यानि वश्ययन्त्राणि ॥ ॥ विंशत्यङ्कमयं यन्त्रं वशयेदखिलं जगत् ॥ त्रिंशत्सङ्कान्वितं यन्त्रं दूरादाकर्षयेत्स्त्रियं ॥ १ ॥ आ
कर्षयेत् ॥ आकर्षणाकारकवश्यताधिकरणीं कुर्यात् ॥ तेन वश्ययन्त्राणीत्युपक्रमस्य न विरोधः ॥ चत्वारिंशत्यङ्कयन्त्रे पतिर्वशायते ध्रुवं ॥ पञ्चाश
त्यङ्कयन्त्रे च राजानं वशमानयेत् ॥ २ ॥ षष्ट्यङ्कलिखितं यन्त्रं सर्वं शत्रुं वशं नयेत् ॥ सप्तत्यङ्कान्विते राजपत्नीन्तु वशमानयेत् ॥ ३ ॥ अशीत्यङ्कमिते
यन्त्रे मोहयेदखिलं जगत् ॥ नवत्यङ्कान्वितं यन्त्रं सर्वं शत्रुं वशं नयेत् ॥ ४ ॥ शतांकनिर्मितं यन्त्रं नगरं वशमानयेत् ॥ गोरोचनाकुङ्कुमेन भूर्जे वा चि
त्रमालिखेत् ॥ ५ ॥ यन्त्रं विलिख्य संपूज्य सर्वान्कामानवाप्नुयात् ॥ ५ ॥ ॥ चतुर्थपटलेषु वगलादेवत्यानि स्तम्भनयन्त्राणि ॥ ॥ मनःशिलाता
लकेन रोचनेन हरिद्रया ॥ विलिखेन्नालपत्रे च यन्त्रं सर्वार्थसिद्धये ॥ ६ ॥ ॥ सर्वेषां स्तम्भनरूपार्थानां सिद्धयेनन्तु यथाक्रमेण न्यायं · नहि वश्यादा
वप्यवंभूतं यन्त्रसाधकद्रव्यं ॥ एकविंशत्यङ्कयन्त्रे मतिस्तम्भो भवेद्द्विषः ॥ एकत्रिंशत्यङ्कयन्त्रं गतिस्तम्भं करोत्यलं ॥ ७ ॥ एकचत्वारिंशन्मिते
गर्भस्तम्भं करोति हि ॥ एकपञ्चाशतितं के मुखस्तम्भनमाचरेत् ॥ ८ ॥ एकषष्टितमे के च सभास्तम्भनमाचरेत् ॥ एकसप्ततमां के च शस्त्र
स्तम्भनमाचरेत् ॥ ९ ॥ एकाशीत्यङ्कयन्त्रास्मिन् ह्यैव स्तम्भनमाचरेत् ॥ नवत्यङ्कमिते यन्त्रे युद्धस्तम्भनमाचरेत् ॥ १० ॥ एकाधिकशतां
के च सर्वत्र विजयी भवेत् ॥ ११ ॥ सर्वत्र विजयः अनुक्तापरवस्तनः ॥ स्तम्भनद्वारोपासितुः शत्रुस्तादिसिद्धिः ॥ तेन स्तम्भनकर्मणामेवोप
क्रमेणाविजयद्रव्यसंगतमिति पश्यतुक्तं ॥ ॥ पञ्चमे तु छिन्नमस्तकादेवत्यानि यन्त्राणि ॥ ॥ गंधाष्टकैरेव तथालक्तकेन समन्वितैः ॥ स
न्मथाक्रान्तदेवेषि संयोगे न लिखेच्छिवे ॥ १२ ॥ संयोगेनालक्तकगंधाष्टकयोर्मिलनेन ॥ एवंतु गंधाष्टकैरलक्तकेवचसमन्वितमिति साध

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कस्य विशेषणमात्रमुक्तं॥ तन्त्रप्रकरणसंपादनं कर्त्तव्यमिति बोधयितुं॥ ॥बंधनात्तु च्यवते देवि सहस्रे छिन्नतापिको। अशीत्या डाकिनीनाशो द्वात्रिंशे तु विवे
शो भवेत्॥१३॥ भूतनाशश्चतुस्त्रिंशे गर्भसंभोरशोत्तरे॥ दशोत्तरे चतुस्त्रिंशे चतुश्चत्वारिंशदंकमध्ययंत्रे॥ ॥जलधौ गिरिचंद्रे च सूर्यराज्यं वशं न
येत्॥१४॥ जलधि ४ भू १ संख्यानां मिलने त्रयस्त्रिंशांकानिष्पत्तिः॥ तावदंकयन्त्राद्राज्यं वशीभवतीति पर्यवसितार्थः॥ ॥खराष्टव्रशयेद्राजा भानुशतमितं
केषे॥ राज्ञा नमोहयेद्देवि द्वात्रिंशांकयन्त्रके॥१५॥ षडशीत्यंकमानेन तु सर्वशत्रुविनाशयेत्॥ सप्तत्यंके भवेद्धानिः अष्टत्रुट्वेः सुरेश्वरि॥१६॥ नारीव
श्यं षष्ठिशते स्यात् द्विशते डाकिनीजयेत्॥ स्त्रीपुंसयोः प्रीतिवृद्धिः सपंचाशच्छतद्वये॥१७॥ षष्ठ्यंकादीन्यनियंत्राणि॥ ॥गोरोचनाकुंकुमाद्यैस्तथा चा
ष्टविधादिभिः॥ चतुःषष्ठ्या चोरनाशः सप्तत्या ज्वरनाशनं॥१८॥ चत्वारिंशे डाकिनीनाशः षट्शते वंदिकृंतनं॥ कृत्यानाशं चाष्टशते वेदरामे रिपोः क्षयः
॥१९॥ वेदरामे चतुस्त्रिंशांकयंत्रे॥ ॥कलासहस्रे लक्षे द्वे वंश्यवृद्धिः प्रजायते॥ षष्ट्यांको देविजयते हि सप्तत्या रणे जयः॥२०॥ सप्तमे कालीदे
वत्यानि यंत्राणि॥ ॥सप्तपंचाशतांके तु जायते ज्वरनाशनं॥ चतुस्त्रिंशत्यंकमध्ये तु सुखेन प्रसवो भवेत्॥२१॥ यंत्रे सप्तशतांकस्य चौरोपद्रवनाशनं॥
षट्शते च महेशानि जायते वंदिमोचनं॥२२॥ पंचाधिकेन वत्यंकमध्ये तु पुत्रनक्षयो भवेत्॥ योगिन्युपद्रवे सप्तकयंत्रं वेदरसोद्भवं॥२३॥ चतुःषष्ठ्यंक
यंत्रं च वेदरसे त्यादेरर्थः॥ परकृत्याविनाशं च यंत्रं वसुशतोद्भवं॥ लक्षत्रयकृते यंत्रे वशी कुर्याज्जगत्त्रयं॥२४॥ दशलक्षांकयंत्रे तु रिपोर्नाशो भवे
त्प्रिये॥ कोटिकनिर्मिते यंत्रे कोटीशो जायते नरः॥२५॥ वसुशतोद्भवं अष्टशतांकयंत्रं॥ यत्तु अष्टोत्तरैकशतमयमित्यर्थात्त रसद्वंचंननीलकंठेन कृतं
तत्तु वरीयः॥ उत्तरादिपक्षस्य वशात्॥ अन्यथा भानुशतोद्भवमित्यादौ सप्तशतांकस्य षट्शते च दशलक्षांकयंत्रे चैत्यादावपि तादृशार्थाकिंनरोच
येः॥ अत्र देवतोपासनं तत्तद्यंत्रस्यास्थानुक्तत्वात् चारोयं [illegible] रसाश्चिके चेहाप्यनिषेध्यो॥ विंशत्यादियंत्रन्यासा यथा॥ ॥

विंशत्यंकयंत्रं				त्रिंशदंकं				चत्वारिंशांक				पंचाशदंकं				षष्ट्यंकयंत्रं			
७	४	५	४	१२	९	५	४	१७	१४	५	४	२२	१२	५	४	२७	२४	५	४
१	८	३	८	१	८	८	१३	१	८	१३	१८	१	८	२३	२८	१	८	२३	२८
५	६	३	६	१०	११	३	६	१५	१६	३	६	२५	२६	३	६	२५	२६	३	६
७	२	९	२	७	२	१४	७	७	२	१९	१२	७	२	२९	२२	७	२	२९	२२

सप्तत्यंकयंत्रं				अशीत्यंकेयंत्रं				नवत्यंकयंत्रं				शतांकयंत्र			
३२	२९	५	४	३७	३४	५	४	४२	३९	५	४	४७	४४	५	४
१	८	२८	३३	१	८	३३	३८	१	८	३८	४३	१	८	४३	४८
३०	३१	३	६	३५	३६	३	६	४०	४१	३	६	४५	४६	३	६
७	२	३४	२७	७	२	३९	३२	२	७	४४	३७	७	२	४९	४२

एकविंशत्यंक·				एकत्रिंशदंक·				एकचत्वारिंश·				एकपंचाशत्·				एकषष्ट्यंक·			
८	४	५	४	१३	९	५	४	१८	१४	५	४	१३	१९	५	४	२८	२४	५	४
१	८	३	९	१	८	८	१४	१	८	१३	१९	१	८	१८	२४	१	८	२३	२९
५	७	३	६	१०	१२	३	६	१५	१७	३	६	२०	२२	३	६	२५	२७	३	६
७	२	१०	२	७	२	१५	७	७	२	१०	१२	७	२	२५	१७	७	२	३०	२२

एकसप्तत्यंक·				एकाशीत्यंकयं·				एकनवत्यंकं·				एकोत्तरशतं·			
३३	२९	५	४	३८	३४	५	४	४३	३९	५	४	४८	४४	५	४
१	८	२८	३४	१	८	३३	३९	१	८	३३	४४	१	८	४३	४९
३०	३२	३	६	३५	३७	३	६	४०	४२	३	६	४५	४७	३	६
७	२	३५	२७	७	२	४०	३२	७	२	४५	३७	७	२	५०	४२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मन्त्राद: ८१

द्वादशशतयंत्रं·

५९७	५९४	५	४
१	८	५९३	५९८
५९५	५९६	३	६
७	२	५९९	५९२

द्वात्रिंशदंकयं

१३	१०	५	४
१	८	९	१४
११	१२	३	६
७	२	१५	१८

चतुस्त्रिंशदंक

१४	११	५	४
१	८	१०	१५
१२	१३	३	६
७	२	१६	९

त्रयस्त्रिंशदंक

१४	१०	५	४
१	८	९	१५
११	१३	३	६
७	२	१६	८

षडशीत्यंक

४०	३७	५	४
१	८	३६	४१
३८	३९	३	६
७	२	४२	४५

द्विशतांकयंत्रं

९७	९४	५	४
१	८	९३	९८
९५	९६	३	६
७	२	९९	९२

चतुःषष्ट्यंक

२९	२६	५	४
१	८	२५	३०
२७	२८	३	६
७	२	३१	२४

पंचाशदुत्तरद्विशतांकं·

१२४	११७	५	४
१	८	११८	१२३
१२०	१२१	३	६
७	२	१२५	११६

षट्शतांकयंत्र·

२९७	२९४	५	४
१	८	२९३	२९८
२९५	२९६	३	६
७	२	२९९	२९२

अष्टशतांकयंत्रं·

३९७	३९४	५	४
१	८	३९३	३९८
३९५	३९६	३	६
७	२	३९९	३९२

षोडशशतांक १६००·

७९७	७९४	५	४
१	८	७९३	७९८
७९५	७९६	३	६
७	८	७९९	७९२

द्विसप्तत्यंकयंत्रं

३३	३०	५	४
१	८	२९	३४
३१	३२	३	६
७	२	३५	२८

द्विलक्षांकयंत्रं २०००००

९९९९७	९९९९४	५	४
१	८	९९९९३	९९९९८
९९९९५	९९९९६	३	६
७	२	९९९९९	९९९९२

सप्तपंचाशदंकयं

२६	२२	५	४
१	८	२१	२७
२३	२५	३	६
७	२	२८	२०

सप्तशतांकयंत्र

३४७	३४४	५	४
१	८	३४३	३४८
३४५	३४६	३	६
७	२	३४९	३४२

पंचनवत्यकयंत्रं

४५	४१	५	४
१	८	४०	४६
४२	४४	३	६
७	२	४७	३९

अष्टोत्तरशतांक १०८

५१	४८	५	४
१	८	४७	५२
४९	५०	३	६
७	२	५३	४६

गुरु: ८१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्रिलक्षांकयंत्रं ३०००००

१४९९९७	१४९९९४	५	४
१	८	१४९९९३	१४९९९८
१४९९९५	१४९९९६	३	६
७	२	१४९९९१	१४९९९२

दशलक्षांकयंत्रं १००००००

४९९९९७	४९९९९४	५	४
१	८	४९९९९३	४९९९९८
४९९९९५	४९९९९६	३	६
७	२	४९९९९२	४९९९९९

कोट्यंकयंत्रं १००००००००

४९९९९९७	४९९९९९४	५	४
१	८	४९९९९९३	४९९९९९८
४९९९९९५	४९९९९९६	३	
७	२	४९९९९९२	४ ९९९९९९२

श्रीहर्षादिभिरपि कृतिचनयंत्राणि संगृह्य व्याख्यातानि ॥ तथाहि ॥ नारीजीवविशिष्टः शतेनस्तु वनं त्र्यंशं चतुःषष्टितो द्वाषष्ट्यादिर्जितवाजितास्त्री
रश्रुभं धान्यं चतुर्विंशतेः ॥ अष्टाविंशतिरीतिहृता किल चतुःपंचाशतास्तु प्रसूः पात्रंशेन रजस्वला गतभया त्रात्रिंशतायात्रिराः ॥१॥ पंचाश
तानान्तपक्षीनरवेस्तयाविषाच्चयं ध्यास्तुतिनीरोगेः स्यात् ॥ रदेर्भभंनोन्नपस्त्रस्तु नश्यत्त्युस्त्रिंशतास्तु घसवादिसर्वं ॥२॥ द्वाषष्ट्यः परबलमाशुना
शमितिवं ध्यायाः सुतजनिता च पंचत्रिंशता षट्त्रिंशता ज्वरगदनाशनं शतेन संग्रामे न भयमथोपफलं जयस्य ॥३॥ दंपत्योर्वशजननं च सप्तत्रिंशता स
ग्रामे भयं न चाष्टत्रिंशता ॥ अंगांगे त्रुभिरिह स्तु इया शमाने वश्यं स्यान्निजमुखवाचनेन विश्वं ॥ ४ ॥ एकादशेशः स्यान्नृपवश्यता ध्वर्वं दीपमोक्षस्य
नेतेरष्टः स्यात् ॥ रमाकुंभिर्वालगरोन दृष्टिस्त्रनुःशतेना त्रतरोफलर्द्धिः ॥५॥ मार्गक्षेममत्राक्षतिर्नवशता कुंद्धीड्रियर्द्धिस्तथासोपपत्तनरुति
जनस्यापसेहः स्यात्सर्वकालेऽपि ॥ षष्ट्या गत्याभिचारतो न भवति मंत्रो ज्वरस्पडुतं सर्वार्थसिद्ध सहस्रसंमितेन तदंका याङ्कवे यंत्रतः ॥६॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मसंदः
८२

यनंदिशत्वाक्षतमस्तुतेतः श्रीभिः कुटुंवेनन्गैसयास्यात्॥ नवषोडशवाराविरिंचिसुरवंगिरिलोचनरुद्रमनुप्रमितं॥ रविविश्वसुमंगलगंभुपदं
रसरामदिशातिथिचक्रमिदं॥ ७॥ सप्तार्कचंद्रभुवनानिभवंति चादौ पक्षत्रयांदशवसूनि च रुद्रकाश्चाः॥ भूपाः कृशानुदशवायवस्तोदनेरंध्रेषु पंच
सप्तवेदसमन्वितानि॥ ८॥ हृष्टैरभिरलंभवेत्सुनिदिनं स्वामिप्रसादेन्दुरांया यात्रायात्वतो मनोहरतनाविद्याविवादेजयः॥ डाकि ७ १२ १ १४
मांदमयंनचौरक्षितिपतोमारिस्थितिर्दुःस्वमनो नारीगर्भविवधमोक्षमविद्राशा ग्रान्यवस्पनरः॥ २॥ ॥अथचक्रमेण डुरूहप २ १३ ६ ११
दार्यायथा॥ ग्रतेनसर्वतः कोष्ठपंक्तिपूर्णराया स्मसमवेतसान संख्याकयंत्रे राजीवृद्धिमुः अकालेप्रसवनिवृत्त्या कालेप्रस १६ ३ १० ५
नस्यदोषपुष्टलाभेनचजीवतिशिशुर्गर्भस्थादिप्रारी यस्य स्वंभूतानारीस्यादिति शेषः॥ द्वापष्ठेः द्विपक्षकयंत्रान्तः जित्वया ९ ६ १५ ४
दिताजितावादिनोयनेयवंभूतनरता चतुर्विंशत्यंकयंत्रात्सर्वाणिधान्यानिस्थिराणिशुभानिहितकारीणिचस्युः॥ अष्टाविंशत्यंकयंत्राद
निवृष्टिप्रभृतिसर्वविधीतिनाशः॥ सुप्रभः सुलप्रसवा॥ प्रसववेदनायामिदंयंत्रंस्त्रीवडवागोमहिष्यादिभिर्धार्यं॥ भवपालिकायांलिखितस्य
नाशः ततोसुखेनप्रसवःस्यात्॥ षट्त्रिंशांकयंत्रेणाख्यीराणासतत्नरजःक्षरणानिवृत्तिः॥ यत्रारजस्वलागर्भोधानयोग्यरजोविशेषवती॥ यत्रिरा
स्याश्चाकारिणः पुरुषा द्वात्रिंशदंकधारणाहस्तुव्याध्यादितोभयहीनाःस्युः॥ एतेषु यंत्रेषु अष्टाविंशतियंत्रातिरिक्तेषु क्रमेणासुवर्णपत्रभूतपं
च-ताम्रपत्रताडपत्ररोप्यपत्रस्वधार्यंवस्त्रादि यंत्राधारपात्रतयास्त्रीकरणीयानीतिपूर्वस्माद्विशेषः॥ अष्टाविंशत्यंकयंत्रंशववस्त्रेचिताङ्गारे
लेख्यं॥ पूर्वोक्तमातायंत्रयंत्रसप्तकंतुगोरोचनयालेख्यं॥ ॥तेषु नेत्रोक्तानन्तुवर्णापत्रेणाभ्रजेषष्ठिचतुष्टयं॥ द्वाषष्टिस्ताम्रपत्रेणचतुर्विंशति
रेवच॥ पंचाशत्त्वचतुस्तालेषोडश्याइजानेथा॥ द्वात्रिंशदंगवस्त्रेणालेख्यनीयंप्रयत्नतः॥ शववस्त्रेचिताङ्गारैः सर्वरोचनयापरमिति॥ परंसर्वं

गुरुः
८२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अष्टाविंशत्यंकयंत्रातिरिक्त शनादियंत्रसप्तकं ॥ पंचाशदंकमययंत्राच्च पमीति नाशः ॥ नवोत्तिंशत्यंकयंत्रात् ॥ रोगैः हिंसकृमिभिः ॥ द्वादंचयंत्रं कुर्मिकाव
ह्नुलंकृत्वा लिंगपरिधाय्य संभोगाछिंगलोमस्तु व ध्वास्तुरतावध्यासंजातपुत्रास्यात् ॥ रदैर्वा त्रिंशद्भिः ॥ सुपुसवार्थे त्यादिना दृष्टे रोभिरलमित्याह् ॥ तो
क्तफलसंग्रहः ॥ सुजनितासुतानाजनिरुत्यातिर्यस्याः सकाशादेवं तनाः ॥ एकादशैरिति ॥ एकादशांकीनिं मितयंत्रे तोन्तपाः सर्वे स्ववशीभवन्ति· अर्थो धनेन
सापिलाभो भवतीत्यर्थः ॥ नैनेरष्टैः १२०० शदशान्यानकारस्थयेन मृत्यु ह्यस्यरकारे राशिसंख्यायां ककारे शौकसंख्यायाडपात्तत्वात् ॥ रमाकुभिः छिपंचा
शत्तरशतांकयंत्रतः १५२ बालगरोबालके पुनर्दृष्टिः डाकिनादिदृष्टिनिपातप्रभवपीडनं भवतीति भावः ॥ पसहैरिति ॥ पञ्चपञ्चत्तरा षष्ठांतांकयंत्रे राशो
साम्यशाप्तिर्भवतीत्यर्थः ॥ ननगैस्त्रिशतांकयंत्रतः कुडुवेन सह प्रीतिः स्यात् ॥ न वषोडशेत्यादि सत्यार्कचंद्रेत्यादिना च चतु(स्त्रिं)शांकयंत्रस्य न्यास स ह यस्तु पालं·

२८	२५	५	४		२	९	५	४		११	८	५	४		२४	२१	५	४		१५	१२	५	४		२४७	२४४	५	४	
१	८	२४	२९		१	८	५	१०		१	८	७	१२		१	८	२०	२५		५	८	११	१६		१	८	२४८	२४६	
२६	२७	३	६		७	८	३	६		९	१०	३	६		२२	२३	३	६		१३	१४	३	६		२४४	२४६	३	६	
७	२	३०	२३		७	२	११	४		७	२	१३	६		७	२	२६	१९		७	२	१७	१०		७	२	२४९	२४१	

८५	८४५	४	१५	६	
१	८	८१	८६	७२	२
८३	८४	३	६	३५	३
७	२	८७	८०	११	

७३	७०	५	४		१९७	१९४	५	४		४४७	४४४	५	४		४३५	४३२	५	४		९७	९४	५	४		१४७	१४४	५	४	
१	८	६९	७४		१	८	१९३	१९८		१	८	४४३	४४८		१	८	४३१	४३६		१	८	९३	९८		१	८	१४३	१४८	
७१	७२	३	६		१९५	१९६	३	६		४४५	४४६	३	६		४३३	४३४	३	६		९५	९६	३	६		१४५	१४६	३	६	
७	२	७५	६८		७	२	१९९	१९२		७	२	४४९	४४२		७	२	४३७	४३०		७	२	९९	९२		७	२	१४९	१४२	

सुमंगलशंकुपदमित्यनेनैकाशीतसंख्यामात्रं विवक्षितं सप्तपदेन सप्तसंख्याविवक्षितासकारस्य यकारतः सप्तमत्वात्॥ वा यवः पंच॥ श्रोपंस्वेष्ट॥ हनी
यस्तु न्यासः॥ दू द्रुरुद्र शर वेदचंद्रराना गोदकृतिथिरविचित्रकुजयः॥ षड्रि शिहृन्न्यसनंदसंमिताः सुकर्मा ज्ञालधिरामयंत्रगाः इत्येवं श्लोकेन मयादर्शितः॥
हृष्टैरीभिरित्यादिनाचतुर्विंशत्यादिकयंत्रस्य फलप्रदर्शितं॥ तत्रान्ययंत्राणां न्यासाः॥ एवमुक्तारुवयेषां न्यासानप्रदर्शितास्तेषां यंत्राणां न्यासं संप्रत्युपदर्श्य
यामस्तत्रासायथा॥ एतानि चयंत्राणि नवकोष्ठकुण्डादिक्रियते तत्रापि ननोविद्वेषः॥ विंशत्यंकादियंत्रं च पूर्वोक्तरीत्याष्टतन्यकोष्ठादि सुपिशाकयंतकंतु
यदि पूर्वोक्तसाध्यसाधकांकयंत्रेषु कथितयंत्रगादान्यमावदेकपत्नाङ्कवति॥ तस्मात्दृशाम्यपि विन्यासास्तन्त्रित्यतांकयंत्राणां स्वीकरणीयास्तुवः एतेषु
पिसर्वेषुतत्त्वकामनानुसारेणापूर्वोक्तसकलयंत्रलेखनी द्रव्यद्रव्याधिकं समुपादेयं॥ मायाबीजमात्रं लिखित्वा वर्णांऽकांश्च लेख्या न तु कामबीजादिकं॥
मायाबीजांतरे लेख्याः सर्वे ऽकाः सवर्णाकाइत्यादेरेव श्रीहर्षादिभिरुक्तत्वात्॥ कामबीजादिकं तु साध्यसाधकनामांकयंत्रविशेषेष्वेव तदभिधानोत्त
रेतादृशाकयंत्राणामेवाभिधानात्॥ इदमुक्तस्यापि॥ तथा यंत्रं पंचदशास्यसुप्रसवदं स्यात्॥ त्रिंशतो दर्शनान्नार्याः सुप्रसवो सवेदजनितं प्रक्षाल्य रुग्गा
:पिबेत्॥ धत्वावाप्यगदेनापस्त्ववशा गः स्यात्सौष्ठुमदाधत्तो॥ भूतार्थरिपवश्यनाशारिदशामस्तूर्ध्वपीडाहरः॥ १॥ कस्तूरीलिखितं चसार्द्धशतकस्य
ऊइमालाहरं कंठस्थं रवपर्याधिलोचनमितं लोकप्रियं वा रुग्गामिति॥ २॥ नवकोष्ठगमुक्तसंख्याकयंत्रलेखनप्रकारोप्युक्तस्तेन॥ यंत्रे षोडश रसर्तु धा
मपभगोदारव्यायसेत्कोष्ठके षट्कान् कादिनवेति पंचदशाके त्रिंशादिके षुक्तमान्॥ उक्तस्थानगतान्नवापितुलायेदंकान् खलाभा पसीनेकातोय
मितैः एथगिति॥ अयमर्थः॥ नवकोष्ठेषु ईशानकोष्ठमारभ्य दिसप्त बद्धनवपंचैकचतुस्त्र्यष्टांकान् क्रमतो विन्यस्य पंचदशांकयंत्रं नास्तिसृणीति॥ त
हृत्नाचार्याः सुखेन प्रसवः स्यात्॥ सुतप्रसवस्तश्रीहर्षोक्तेनैनत्वक्तार्थः॥ त्रिंशदंककरणात्तु खेनहिसंख्याऽक्षेवेदोकसा पंचचत्वारिंशांकस्य
यंत्रस्यकरणोलावोधयिष्यया॥ पष्ठ्यंकयंत्रस्य स्वाङ्कानुसारेऽतिनान्यव स्पताऽदस्यतु करणाभा पदार्थचतुःसंख्यायाम्तत्र्वैः पंचसप्तत्यंकम

यंयंत्रस्यप्रथमंकयंत्रसमानफलकस्यनिर्मितौमपदार्थपंचोत्तरशतांकयंत्रस्यतुकरोतीशपदार्थसप्तसंख्यया·सार्द्धैकशतांकयंत्रस्यतुकरोठधाररागृ
लगरायुहरस्यनिर्मातौनौकापदार्थदशसंख्ययाखपयोधिलोचनपद्शतिपाद्यचत्वारिंशोत्तरद्विशतकयंत्रस्यवाहुनाधारणात्सकललोकशीतिपात्र
ताकरस्यतुकरोतीयत्रपदार्थषोडशसंख्ययाएवंत्रपंचदशांकयंत्रीयांकाननुशायेत्॥ तेनतत्तद्यंत्रसिद्धिर्भवतीति॥ तत्रान्यासायथा॥ ॥विम्बलयंतंत्रे
त्वयथैवविंशत्यंकयंत्रमुपदर्शितं॥ तदुद्धारो यथा॥ मीननामचतुर्थाग्रमज्ञानेंदुचविद्रुल॥ पूरयेत्प्रथमांपंक्तिंद्वितीयांसवयेःपुनः॥१॥ पाषाणाद
रकोणस्थैःस्तृतीयांपरिपूरयेत्॥ एवंत्रिवर्गयंत्रोयंभवितामृधरात्मजे॥२॥ प्रथमस्थितिसंहारःसंहारस्थाद्वितीयके॥ कादिसृष्टिस्तृतीयेचएव

२	७	६	४	१४	१२	६	२५	१८	८	२८	२४	१०	३५	३०	१४	४९	४२	२०	७०	६०	३२	११२	९६
९	५	१	१८	४	२	२७	१५	३	३६	२०	४	४५	२५	५	६३	३५	७	९०	५०	१०	१४	८०	१६
४	३	८	८	६	१६	१२	९	२४	१६	१२	३२	२०	१५	४०	२८	२१	५६	४०	३०	८०	६४	४८	१२८

मक्रमोमतः॥३॥ इति॥ चामत्काराज्ज्तुर्थक्र
तुर्यौयोजकारःसआद्यःप्रथमोयंत्रेत्येवंम्
तेयन्मीनस्यमत्स्यस्यनामसंज्ञाम्षेत्येवंरू
पाः ज्ञानेचन्द्रस्यज्ञानंडः नविद्युतज्ञानंडःविद्रुलकारोयंत्रेत्येवंमन्तेयाद्विद्वलपदठकारइतियावत्॥ तथाचरुकारखकारठकारैःप्रथमपंक्तिःपूर
णीयेत्यर्थः॥ सकारवकारयकारैर्द्वितीयापंक्तिःपूरणीया॥ पाषाणादारकेष्टकस्तेदुत्यचैस्तदुत्पन्नपदपर्यायैःठकजवर्णैरितियावत्॥ तथाचतृतीयापंक्तिःष
कारककारजकारैःपूरणीयेतिफलितोर्थः॥ ननुअंकलिखनप्रस्तावेवर्णलिखनमयुक्तं॥ यद्विचकारादिनवेत्यादिपूर्वोक्तपरिभाषयाएभिर्वर्णैरस्तत्रंद
काएवोपलभ्यंतेतथापिननिस्तारः॥ रुकारखकारठकारैःक्रमेणानुवृद्धिरूपांकलब्धा एकोनविंशत्यंकसंख्यायाःप्रथमपंक्तौविवक्षितायाःअलाभप्र
संगात् एकोनाधिकविंशत्याषष्टिरंकाःप्रकीर्तिताइतितत्रतंत्रेदर्शनेनप्रथमपंक्तावेकोनविंशत्यंकानामधमायामेकविंशत्यंकानांतृतीयायांविंश
त्यंकानांतृतीयायांविंशत्यंकानालिखनस्याभिप्रेतत्वादित्यतआह॥ ॥प्रथममित्यादिना स्थितिसंहारःस्थितेर्द्वकारात्संहारःविपरीतक्रमः॥प्र

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

थमपंक्तौ स्वीकरणीयः॥ तथा च प्रतिलोमतो गणनया डकार ङकार ठकारा यावत्संख्याका भवंति॥ तावत्संख्या बोधकास्त्रयोंकाः क्रमेण प्रथमपंक्तौ निवेश्या इति फलितार्थः॥ द्वितीया॥ द्वितीयपंक्तौ संहारः क्षकारात्प्रतिलोमतो गणनानाश्रयणीया तथा च क्षकारात्प्रतिलोमतो गणनया सकार ट्योया वत्संख्याकास्तावत्संख्याबोधकांकाः क्रमेण द्वितीयपंक्तिस्थकोष्ठत्रये लेख्या इति फलितार्थः॥ तृतीये तृतीयपंक्तौ कादिसृष्टिः करमादितः कृत्वा सृष्टिक्रमेणानुलोमतो गणनाः स्वीकरणीया॥ तथा च ककाराद् अनुलोमतो गणनया टकार ककार ऊकारा यावत्संख्याकास्तावत्संख्याबोधकांकाः क्रमेण तृतीयपंक्तौ लेख्या इति फलितार्थः॥ एतेषां कावाम क्रमेण वलेख्या॥ वामादिक्रममारभ्य नवकोष्ठानि पूरयेदिति न चैवो क्तेः॥ तथा च तृतीयषष्ठनवमकोष्ठमारभ्य प्रथमचतुर्थसप्तमकोष्ठपर्यंतं क्रमेण प्रथमद्वितीयतृतीयपंक्तिस्थकांका लिखेत्॥ इत्थं चैवं पर्यवसितार्थसंग्रहः॥ भुजंगविघ्नरकोष्ठेषु वेदाष्टचंद्रत्रिगुरूहर्षमितांकाः शंभुकोष्ठादितः स्युः॥ क्रमशाइहतु यावत्तमाराणां कयंत्रे सकलमनुजवांछा पूर्त्तिकल्पद्रुमाख्ये इति॥ तन्न्यासो यथा॥ २ १२ ५॥ ॥अथ शांत्यादिकर्मसु तिथिवारनक्षत्राणि तंत्रांतरे प्रतिपादितानि॥ तत्र शांतौ हेमंतऋतुः आवश्यके तु सूर्योदयादे कच १० ७ ४ घटिकात्रिंशत्तमघटिकामारभ्य पंचाशत्तमघटिकापर्यंतो रात्रिभागविशेषरूपो हेमंतो ग्राह्योपादेयः॥ शुक्लपक्षस्य द्वितीया तृतीया ८ १ ११ पंचमी तिथयः गुरुबुधसोमवाराः॥ आर्द्रापूर्वात्रयमुत्तरात्रयं॥ स्वजन्मतः दशमतदेकोनविंशतितमानि च॥ नक्षत्राणि॥ उत्तरदिशाभिमुखः प्रयोगानुष्ठातुः कुशासनस्योपरि पद्मासनं कृत्वा स्थेयं॥ पद्मसुगंधातु पूजादिकालेषु द्रष्टव्या गणपतिरग्निदेवता॥ साध्याक्षरैर्ग्रथनं कृत्वा यंत्रस्य पत्रे कलिखनात् पूर्वं यंत्रे देवनाम त्रोग्रथः॥ ग्रथनं नाम एकं मंत्राक्षरं एकं तत एकं काम्याक्षरं ततः पुनर्मंत्राक्षरे पुनर्नामाक्षरमिति रीत्या याव काम्याक्षर समाप्तिः मंत्राक्षरोच्चारणं॥ काम्यवर्णानां मंत्रवर्णानां वाधिक्ये तु पुनरावृत्तिः सज्जनन्तरणानां कर्तव्या॥ द्वितीयाद्याह ते

पवर्णेभ्यामाजपा एवं मंत्रोच्चारणस्य जातं तेनात्र पत्रे देवदत्तस्य दुःखं नाशयेति कामवर्णाः ॐ त्रिं त्रिपुरायै नमः इति च मंत्रस्तत्र प्रथमे सि
द्धयंत्रे लेखनीयः सति ॐ दे त्रिवत्रिदपुत्रस्य दुःखं नमः नाॐ ज्ञत्रिं यत्रि इत्येवं जप्यं अर्द्धचंद्राकारं श्वेतं पार्श्वयोः पद्मलाद्धितं
जलमण्डलमः चकर्त्तव्यं यंत्राद्बहिस्तत्र कर्मानुरूपं जलादिमण्डलं लेख्यमिति केचित् स्वापवेशनस्थानमेवं विधजलमण्डलं
कार्यमिति कश्चित् रत्यादिकमर्दवनास्थानमेवं विधं कार्यमिति केचित् भूतवर्णानालिखनं यंत्रस्थानेदिगादिरूपे समाम्ना
तं तत्रैव मण्डलं जलादेर्विलिख्य तदन्तर्जलादिभूतवर्णा लेख्या इति अपरे पूज्यदेवस्य ज्ञानया मादेरधिकरणतया तत्र मण्ड
लं स्वीकरणीयं यंत्रादिषु च तत्र मण्डलं लेख्यमिति उभयथापि मण्डलमाश्रयणीयमित्यपरे स्वस्वगुरुसंप्रदायाच्चैतत्पक्ष
व्यवस्था तत्तवर्णाश्च ह्लेख्याः प्रकृते तु पार्थिववर्णा एव विशेषवचनादा लेख्या भूमण्डलं च कार्यं मारीप्रशमने भूतप्रेतवेता
लडाकिनीप्रभवपीडोपशमने शत्रुनाशे च वह्निमण्डलं तत्र तन्मंत्रसहितास्तद्वर्णा लेख्याः श्वेतं च पुष्पवस्त्रगंधाक्ष
तमादेयं स्वयमपि श्वेतमेव परिधेयं वरणासामर्थ्यपि सर्वांश्चैव श्वेतवस्त्रश्वेतगंधयुक्ताहारादिभूषितं ध्यायेद्धि ले

स्वयंत्रस्य देवशांतिककर्मणि मघा इति भाषया प्रसिद्ध मधूकस्य पत्रे · तदभावे विल्वपत्रे यंत्रं लेख्यं जातिसंभवा तु लेखनी
तदभावे तु वर्णौ यतामत्र पुलोहायामार्गान्यतम प्रभवा सा त्वेष्टव्या अष्टगंधरक्तगोरोचनासहितो मषीस्थानेग्राह्य: यद्वा ख
डिकात्र लेखनार्थं ग्राह्या इंगालेन वालयह विनाशार्थं परदत्तशापस्यनार्थं च हिंगुलेन लेखं   वश्यपुष्टं वसंतऋतुः सूर्योद
यमारभ्य दश घटिकापर्यंतो दिवाभागविशेषो वा वसंतो नाद्देय: चतुर्थी षष्ठी सप्तमी नवमी त्रयोदशीति पंच तिथयः सोम
गुरू वासरौ आर्द्रामृगशीर्षरेवतीचित्रानुराधाश्वाति च पंच नक्षत्राणि आयुर्वृद्धिकरं तु कर्म श्रवणर्क्षे: पूर्वाभिमुखं प्र
योगानुष्ठातुः धनप्राप्तिरूपे तु वश्यकर्मणि पश्चिमाभिमुखं ज्ञानादिरूपे तु नैत्रशानाभिमुखं छागस्यासन रोस्वस्तिकास
नं वश्यप्रयोगानुष्ठात्रास्थेयं मोहने तु गोचर्मणि क्षुरवशाप्रारु चर्मणि मोक्षयाप्तौ चित्रमृगचर्मणि पितृमोक्षे खड्गमृगच
र्मणि ज्ञानप्राप्तिसाधने श्वेतकंबले स्थेयं पाशमुद्रा चात्र प्रदर्श्या सरस्वती चात्र देवता विदर्भकृत्वा चात्र जपानुष्ठानं
विदर्भो नाम आदौ मंत्राक्षरद्वयं ततएकं काम्याक्षरं ततः पुनर्मंत्राक्षरद्वयमित्येवं यावत्काम्याक्षरसमाप्तिमंत्रोच्चारणं

तथाचयन्त्रविशेषमन्याःपुत्रंदेहीतिकाम्यं ॐनिंनित्यक्लिन्नायैनमः इतिचमंत्रस्तत्र ॐ निंविनित्यशक्तिन्नायायैनममः ॐत्याः
द्वै २ निंनित्यक्लिन्नंन्नायैदैंनमः ह्रिं ॐनिंइतिरीत्याएकोनत्रिंशद्वर्णमंत्रोजप्यः रक्तंचवस्त्रपुष्पगंधादिकंसकलमत्रादेयं
प्रातरादित्यसंकाशंरक्तांबरसुधारिणीं रक्तगंधानुलेपार्थंरक्तमाल्यप्रभुंस्मरेत् वायुवर्णाश्चात्रलेख्याः वायुमण्डलंवा
त्रलेख्यं मोहनेतुजलमण्डलंजलवर्णाश्चलेख्याः भूर्जपत्रंचलेखनार्थंयंत्रस्यस्वीकरणीयं मोहनेरौप्यपत्रं राज्यार्थे
बिल्ववृक्षजं पलाशजंपीठं राज्यकामनायांयंत्रलिखनार्थंस्वीकार्यं पुत्रकामनायांपित्तलपत्रंभार्याप्राप्तौतमालपत्रं देशप्रा
प्तौशंखशुक्त्यादिकंपद्मपात्रंवा भोगप्राप्तौवटवृक्षस्यपत्रेपीठेवायंत्रंलेख्यं मोक्षार्थंताडपत्रं कामप्राप्त्यर्थंकांस्यपात्रं
भक्ष्यवस्तुप्राप्त्यैकदलीपत्रं सर्वस्यापिवशीकरणायकेवलंभूर्जपत्रमेवास्थेयंकिंतुताम्रपत्रमपिस्वेच्छयाव्यवस्थितं
पूर्वोक्तंच [illegible] स्वलाभेबिल्वस्यपत्रेपीठेवायंत्रंलेख्यः आकर्षणेसीसजंपत्रंकरणीयंकरंजप्रभवालेखनीचात्रज्ञेया अ
ष्टगंधेनसहिताःकरिमदेनचसहितागोरोचनाचात्रमषीस्थानेयदिचाष्टगंधानगंतव्यकरिमदइत्युच्यतेतदापुनर्नदी

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यन्तां आदीयन्तां वा भागद्वयं मद्यश्रीखण्डेन राज्यप्राप्त्यै रोचनाकुंकुमाभ्यां पुत्रप्राप्त्यै गंधकेन मोहनार्थं लेखः इतरत्र वश्यक
र्मणि गैरिकेन लेखः लेखनी तु दूर्वांकुरप्रभवा पौष्टिके आयुःकरे च कर्मणि शान्तिसंभवा हेमरूप्यादिप्रभवा लेखनी स्यात्
स्तंभने तु शिशिरऋतुः सूर्योदयादारभ्यैकपंचाशन्नमघटिकान्त आसूर्योदयं वर्त्तमानो रात्रिभागोऽत्र शिशिरः अमावास्या कृष्णप
क्षस्याष्टमी चतुर्दशी चेति तिथयः रविशनिभौमा वासराः आर्द्रापूर्वात्रयभरणीमघाख्यानि च षट् नक्षत्राणि पूर्वाभि
मुखं चानुष्ठातुः गजचर्मणि विकटासनं कृत्वोपासकेन स्थेयं गदामुद्रा चेह प्रदर्श्या महालक्ष्मीर्देवता संपुटं कृत्वात्र यं
त्रे देवतामंत्रजपः कार्यः संपुटीकृत्य मंत्रजपो नाम आदौ संपूर्णमंत्रः मध्ये संपूर्णकाम्याक्षराणि तत्र ॐ वैं वैं क्ष्म्यैं न
मः जलस्तंभं कुरु मः नवैं क्ष्म्यैं वैं ॐ इति रीत्या मंत्रजपः करणीयः ऊर्ध्वाग्रं त्रिकोणाकारं स्वस्तिकोपेतं वह्निमण्डलमत्र दिगष्ट
कलिखितात्र तन्मंत्रसहिता वह्निवर्णा लेखाः पीतं च वस्त्रपुष्पगंधादिकं सकलमादेय पीतांशुकधरं पीतं पीतमाल्या
दिभूषितं यंत्रदेवं स्वयं ध्यायेत् पीतगंधांबरादियुक् यंत्रलेखनार्थं चैपैतलं पत्रं सर्वाभावे तु विल्वजमिति त्वत्रापि प्रवर्त्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तां राजवृक्षःवाहवाइतिप्रसिद्धस्तद्द्रवाचात्रलेखनीगजवेलीतिप्रसिद्धतीक्ष्णलोहजावास्यात् अष्टगंधयुक्तेनचित्रकेणाष्ट
कैश्चितांगारेणाचलेखनार्थमषीस्थानेद्रवद्रव्यंकरणीयं विद्वेषणेयीष्मऋतुः सूर्योदयादेकादश तमघटिकामारभ्य
विंशतमघटिकापर्यंतोदिवाभागोवातथा अष्टमीनवमीद्वादश्येकादशीतिचतस्त्रस्तिथयः शुक्रशनीवासरौ आर्द्रापूर्वात्र
यभरणीमघाश्लेषानिचषट्नक्षत्राणि नैर्ऋत्यदिगाभिमुख्यंप्रयोगानुष्ठानेतुः जंबूकचर्मणिउत्करासनंवबीस्थेयं मुशल
मुद्रा चात्रप्रदर्श्या ज्येष्ठाधूमावतीपर्यायान्तरदेवतारोधनंकृत्वा चात्रमंत्रजपोनुष्ठेयः रोधनंनामकाम्याक्षराणामादौम
ध्येंतेचमंत्रोच्चारणं तथाचयन्त्रचेत्रमेत्रयोर्विद्वेषंकर्तुमितिकाम्यं ॐ लुंलुलजायैनमइतिचमंत्रस्तत्र ॐ लुंलुलजायैनमः
चैत्रमैत्रयोः ॐ लुंलुलजायैनमः विद्वेषंकुरु ॐ लुंलुलजायैनमः इत्यादिरीत्यामंत्रोजप्यइतिफलितं वर्तुलंधूम्रंध्वज
लांछितमाकाशमण्डलमत्रकार्यं आकाशवर्णाश्चात्रलेख्याः किंवावह्निवर्णाविह्निमण्डलसहितावइहाप्यादेयाः धूम्रंचवस्त्र
पुष्पमाल्यगंधादिकमादेयं कृष्णाजामंकृष्णवस्त्रसहस्त्रादिन्यवर्चस कृष्णांगरागंभूताद्यैः प्रेताद्यैश्चसमाहृतं दक्षिणाश्रा
स्थितंस्वेष्टदेवंध्यायेत्समाहितः श्मशानचीवरस्योपरिच्चेदंलेख्यं तीक्ष्णलोहजाचलेखनीकार्या स्तंभनवदेवात्रापिलिखनार्थं
द्रवद्रव्यंकरणीयं यन्त्र विषजलेनैवलेख्यं उच्चाटनेतुवर्षाकालः एकविंशतितमघटिकामारभ्यत्रिंशत्तमघटिकाप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्यंतो दिवाभागो वा दिनह्रासेन यदि तत्र भागः प्रविशति तदापि न तो विद्वेषः एवं क्वचिद्रात्रिसमारचनं मध्ये दिवाभ
गस्य प्रवेशेपि न क्षतिः कृष्णपक्षस्याष्टमी चतुर्दश्यौ शनिवारः पूर्वात्रयार्द्राभरणीमघाख्यानि च षट् नक्षत्राणि
वायवी दिङ्मुखश्चातु स्नानास्यात् मृगचर्मणि वज्रासनं कृत्वास्थेयं वज्रमुद्रा चेह प्रदर्श्या दुर्गा देवता योगं कृत्वा म
न्त्रजपो त्र कर्तव्यः यत्र देवदत्तमुच्चाटयेति कामं ॐ कं कमलवासिन्यै नमः इति च मंत्रस्तत्र पूर्वकाम्याक्षराणि सर्वाण्यु
च्चार्य पश्चान्मंत्रः पठनीयः योगोह्ययमेवोच्यते वह्निमण्डलसहितावह्निवर्णा अत्र लेख्याः कृष्णं च पुष्पगंधवस्त्रा
क्षतादिकं सर्वमादेयं ध्यानं चेहापि विद्वेषणवदेव कृष्णवस्त्रादिसंहृतत्वादिना स्वेष्टदेवस्य कार्यं पर्वतानां स्वस्थानदे
शतश्चालनं न्व्युच्चाटनमेवं तत्र ताम्रमयं पत्रं अन्यत्र तु वैल्वं पत्रं पीठं वा स्वीकुर्यात् तीक्ष्णलोहजैव लेखनी अष्टविषाष्ट
गंधः चितांगारसमन्विता गोरोचनी च मषीस्थाने पारदेन वा लेखनीयं मारणं तु शरद् ऋतुः सूर्यास्तघटिकामारभ्य
दश घटिकापर्यंतो रात्रिभागो वा गौणः शरहृतुरनात्स्यः कृष्णपक्षस्याष्टमी चतुर्दश्यावमावास्या चेति तिस्रस्तिथयः र
विभौमशनयो वासराः आर्द्रा पूर्वात्रय भरणी मघाख्यानि च षट् नक्षत्राणि दक्षिणादिगभिमुखत्वमत्र स्थातु मह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पचर्मणिभद्रासनेनवश्यार्थेयं खड्गमुद्राचेह प्रदर्श्या कालीचात्रदेवता ऊर्ध्वाग्रं स्वस्तिकोपेतं रक्तं त्रिकोणं वह्निमण्डलं स्वी
करणीयमत्र वह्निवर्णा इत्याख्याः विद्वेषणाद्वेहापिध्यानं स्वेष्टदेवस्य स्वीकार्यं कृष्णवर्णा वस्त्रपुष्पगंधाक्षतादिकमत्रादे
यं लोहमयं पत्रं सर्वाभावेतु विल्वजमिति त्वत्रापि प्रवर्त्तते श्मशानवस्त्रे वा लेख्यं विषाष्टकचित्रकचितांगारसहितैरष्टगं
धैर्गोरोचनया चात्र लेखनं रुधिरेण वा मनुष्यस्य लेखनी तु नरास्थिभिः कार्या तदभावे तीक्ष्णलोहप्रभवा सा स्यात् जपश्चा
त्र पल्लवं कृत्वा पल्लवो नाम मंत्रस्यान्ते काम्याक्षराणि तथा च यत्र देवदत्तं मारयेत्येवं काम्यं ॐ धूं धूमावत्यै नमः इति च मंत्रस्त
त्र ॐ धूं धूमावत्यै नमः देवदत्तं मारयेतिरीत्या मंत्रजपः करणीयः इति फलितार्थः इदं तु बोध्यं मारणप्रयोगो नातुरस्य
तु सुचितः ब्राह्मणधार्मिकक्षत्रियगोस्त्रीप्रभृतिरक्षार्थं तदाचरणं निर्बंधोपि साधकेन ब्राह्मणस्त्रीमूर्द्धाभिषिक्तमारकः
स्यात् स्वदेशे नाभिचारप्रयोगः कार्यः किंतु संधिस्थाने परदेशे वा प्रयोगश्चायं मारणीयस्य मृत्युप्रतिबंधकशुभग्रहाणाम·
भावे सति कार्यः अस्माच्च प्रयोगात् मृत्युसाधकाद्दुष्टादिसंपत्तिः स्वकार्यजननी तदास्याद्यदि न किंचित्प्रतिबंधकं स्यात्
सति मारणीयदीर्घायुष्ट्वकरग्रहे सत्यप्यसौ प्रयोगो नेदानीं कार्यसाधयेत् नापि च प्रयोगमन्त्रं विनैव तन्मारणसिद्धिः
तेषां ग्रहाणां मारणे उदासीनत्वात् तस्मात्प्रयोगवैयर्थ्यमिति संक्षेपः यंत्रलिखनं त्वेवं कार्यं प्रथमं गणपतिं कर्मदेव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तां तत्त्वज्ञो गणिकस्तया तिथिवारनक्षत्रैः शुभं यंत्रदेवतानां च संपूज्य पूर्वोक्तदिशाक्रमेण पुरश्चरणेन सिद्धयंत्रदेवताकः साधकः
पूर्वोक्तरीत्या भूर्जचक्रं पीठं तत्र लिखित्वा संपूज्य प्रजापतेनमस्कृत्य इत्यादिभिस्त्रिभिर्विधालयतंत्रोक्तैः श्लोकमंत्रैः प्रजापतिं सं
प्रार्थ्य गुरुं गणपतिं च नमस्कृत्य प्रसन्नचित्तो भूत्वा मन्त्रं कर्मानुगुणया तत्तन्माममय्या पूर्वोक्तया लिखेत् तत्र नवकोष्ठकयन्त्रलि·
खनप्रकारो यथा पश्चिमतः पूर्वपर्यन्तांश्चतस्रो रेखाः पूर्वं कृत्वा दक्षिणतश्चतस्रो रेखा उत्तरपर्यन्ताः पश्चात्कृत्वा नवकोष्ठान्का
रयेत् तत्र च मध्यमे पंचमकोष्ठे ह्रौं इति प्राणबीजं लेख्यं प्राणबीजस्यान्तः अत्रिपुरे देवदत्तस्य दारिद्र्यनाशमयस्य मयैत्यादिले
ख्यं प्राणबीजस्य पार्श्वे दक्षिणे हंस इति वामपार्श्वे सोहमिति लेख्यं तयोरुपरि पार्श्वयोरेव इं ईं इति नेत्रे नेत्रयोरधः पार्श्व
योरेव उं ऊं इति कर्णौ लिख्यौ इतिरीत्या समपरिकरं लिखितस्य प्राणबीजस्य बहिः पूर्वं मायाबीजं तस्यान्तः कामबीजं तस्यान्त
र्वधूबीजं तदन्तक्रमेणक्रीत्या माया मो लेख्यः इति मध्यकोष्ठे विलिख्य प्रथमादिकोष्ठेषु क्रमेण मायाबीजकामबीजस्त्रीबीजान्यं
तर्बहिर्भावेन लिखितानि तोक्तमार्गेणाप्यत्राकान्त विलिख्य अं आं इं ईं उं ऊं ऋं ॠं ऌं इति तिनववर्णानेकैकशो नवकोष्ठेषु लिखि
त्वा पुनः प्रथमसमारभ्य ॡं एं ऐं ओं औं अं अः कं खं इत्यादिरीत्या कोष्ठक्रमेणैव प्रतिकोष्ठं मातृकावर्णान् लिखेत् उत्तरणात्कृत्र
यस्त्वाज्ञाः इत्थं नवकोष्ठेषु पंच पंच वर्णान्लिखनेन उत्तरणान्तान्यागे च सकारान्तानां वर्णानां लिखनं संहृतं उर्वरितानाक्रहलक्षान्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कावर्णाः क्रमेण प्रथमपंक्तौ प्रथममध्यमतृतीयकोष्ठेषु लेख्याः प्रथमकोष्ठे अं लृं गं ढं भं हमिति षड्वर्णाः चरमे लृं खं डं वं स मिति पर्य
वस्यति संग्रहेपि भूदिक्नंदशरा वराग्निखविधिद्विजाह्वयः कोष्ठके प्राच्येत्येतु नवाष्टभूमि नवदकं नंदाग्निनागाह्वयः म
ध्ये त्यक्रमेणागताः शरमिता वाहीन्द्रतीये क्रमादंत्याद्यश्च रमध्य नंदमितिमृत्कोष्ठीयं यंत्रे धिकः ततश्च वहिर्वृत्तरेखामेकां कृ
त्वा तदंतश्चतुर्दिक्षु पूर्वादिक्रमेण वर्गाष्टकं लिखेत् ततो वज्रेण प्रतिदिशं वेष्टयेत् ततो वहिः सविंदुना क्षकारेण
वेष्टयेत् ततः पुनर्वृत्तरेखां कृत्वा तस्यांतः सविंदुः क्षकार पाशवीजांकुशवीजैः सम्पुटितैर्वेष्टयेत् ततः प्रणवेन वेष्टयेत्
ततो वहिर्वृत्तं कृत्वा प्राणप्रतिष्ठामंत्रं लिखेत् ततो वहि रष्टदिक्षु तत्र त्कर्मानुगुणं मण्डलं कृत्वा तदंतस्तत्तन्मं
त्रांस्तत्तत्कर्मानुगुणाभूतवर्णाश्च लिखेत् ततो वहिश्चतुरस्रं चतुर्द्वारं कृत्वा तत्र दिगष्टके लं रं टं क्षं हं यं सं हमिति वर्णाष्टकं
लिखेत् ततोष्टदिक्षु यंत्रगायत्र्याः त्रिशस्त्रिशो वर्णांल्लिखेदिति सर्वे वामीवर्णामध्ये ततः कोष्ठलिखित यंत्रप्राणवीजाभिमु
खाः कर्णीयाः श्री हर्षकल्पयत्नादृहिरग्निवीजमष्टदिक्षु लेख्यमाह ततो लिखितं यंत्रं पटसूत्रेण वेष्टयित्वा भूर्जपत्रे वा क्षौम
वस्त्रे वा सुवर्णरौप्यताम्रान्यतमलोहेषु वा वध्वा यंत्रप्रतिष्ठां कृत्वा मायावीजेन होमं कृत्वा संपाताज्यं तत्राक्षिप्यासं ददृ
दक्षिणादिकं दत्वा श्री गुरुस्मरणादत्र पत्रं स्वस्य दक्ष हस्तादिषु धारयेत् धारयंश्च नरो वज्रपाते वपूर्वोक्तं फलं लभेत यदिप्तुत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्वेलवत्तरं पत्तलप्रतिबंधकमस्यास्तिनदात्रिवारं पंचवारं वा पुनरिदं साधयित्वा धार्यं अंतनस्त्रिवर्षादर्वादवश्यमेव कार्यसिद्धि
र्भविष्यतीति संक्षेपः षोडशकोष्ठकेषु तु यंत्रेषु एष विशेषः पश्चिमतः पूर्वपर्यंताः पंचरेखाः कृत्वा ततो दक्षिणतउत्तरां
ताः पंचरेखाः कुर्यात् तेन षोडशकोष्ठाः संपद्यंते प्राणवीजमध्यस्थितकोष्ठचतुष्टयं यथास्थानि तथा लिखित्वा तदंतः पूर्व
वदेव भो त्रिपुरे देवदत्तस्य दारिद्र्यं शमय शमयेति लेख्यं हंस इति वीजं सोहमिति वीजं च द्विद्विकोष्ठशिरोगतरेखाकृष्ठ
तया प्राणवीजस्यैव पार्श्वयोर्लेख्यं मायावीजकामवीजवधूवीजानामंतः प्रतिकोष्ठमंकालेख्या इति विह्वापि अकारादिषो
डशस्वरान् क्रमेणैकैकशः षोडशकोष्ठेषु क्रमादितो लिखित्वा पुनः ककारादितकारांतषोडशवर्णानेकैकशस्तत्र लिखि
त्वा पुनः क्रमेण क्षकारादिथांतवर्णानेकैकशो लिखेत् तथा चैकैककोष्ठे अंकं क्षं आं खं लं इं गं हं इ घं सं इत्यादिरीत्या वर्णाः
पर्यवस्यंति इह मध्यकोष्ठाभावादेव मध्यकोष्ठमारभ्य यंत्रलिखनमिति नियमः पूर्वोक्तो न प्रसरति किंतु तद्यंत्रप्रस्तावो
त्क्रमेणैकयंत्रपूरणमत्रावधातव्यं ॥ एते चैकद्व्यादयोंकाः स्वस्वलिखनकाले स्वस्वसमानसंख्याकदेव
तास्मरणपूर्वकं लेख्याः ॥ तत्रैकः परमात्मा द्वौ पक्षौ तत्र दधिष्ठातृदेवतास्मारकौ त्रयोग्नयः ब्रह्मविष्णुशि
वा वा चत्वारो वेदाः पंचभूतानि षट् ऋतवः ॥ सप्तमुनयः अष्टौ वसवः नवनिधयः ॥११॥ दशदि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यः दिक्पाला वा एकादश रुद्राः द्वादशादित्याः त्रयोदश विश्वेदेवाः चतुर्दश मनवः इंद्रा वा पंचदश तिथयः षोडश मह
राजाः द्वादश मासाः पंच वायव इति मिलित्वा सप्तदश श्च यं सकल धर्म शून्यं परं ब्रह्म एवं रीत्या सर्वांकेषु व्यस्त समस्तांक
संख्या समानसंख्याकतत्तद्देवतास्मरणापूर्वकं तत्तद्देवतानाम भेदं तत्तदंकेषु ध्यायंस्तत्तदंकस्वरूप तत्तद्देवताभ्यश्च तत्त
दभीष्टद्यार्थ यन्त्र च श्यमं कयंत्र लिख नास्मिद्धिमाप्नोति॥ ॥एतानि चयंत्राणि स्वानुकूल्यमायातान्येव स्वसमीहितार्थसा
धयंति नाखिलान्यपि आनुकूल्यं चैवं विचार्यं साध्यसाधकनामवर्णांकानां मिलने सति संपन्नांकेन च भिभक्ते सति शेषः समां
को यदि भवेत् तदा तत्साध्यदेवतांकयंत्रं तत्साधकस्याभीष्टप्रद इति· यत्तु साधकद्वयं साध्यत्रयं वा सममेव विषममेव
वा· किंवा एकं सममेकं विषमं द्वितीये एकं समं विषमं वा द्वयं तु विषमं समं वा तत्र समाभ्यां विषमाभ्यां वा समैर्विषमैर्वा समं वा
विषमं वा हन्यात् गुणयित्वा संपन्नांकेन नवभिर्हृते सतीत्यादि पूर्ववत् एतदुदाहरणं यथा त्रिपुरेति साध्य तन्नामवर्णांकाः
षट्त्रिंशत ३६ साधिका श्रीमहल्लवसंतारा जीतन्नामवर्णांका एकोनसप्ततिः ६९ तयोर्योगे पंचोत्तरशतांकः १०५ नवभिर्भागे
षडंगो वशिष्टः ६ साध्यांके षट्त्रिंशदादिरूपे साधकांकेन गुणिते २४८४ चतुरशीत्यधिकचतुर्विंशतिशतांकः संपन्नः तत्र नव
भिर्भागे हृते नवांकः शिष्यते ९॥ ॥इति त्रिपुरादैवत्यानि यंत्राणि॥ ॥श्रीमहल्लवसंताराज्याः समीहितसाधकानि भवंति य

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मं॰द॰ ९०

धावासाध्यं नित्यक्लिन्ना तन्नाम वर्णांकाश्चतुःषष्टिः ६४ साधकः धियकुन नामा राजकुमारः तन्नाम वर्णांकाः षष्टिः ६० विशेष
मतीराजस्नुषा च साधिका तन्नाम वर्णांकाश्चतुःपंचाशत् ५४ अत्र सर्वेपि समांका एव तत्र च षष्टिरूपेकसाध्यांकेनापरसाध्यां
कस्य च वियद्युग्मांकः पर्यस्यंति २०७३६० तत्र नवभिर्भागे नवांकः ९ शिष्यते साध्यवर्णांकेन सह साधकाद्वयांकस्य योगे तु अष्ट
सप्तत्यधिकशतांकः १७८ संपद्यते तत्र नवभिर्भागे हृते सप्तिसप्तांकः शिष्यते इत्यधमफलमेतद्देवतांकपंचमेनयोः सा
धकयोः यथा वा सावित्रीगायत्री पृथिवीति साध्यत्रयं तन्नाम वर्णांकाः क्रमेण द्वात्रिंशत् ३२ त्रिंशत् ३० पंचविंशति २५ सा
धकः श्रीमल्लेवम्मनामा नृपतिः तन्नाम वर्णांकाः द्विपंचाशत् ५२ एतेषां योगे चत्वारिंशाधिकशतांक १४० तत्र नवभिर्भा
गे पंचांकोवशिष्टः साध्यांकानां परस्परं गुणाने चतुर्विंशतिसहस्रांकः २४ संपद्यते तत्र नवभिर्भागे षडंकोवशिष्यते इ
त्येन देवतांकपंचमेन साधकस्याधमफलं ज्ञेयं एवमुदाहरणान्तरेष्वपि स्वयमूह्यं नामवर्णांकास्तु शैल ७ षट् ६
भुजग २ ईश्वराणां वृद्धि ४२२ रथो विश्व १३ दृगग्नि ३२ स्तथा नागाब्धि ४८ प्रथमांक शालिन इमे वर्णाक्रमादादयः वेद ४
श्विदि २२ रथांकवह्नि ३९ रमेशान २४ स्त्रिरामो ३३ द्विभू १२ र्मंदामोधि ४१ रिमे तु दोर्मितिभिर्नाकेनान्विता स्तेर्मिताः १
वासो वेद भुजग १२४ खवार्धि ४० रिषुकुः पार्थो ध्विरामो ३४ धृतिः १८ षट् ६ पंचभि २५ रथेर्द्वा वार्धि ४१ रक्ताः १२ न्मग्नि

गुरुः ९०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

३३ र्नगाब्धि ४७ स्तथा द्विः २ कुद्वि २१ र्तव भू १८ न्नृप १६ रवाचिशिरवः ५० शैलाग्नि ३७ रिषुनयो ३५ नंदाष्टधि ८१२ रथाब्धि
वार्द्धि ४४ रगजे ११ नःरवानलः ३० षड्वि ब्धिः ४६ ॥ २॥ आशा १० नंदभुजः २९ शरा ब्धि ४५ रगद्री २७ र्व सुं वुद्धिः कुंजरो वह्नि र्भूः रव भु
जौ २० ष्टवह्नि र थचाब्धिद्वी २२ रसाग्नि ३६ स्तथा दक्षश्रोत्र मुरवानकारच्छ्रर मास्य कैकपादो दिवर्णाः स्युः क्रमश स्त्रिवेद विशिरव
र्त्वद्रि द्विपांके र्युताः॥ २॥ यंत्र देवतास्तत्र तासामपि ॐ त्रिं त्रिपुरायै नमः इत्यादिभिर्नाममंत्रैः षोडशाद्युपचारैः पूजां ष्वेतादिगंधाक्ष
त पुष्पवस्त्रादिभिः कृत्वा वलिं पायसकुष्मांडनारिकेलादिभिर्दत्वा तदने पूर्वोक्तं भूचक्र यंत्रं लिखित्वा तत्र समक्षं गणपतिं गुरुंच ॐ
गं गणपतये नमः॥ ॐ श्रीगुरुभ्यो नमः इति नमस्कृत्य ॐ प्रजापतये नमः इति प्रजापतिं नत्वा ॐ प्रजापते नमस्तुभ्यं प्रजापालन तत्पर प्र
सन्नो भव मे देवि यंत्र सिद्धिं डाय छमो ये केचिन्मेन कूष्मांड भैरवा भूतनायकाः ते सर्वे प्रलयं यांतु प्रजापालन मोस्तुते प्रयच्छ सिद्धि
मतुलां यंत्र राजस्य दुर्लभां त्वत्प्रसादादहं नाथ कृतकृत्य पदं व्रजे इति प्रजापतिं संप्रार्थ्य तत्र छांत्वा यत्न कृलसाम ग्याकथित दिशा
नवकोष्ठक षोडशकोष्ठकं वा यंत्रं पूर्वोक्ता ष्टगंधादिभिः रवटि का गैरिक हरिद्रादिभि र्वा कर्मेण शांति वश्य स्तंभनादिक र्मस्तु लिखित्वा पट्ट
स्तत्रे णावे ष्टयित्वा भूर्ज पत्र क्षौमवस्त्र स्वर्शरो म्पता म्रान्यतम तोयंत्र धारणाय तांत्रिक रित्या प्रतिष्ठित कुंडाग्नौ सहस्र शतान्यतम सं
रव्यया हुत्वा संपाताज्यं यंत्रोपरि प्रक्षिप्य पूर्णाहुत्यादिकं सर्वं कृत्वा यंत्र प्रतिष्ठा सांगता सिद्धये स्तुवर्णा वस्त्राभरणादिक माचार्याय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

म॰द॰ ९१ दत्वा भूयसीं दत्वा ब्राह्मणांश्च यथाशक्ति सांगतासिद्ध्यर्थं भोजयित्वा दीनानाथादिभ्योन्नादिकं दत्वा श्रीगुरुणा दत्तयंत्रं कण्ठकादौ
वा धृत्वा स्त्री चेद्वामकरादौ धृत्वा सा ध्रुवा साध्रुवेत्यादिमंत्रेण स्वीयं कर्म श्रीनारायणाय समर्प्य बंधुमित्रादिभिः सहितो भुंजीत ॥ एषतु प्रयोगः
सिद्धयंत्रस्यैव करणीयो नाखिलस्य तत्प्रयोगो यथा पूर्वं गणपतिं नत्वा गुरुं संपूज्य तदाज्ञां प्रार्थयित्वा पुरश्चरणोक्तदिशा दशसह
स्रसंख्यया तत्तद्यंत्रदेवतामंत्रं ॐ त्रिं त्रिपुरायै नम इत्यादिरूपं जप्त्वा तद्दशांशहुतसहस्रसंख्यया पायसेन स्वाहांतपूर्वोक्तमंत्रे
णा हुत्वा तद्दशांशहुतसंख्यया स्वीये ब्रह्मरंध्रे त्रिपुरादिदेवतां विभाव्य संपूज्य ॐ त्रिं त्रिपुरायै नमः सांगां त्रिपुरामभिषिंचामीति मं
त्रेणोक्तसंख्ययाभिषिच्य ब्राह्मणान्भोजयेत् शांतिकर्मणि॥ मवश्यकर्मणि होमदशांशेन ब्राह्मणभोजनं मुख्यं होमाच्चतुर्विंशांशे
न मध्यमं होमाच्छतांशेन त्वधमं शांतिकर्मणि प्राप्तसंख्यापेक्षया द्विगुणसंख्यया ब्राह्मणभोजनं स्तंभने कर्तव्यं त्रिगुणं तु
होमतो ब्राह्मणभोजनमुच्चाटने द्वेषणे च कर्तव्यं मारणे तु होमसंख्यासमानसंख्ययैव ब्राह्मणभोजनं कार्यं यद्यपि पुरश्चर
णमेव शांतिकर्म किंतु शांतिकर्मतः पूर्वमाचरणीयं तत् तथापि शांत्यादिकर्मचिकीर्षया पूर्वं क्रियमाणे पुरश्चरणे इत्थं ब्राह्म
णभोजनसंख्येति तात्पर्यं ततश्च पायसादिभिर्बलिं दत्वा पूजायंत्रदेवतायाः गंधाक्षतादिभिः कृत्वा क्षमाप्य भूर्जचक्रं लिखित्वा संपू
ज्य तत्सविधे स्वस्वकामनानुसारि यंत्रं लिखेत् यादृशक्रमेण च यंत्रस्यांकलिखनं तादृशक्रमेणैवांकानां मार्जनं कार्यं तत्व गुरु॰ ९१

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्यथा एतयैव दिशा दशाधिकाष्टशत ८१० संख्यया नवकोष्ठकयंत्रा शालिखेत् षोडशकोष्ठकानि तु यंत्राणि द्विपंचाशीत्तरत्रिंश
ताधिकचतुःसहस्र ४३५२ संख्यया लेख्यानि एकैकशो यंत्रलिखनात्पूर्वं सकलतत्तद्यंत्रदेवतामंत्रोज प्रव्यः अंकाश्च स्वस्वस
मानसंख्याकपरब्रह्म भूपक्ष ब्रह्मविष्णु महेश्वर वेद पंच भूत षड्रस तु सप्तर्षि वसु नव निधि दश दिग्रुद्र रवि विश्वेंद्र प्रभृति देवा
न् संस्मृत्य तत्तद्देवेभ्यः स्वाभिलषितं संप्रार्थयन्नेव लिखेदिति एवं यंत्रप्रतिष्ठादिकं ॥ ॥षट्त्रिंशत्पंच षष्ट्यां गशर गिरि भुजां
कद्विकांकार्गानामायंत्रे शःषशिमितांकाः उपरि नव नवांकार्गानामा अपुंसां इष्ठा ध्यायीन वांकाउ रिगज गुणोष्ठद्वि भू सप्त कुध्यंगाद्वि
ध्यगाद्वि वाद्रि द्विकु विधि— क्षमेषु वाद्धि द्विकांकः १ वार्ध्यग्निनागशर भूगज भूमितर्कव्योमा —संमिति धरांकयुतः क देवः वेदांकतो
गिरि गुणाद्रि रसाभ्र वेदांकारव्य क्त सप्त मितितिः परमार्थसिद्धै २ अद्रीष्वब्धिरस र्तु वेद मितिकांकः सूर्यतः पंक्तितो भूपयक्ष
खपंच शक गज षट्द्वीषु प्रमाणांकवान् अष्ठद्वीषु धरांकवा स्तशरतो भू भू मितांकात्परं त्रित्रि प्रख्य प्रभांकवानिह प्रभोदेवो
भवेत्पूर्ववत् ३ यवर्गीय यवर्गीय वकारयोस्तु भेदोभक्तितरंगिणा मनुसंधेयः अथ प्रयोगः तत्र काम्यं वशादिक
र्म चिकीर्षुर्यजमानस्तदनुकूलदिनात्पूर्वतनदिवसे श्मश्रुनखनिकृतनं कृत्वा नित्यनैमित्तिककर्मणी समनुष्ठाय कर्मार्हता
सपत्नीगायत्रीजपादिरूपं प्रायश्चित्तं विधाय स्वस्तनदिवसे नित्यनैमित्तिककर्मणी समनुष्ठाय श्रीगुरुं पूजयित्वा तदाज्ञाम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भ्य र्थ्यगणपतेः पूजां कुर्यात् देशकालादिकीर्त्तनानंतेमममैतच्छरीराविरोधेनदारिद्र्योपशांतयेकर्त्तव्यप्रतिष्ठितयंत्रधारणाकर्मणो
निर्विघ्नतासिद्ध्येयथावृद्धिनियोगंविधिनागणपतेः षोडशोपचारैरावाहनादिपूर्वकंपूजनंकरिष्येइत्यादिसंकल्पवाक्यंका
मनाभेदोपचारहासादिनाप्रवेशितवाक्यांतरकंस्वयंसुधीभिरूह्नेयं ततस्तांत्रिकेर्वैदिकैःपौराणिकैर्वामंत्रैर्गणपतिंसं
पूज्यतत्पूजासांगतासिद्ध्यर्थंकदक्षिणांचदत्वापुण्याहवाचनंस्वस्तिवाचनंचब्राह्मणद्वाराकुर्यात् ततश्चप्रधानसंक
ल्पः तत्रदेशकालावुल्लिख्य अमुकगोत्रेमुकशर्माहंममैतच्छरीरविरोधेनदारिद्र्योपशांतयेयथावृद्धिनियोगंविधिनात

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तिथीशा वह्निकौ गौरी गणेशोऽहिर्गुहो रविः शिवो दुर्गान्तको विश्वे हरिः कामः शिवः शशी ॥१॥ अमावास्या ॥ पितृ ॥

वकोऽहं कसिज्यं यंत्रं धारणां करिष्य इत्यु इत्येवं वाक्यं ॥ तत्पुरुषस्यैव कामकामनादेशकालादिभेदाद्भिन्नतामापद्यते काकथा पूर्
वमेदेन नतश्च पूर्ववदेव देशकालादिकमुल्लिख्य ममशान्तिप्रयोगपूर्वाङ्गतया तन्न दधिकरणा भूतवारेन्ना तिथीशा नक्षत्रे
शाकर्मदेवताय त्रदेवतानां यथा उक्तनियोगविधिना पूजनं करिष्ये इति संकल्प्य तत्तन्नाममन्त्रैः प्रसावसविदुना माशा
क्षरचतुर्थीनमोंतैस्तान् पूजयेत् ॥ ॥तत्र वारेशा यथा ॥ शिवरवी अंबिकाचंद्रौ कुमारमंगलौ विधिज्ञो विष्णुगुरुः रमाशुक्रौ कु
वेरशनी रविवारादितः क्रमतः स्वामिनः ॥ ॐ शिं शिवाय नमः ॥ ॐ रं रवये नमः ॥ इत्यादयश्च तन्मन्त्राः ॥ तिथिशा यथा ॥ वह्नि
प्रतिपदः स्वामी ॥ द्वितीयाया दस्रौ ॥ तृतीयाया उमा ॥ चतुर्थ्या विघ्नः ॥ पंचम्या भुजंगः ॥ षष्ठ्याः षण्मुखः ॥ सप्तम्या रविः ॥ अ
ष्टम्या मातरः ॥ नवम्या दुर्गा ॥ दशम्या दिकु ॥ एकादश्या धनदः ॥ द्वादश्याः केशवः ॥ त्रयोदश्या यमः ॥ चतुर्दश्या शिवः
॥ पूर्णिमाया अमावाश्या याश्च चंद्रः स्वामी ॥ ॐ वं वह्नये नमः ॥ ॐ दं दस्राभ्यां नमः ॥ इत्यादयस्तन्मन्त्राः ॥ नक्षत्रेशा यथा
॥ अश्विनौ १ यम २ वह्नि ३ धाता ४ चंद्र ५ शिव ६ अदिति ७ गुरु ८ सर्पा ९ पितरः १० अर्यमा ११ भग १२ दिनकृत् १३ त्वष्टा १४
मारुतः १५ इन्द्राग्नी १६ मित्रः १७ इंद्र १८ निर्ऋति १९ तोय २० विश्वेदेवा २१ हरि २२ वसव २३ वरुणः २४ अजैकपात् २५
अहिर्बुध्न्यः २६ पूषा २७ एते देवाः क्रमतः अश्विन्यादिनक्षत्रेशा ज्ञेया ॥ ॐ अं अश्विभ्यां नमः ॥ ॐ यं यमाय नमः ॥ ॐ व
ह्नये नमः ॥ ॐ धां धात्रे नमः ॥ ॐ एकपादे अं अजाय नमः ॥ इति रीत्या ॥ ॐ पूं पूष्णे नमः ॥ इत्यंताः स्वयमन्त्रे याः ॥ कर्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देवतास्मरणादयस्सर्वमुक्तास्त्वा। ॐ रत्यै नमः॥ ॐ संसरस्वत्यै नमः॥ इत्यादयस्तत्तन्मंत्राः॥ स्वयं कर्मसमर्थो ब्राह्मणद्वारा कुर्यात्
वरणासामर्थ्यात्सम्भूषणायज्ञोपवीतादिरूपया सम्पत्त्या ब्राह्मणाः क्रीतो भवती तित्कृतस्य कर्मणः फलं यजमानगामे
व॥ वरणात्प्रारम्भाद्विनानियमात्विष्णुब्रह्मचर्याधिकारासिद्ध्यर्थं कृप्रायश्चित्तादयो यजमानस्यैव। तदुत्तरम्भावाह्मब्रह्मस्य
तविष्यादयो नियमा आचार्यः यजमानयोर्द्वयोरपि दक्षिणासमर्पणादय उत्तरकरणीयाश्च पदार्थाः केवलं यजमानस्ये
तिध्येयं॥ ॥अथ जपहोमपूजादिषु प्रकृतोपयुक्तेषु केचिद्विवेकविशेषेहो अपनोद्यते। कासक्षुतेजृंभायां वैकाद्यन्नामस्म
ऽजपः स्वेष्टसंख्यातो वहिः कार्यः॥ सकृदुच्चरिते संस्कृतशब्दे प्रणवजपप्रायश्चित्तरूपः करणीयः पामरशब्दोच्चारणे
पुनः प्राणायामं चरेत्॥ बहुप्रलापे तु पंचांगादिन्याससंकृत्त्वात् उत्तरमुर्वरित्तसंख्यापूरणार्थं पुनः जपः प्रारब्धव्यः॥ क्षुते
पिपंगादिन्यासः कार्यः अस्पृश्यानां गोप्यानांग्गानां स्पर्शेऽपि पंचांगादिन्यासः॥ विनागणनां जपो निषिद्धः॥ नैकवस्त्रो
नवावस्त्रो वाजल्पवान्॥ नापि अधोवस्त्रमुत्तरीयं वाधोवस्त्रं कृत्वा जपेत्॥ पौरश्चरणिकश्चायं यं तूलेखोवार्नैतरं न
यबाधेन नापि मध्याह्नानतिक्रमबाधेन न वा समानसंख्यानतिक्रमबाधेन समनुष्ठेयः॥ ननु वैशाखश्रावणादिषु दी
र्घतरदिनपरिमाणकेषु समारब्धस्य माध्याह्दिमासपर्यंतकालस्थायिनो जपाद्येत्तदेकतरपक्षवाधभावश्यकः॥ न हि वै
शाखादिमध्याह्नकालपर्यंतभाविनो जपादेः पौषादिमध्याह्नपर्यंतसंभवः॥ संभवदुक्तिकः नाद्यत्तनाविलंवितमिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निषेधदर्शनात् ह्युत्थादिकमपि नानुसन्धेयमिति चेत् सत्यं ॥ नहि वयं प्रातःरारभ्य मध्याह्नांतं जपकालमाचक्ष्महे ॥
किंतु मध्याह्नोत्तरकालमेव प्रतिषेधयामः ॥ तथा चैवंकारवादिष्वपि पौषाद्यनुरोधमाश्रित्यैव जपः प्रारब्धव्यो येन
संख्यावैषम्यं न स्यात् ॥ यद्वा मध्याह्नान्तः कालो मुख्यः ॥ सूर्यास्तान्तः कालो गौणः ॥ तथा च पौषादिषूपक्रान्तसंख्यानु
रोधात् गौणकाललाभेऽपि न क्षतिः ॥ अतएव जपं रात्रौ वर्जयेदिति निषेधः समञ्जसः ॥ मध्याह्नान्तकालस्यैव ग्राह्य
त्वे तु रात्रौ जपस्य प्रसक्तेरेवाभावाद्वार्थोऽयं निषेधः स्यात् ॥ मन्मते तु गौणकालत्वेन प्रसक्ताया रात्रेर्निषेधो युज्य
तएव ॥ स्वकालादुत्तरः कालो गौणः इत्यभिधीयते इति वचनात् ॥ न दिवा नापि रात्रौ भुञ्जीत ॥ किन्तु दिवसस्याष्टमे भागे
आभ्यंगं अन्यदेवतापूजां च वर्जयेत् ॥ नरकचतुर्दशीबलिप्रतिपदादिषु नायमभ्यङ्गनिषेधः यदि तूपक्रान्तकर्म
पुरश्चर्या कर्मविरुद्धधर्मकृत्तदा तत्तदसमर्प्य पुरश्चर्यान्तरं भजनीया ॥ भ्रातृपुत्रादिद्वारा वा तन्निर्वाह्यं ॥ काम्यं तु कर्म
नानुष्ठेयं ॥ न त्वन्यदेवतापूजननिषेधे शक्या यौथदेवतावरणादेवतानामवश्यमर्चनीयत्वात् ॥ न च प्राधान्येना
न्यदेवतापूजानिषेध इति वाच्यं ॥ सा हि नित्या न प्रतिषिध्यते नापि नैमित्तिकी नित्यपूजा नित्यदानं तथा नैमित्तिका
र्चनमित्यादिनानयोः प्रत्युत विहितत्वात् ॥ नापि काम्या काम्यकर्म न कर्तव्यमित्यनेनैव तत्प्रतिषेधसिद्धेरन्यपूजानु
कर्तव्येति निषेधवचनस्य वैयर्थ्यापत्तेरिति चेन्न शिवरात्रिमहालक्ष्मीव्रतादौ नित्ये समारब्धप्रदोषव्रतादौ काम्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

म॰शा॰द
९४

वचनत्प्रसक्तेः प्रतिषेधवचनं पुनः परदारातत्पूजामनुज्ञापयतीति किमनुपपन्नं। ब्रह्मचर्यं चावश्यकं॥ ऋतुकालेस्वस्त्री
गमनं चावश्यकमपि न ब्रह्मचर्यहानिकरं॥ अतएव श्राद्धदिन एव यदि षोडशात्तमा निशा न स्यात् ततः पूर्वमृतुकालेऽ
संनिहितेस्य पुंसो निजस्त्रियमभिगच्छतोपि न ब्रह्मचर्यस्खलनमिति मीमांसाविदः॥ क्षौरमप्यत्र प्रतिषिद्धं॥ राग
प्राप्तमेवेदमपि प्रतिषिध्यते॥ तेन बान्धवमरणादिनाप्रसक्तस्यास्य न निषेधः॥ सूतकेवेदमारब्धं न परित्याज्यं॥ सूत
केवास्य पुंसः समारब्धजपादिष्वेव नास्ति न तु कर्मान्तरावरतोपि तेन समारब्धपुरश्चरणकस्य पुंसो जपो निर्वहति।
संक्रान्त्यादिनिमित्तागमप्राप्तं दानपूजादिकं च न प्राप्नोति। पुनश्चरणं च यदि जपमात्रं होमादयस्तु तदंगभूता त
दा जपमात्रं सूतके निर्वाह्यं॥ होमादिकं तु सूतकान्ते। यदि च ब्राह्मणभोजनान्तं सर्वं पुरश्चरणपदार्थ एव तदा
त्वारब्धे सूतके नास्तीति वचनप्रवृत्तिः होमादावप्यवशिष्टे च जपादिसंख्यापूर्त्यादिरूपा सत्यप्यङ्गविषयाः कलौ
चतुर्गुणाः प्रोक्ता इति वचनस्यैतापि प्रवृत्तेरत्र जपश्चतुर्गुणसंख्यया कार्यः॥ एवं यत्र पुरश्चर्यापि पूर्वोक्तसं
ख्यामपेक्ष्या चातुर्गुण्यवतीकरणीया॥ इदं च ब्राह्मणस्यैव क्षत्रियस्यापि द्विगुणा वैश्यस्यापि त्रिगुणा शूद्रस्तु ब्राह्म
णात् क्षत्रियवैश्यानामन्यतमं द्विजं सेवमानस्तद्द्विजप्राप्तजपादिसंख्यामनुसरेत्॥ स्त्रीणां तु यद्वर्णस्यालितद्वर्णप्राप्तज गु॰
पादिसंख्यामनुसरेत्॥ अन्त्यजानां चतुर्गुणो जपादिः॥ होमासमर्थस्तु द्विगुणं जपमेवानुतिष्ठेत्॥ ननु चै ९४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्पं किं होमसंख्यापेक्षया आहोस्विज्जपसंख्यापेक्षयोच्यते॥ प्रधानजपाद्वैगुण्येन जपानुष्ठा
नेसमर्थस्य जपापेक्षया· असमर्थस्य तु होमापेक्षयैव· एवं तर्पणासमर्थस्य तर्पणप्राप्तसंख्याद्वै
गुण्येन जपोनुष्ठेयः॥ मार्जनासमर्थस्य मार्जनप्राप्तसंख्याद्वैगुण्येन जपानुष्ठानं॥ ब्राह्मणभोजना
समर्थस्य तत्प्राप्तसंख्यापंचगुणसंख्यया जपोनुष्ठेयः॥ यदि तु शूद्रः स्त्रियो वा भयद्वीआदिना केव
लं विप्रान्भजंति न तु तद्भिन्नभाजनं दा शूद्राणां स्त्रीणां च ब्राह्मणप्राप्तजपसंख्यापेक्षया पंचगुणो
जप इत्यवधातव्यं॥ ॥यदि सामान्यार्घ्यविशेषार्घ्यनामकं पात्रद्वयमेव स्थाप्यते तदा हि यद्यपि सामान्यार्घ्ये
पात्रेण पाद्यार्घ्याचमनीयादिपात्राणां कार्यनिर्वाहः क्रियते तथापि तत्तत्प्रतिक्षेप्यवस्तूनि तत्र न प्रतिक्षेप्या
नि· न हि स्वरूपातिदेशोयं येन तत्स्वरूपतया तत्प्रतिक्षेप्यवस्तुप्रतिक्षेपः प्रसज्येत· किंतु कार्यातिदेशोयं
तेन स्वरूपतः सामान्यार्घ्यपात्रं तां धारयन्नपि पाद्यादिपात्रनिर्वाह्यकर्माणि निर्वाहयतीति सिद्धं॥ ॥पंचोपचा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रपूजायांअर्घ्यादिस्थापनंनकार्यमितिवहव॥ तत्रसम्यक्॥ उपचारार्पणार्थंसामान्यार्घ्यस्यैनैवेद्यार्थंपाद्याच
मनीयपात्रयोः पूजावस्तुप्रोक्षणार्थंप्रोक्षणीयपात्रस्यचावश्यकत्वात्॥ ॥विशेषणानामभावेपिविशेः
ष्यसत्वादेवमंत्राः प्रयोक्तव्याविनाः॥ यथानानारत्नसमायुक्तमुक्ताहारविभूषितं॥ स्वर्णसिंहासनंचात
प्रीत्यर्थंप्रतिगृह्यतामित्यादौकेवलंपोष्यादिमयस्यआसनस्यसत्वेप्येषमंत्रःप्रयोक्तव्यः॥ उप
चारोत्सर्गंकृत्वाचतन्निवेदनंमूलमंत्रादिनाकर्त्तव्यंयत्तुउत्सर्गनिवेदनयोर्विभेदंनस्वीकुर्वंतिः
नवातन्मंत्राभिज्ञास्तेतुनतंत्रशास्त्रविदोभवंति॥ ॥पत्रफलंसुवर्णंपुष्पाविचित्रवः
स्रजपुष्पमालत्यादिषुपंचस्वर्पणीयेषु स्तमंदसौरभंपुष्पंगृह्यतामिदमुत्तमामित्यादि गुरु:
वंमंत्राः पठनीयाऽएवा ननुबर्हिर्देवसदनंदामीतिमंत्रेवर्हिःपदंमुख्यभूतकुशपरमेवनतुगौणभूत ९५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

काशपरमपि॥ सर्वोपस्थितमुख्यत्वत एवं नैराकांक्षात्॥ एवमत्रापि गुह्यपदं मुख्यपदमेव भवितुमर्हतीति चेत् सत्यं गुह्यं पंच
भिधं प्रोक्तमित्यादिवचनैः पंचस्वपि मुख्यतयैव गुह्यपदप्रवृत्तेर्वोधितत्वात्॥ न हि विष्णुसूर्याश्विवानरादीनामेकतरं हरि
पदं स्वमुख्यमन्यत्तु गौणमिति शक्यते वदितुं॥ ॥घृतदीपो दक्षिणे स्थाप्यः तैलदीपो वामे॥ श्वेतवर्त्तिका दक्षिणे रक्तवर्त्ति
का वामे यत्तु रक्तवर्त्तिको घृतदीपः श्वेतवर्त्तिकस्तु तैलदीपस्तत्र स्नेहानुरोधादेव दक्षिणभागवामभागव्यवस्था॥ यत्र स्ने
हो वर्त्तिकाभ्यः पृथक् न दृश्यते किंतु स्नेहाक्तवर्त्तिमात्रमुपलभ्यते तत्र वर्त्तिश्वेतत्वरक्तत्वादिगुणानुरोधादेव भागव्यवस्था॥
प॰ १० ॥ ॥अधिकारविशेषार्थके मृतसञ्जि प्राणप्रतिष्ठामातृकान्यासादिकर्मणि न कस्यापि ह्रासः कार्यः षोडशाद्युपचारा पुः
नवकाशस्तु पंचोपचारैः पूजनं कुर्यात्॥ आवरणपूजायामसमर्थैर्नागदेवतापूजनमात्रमनुष्ठेयं॥ सकलपीठदेवतापूजायामस
मर्थेन स्त्रीप्रभृतिभिश्च ॐ धं धर्मायनमः॥ ॐ ज्ञां ज्ञानायनमः॥ ॐ वं वैराग्यायनमः॥ ॐ ऐं ऐश्वर्यायनमः॥ ॐ अं अनंतायन
मः॥ ॐ अं अब्जायनमः॥ इति मंत्रैर्ऋमादयः षडेव पीठदेवताः पूजनीयाः स्त्रीशूद्रादिभिश्च सर्वत्र प्रणवस्थाने औमि
ति वंर्तुयस विंदुचतुर्दशस्वरः प्रोच्चार्यः॥ यत्तु नाना पूजा एकाहोरात्रे कर्त्तव्यास्तत्र न पुनः पुनर्भूतशुद्ध्यादिकमावर्त्तनीयं॥
अर्घ्यस्थापनादिकं पुनरावर्त्तनीयमेव॥ भूतशुद्ध्यादिकं देहसंस्कारार्थं॥ आत्मा च सकृतदेहस्थानादेव संस्कृतः पुनर्नत
दपेक्षते॥ अर्घ्यैकस्थापनन्यनादि संस्कारस्त्वह्निती यदि भेयीदं नस्यात्॥ सत्यं॥ उपनयनं हि तत्र देवतादिशरीरसंस्कारः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

ःइदंतु तत्र दहोरात्रकालीनदेवदत्तादिशरीरसंस्कारः द्वितीयादिदिनेषु पुनरेतदनुस्थानवचनदर्शनात् अर्घस्थापनादि
कं तु जलादिसंस्कारः उपयोक्ष्यमाणा जलादिभेदाद्भेदमर्हतीति सर्वथा तत्पुनरावर्तनीयं॥ मुख्यकाले गौणाद्व्येणापिक
र्मनिर्वाह्यः॥ ननु मुख्याद्यप्रतीक्षया गौणः कालः आश्रयणीयः॥ अंगानां लोपे थिन पुनः प्रधानमावर्तनीयं॥ अंगानां यौर्वाप
र्येपि संख्यादिलोपेपि च नावृत्तिः प्रधानस्य किंतु श्रीविष्णुस्मरणादिरूपं प्रायश्चित्तं कर्तव्यं॥ ॥काम्यकर्माणि द्रव्यादिप्र
तिनिधिना स्मिते न यदा तत्तत्कल्पोक्तकाम्यकर्मसामग्रीसंपूर्णा मिलति तत्र मध्यमाधमपक्षो यादाने मध्यमाधमप्रकारेणा
पि यदि सा मिलति यदि वानुष्ठानात तत्तत्कर्माभिप्रेतो मिलति तदैवेदं कर्मारब्धव्यं॥ ॥उत्तमप्रकारे समर्थो यदि मध्यमाधमः
प्रकारमनुसरेत् तदा नासौ सिद्धिमिच्छेत्॥ असमर्थस्य त्वधमोपि पक्ष उत्तम एव॥ ॥ननु अवश्यंभाविभावानां प्रतीका
रो भवेद्यदि॥ तदा दुःखैर्न लिप्येरन्नलरामयुधिष्ठिराः इत्यादिवचनदर्शनात् अवश्यंभाविनोर्थस्य प्रतीकारो नैव संभव
ति॥ नहि हसमीहितो राजा ज्यपुत्रादिः साधकस्य यद्यवश्यभावी तदा भविष्यत्येव अथ न भावी तदा प्रयोगसहस्रेणापि
न भविष्यत्येवेत्युभयथापि व्यर्थोयं यंत्रादिप्रयोगश्रम इति चेत्॥ मेवं दुरदृष्टं हि द्विविधं दृढमदृढं च॥ तत्र दृढं नला
दीनां यत्र प्रयोगशतेनापि सम्भवेति॥ द्वितीयं त्वस्मदादीनां दृश्यते हि ज्वरादयः उपद्रवाः शान्ताः अपि तत्र प्रयोगानुसरणेन
सुरवंतः अत एव ज्योतिःशास्त्र वैद्यकशास्त्रार्थं च वेदादेः साफल्यं॥ अन्यथा शुभलग्नाद्यवेक्षणरूपस्य ज्योतिः

मं॰श्चा॰ शास्त्रज्ञानफलस्यौषधसेवनद्वारास्वास्थ्योत्पादनस्य अथर्ववेदप्रतिपादितप्रयोगाभ्नतस्यराज्यपुत्रादिर्प्राप्तिस्त्वेस्वयमेवसंभ
९७ वात्॥अप्राप्तिस्त्वेत्तितोप्यसंभवाद्वैयर्थ्यमेवतेषांस्यात्॥यद्वा॥एकमेवाहस्यंयद्विप्रयोगेकृतेविनश्यति।अनंतरेणप्रयोगं
स्वयंस्थिरीभवत्स्वकार्यमुत्पादयति।नलादिभिस्त्वस्वदुःखापनोदायप्रयोगःकृतस्तत्रप्रमाणाभावः॥फलविफलव्यतिरेः
कदर्शनेनतुकर्तव्यैगुणादिनःशक्यमुपपादयितुं॥तस्मादवश्यमेवंयंत्रादिप्रयोगैःश्रीगुरुचरणकरुणयासम्यग्विदितविधिकैः
यथोक्तविधिनानुष्ठितैःसाधकःस्वसमीहितमुपलभ्यकृतकृत्योभवतीत्यलमलमनल्पजल्पनेन॥ ॥अधीतंनैवेतन्त्र
चगुरुगमवाक्यंनमिलितोमदाशंकाछेदीनहिचममसिद्धगणाना॥तथाप्यत्रार्तिःकथमपिमलैवम्मनुयतेयदत्रास्ते
हेतुश्चरणकरुणाहैहयहरेः॥ १ ॥अतिक्लिष्टशब्दैःशिवादिष्टमार्गैर्भ्रष्टानान्तुमत्याप्यसंस्पृष्टकष्टे॥यस्मिंस्त्वनवद्येधियो
मेप्रकाशःप्रभावोस्तुयंदीपदानस्यविष्णोः॥ २ ॥यस्योद्योतमतीसतीगुणवतीमातापितोमायतिर्नामप्रेमनि
धीतियंथकुलंभ्रुःकूर्माचलेजन्मभूः॥तेनाष्टाब्धिषडिंदुशाकगणितान्योर्जायतिथ्यर्कनिट्कालेश्रीशिवताण्डव
स्यविहितंसद्दिव्यरासत्वरं॥ ३ ॥शिवताण्डवटीकासौमन्त्रादर्शाभिधावाचा॥प्रेमनिधिशर्मनिर्मितोमन्त्रा राम
दर्शःसंपूर्णः॥ ॥शुभमस्तु॥श्रीसदाशिवोविजयते॥ ॥ ॥छ॥ ॥ ॥ ॥छ॥ ॥ ९७

स्नानानांपुरतःकरीकुम्भकःकर्णेननत्वाद्यलेनसंज्ञीनकृतिमिहैवोर्धिभवनंगत्वाम्बुनोनिष्कृतिप्रागेकंभवनंपदानिरथश्चेत्स्वेच्छावशात्सर्वे
नोपातीहक्षितिपोमुखंचयदिपुनःशुद्धोयदापद्यतः॥१॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu